१.**कौषीतकगृह्यसूत्रम्** (भवत्राताभाष्यसहितम्) सम्पा. ति.रा. चिन्तामणि , मद्रास विश्वविद्यालय सन् १९४४ ।

२.**कौशिकगृह्यसूत्रम्** (पीयूषकणिका - भाष्यसहितम्) डा श्रीकिशोर मिश्र वाराणसी सन् १९९८ ।

३.**कात्यायनयज्ञपद्धति विमर्शः** (हिन्दी भाषायाम्) मनोहरलाल द्विवेदीकृत राष्ट्रिय संस्कृत संस्थान दिल्लीतः १९८८ क्रै प्रकाशितः ।

# विषयः — ऋग्वेदः

पाठ्यांशनाम—**प्रातिशाख्यम्, संहिताभाष्यञ्च**
पाठ्यांशसङ्केतः—ऋग्वेदः३०२
स्तरः — शास्त्री
पूर्णाङ्काः— १००
वर्षः — प्रथमः
वार्षिकः पाठ्यभारः — १६० घण्टाः
पत्रम् — द्वितीयम्
साप्ताहिकः पाठ्यभारः ६

## १. पाठ्यांशपरिचयः

अयं पाठ्यक्रमो मूलतः ऋग्वेदस्य शैशिरीयशाकलशाखासम्बद्धोऽस्ति। वेदविषयमधीत्य द्वादशीं कक्षां तत्समकक्षामन्यां वा परीक्षामुत्तीर्य नेपालसंस्कृतविश्वविद्यालयान्तर्गतेषु विद्यापीठेषु ऋग्वेदविषयमवलम्ब्य पिपठिषूणां छात्राणां कृते प्रातिशाख्य - संहिताभाष्यशिक्षणाय निर्धारितोऽयं पाठ्यांशः पञ्चसु प्रकरणेषु विभक्तः।

अत्र **प्रथमे क प्रकरणे** प्रातिशाख्यसम्बद्धा वर्णानामुच्चारणपरकाः पाठ्यविषयाः निर्धारिताः सन्ति। अस्मिन् प्रकरणे विष्णुमित्रकृतवृत्तिभूमिकासहित-वर्णसंज्ञा-तदुच्चारणकाल -वर्णानां स्थान-पदान्तपदादिविषयाः, संहितास्वरूप- स्वरव्यञ्जनसन्धिसम्बद्धा प्रातिशाख्यस्य प्रथमद्वितीयाध्यायगतविषयाश्च पाठ्यत्वेन सन्निविष्टाः सन्ति।

**द्वितीय ख प्रकरणे** ऋक्प्रातिशाख्यस्य ३-५ पटलगता उदात्तादिस्वराः तेषां सन्धिपरकविषयाः, केचननिपाताऽपवाद) निर्देशकसूत्रगतविषयाश्च पाठ्यत्वेन निर्धारिताः सन्ति।

**तृतीये ग प्रकरणे** प्रातिशाख्यस्यैव ६-१० पटलान्तर्गतानां ध्वन्यागम - ह्रस्वस्यदीर्घभावापवादप्लुतिःक्रमपाठसम्बद्धविषयाः पाठ्यत्वेन सन्निविष्टाः सन्ति।

**चतुर्थे घ प्रकरणे** ऋग्वेदीयर्चामर्थज्ञानं प्राचीनभाष्याधारेण करणीयमिति हेतोर्ऋग्वेदसंहितायाः सायणभाष्ययुताया १-२३ सूक्तानि पाठ्यांशत्वेन निर्धारितानि सन्ति।

**अन्तिमे पञ्चमे ङ प्रकरणे** सायणभाष्यसहितायाः ऋग्वेदसंहितायाः प्रथममण्डलान्तर्गतानि रुद्रोषः-सूर्य-शान्ति-विष्णु-अस्यवामीयादीनि निर्दिष्टानि प्रमुखसूक्तानि ऋषिच्छन्ददेवताविनियोगपूर्वकमर्थज्ञानाय पाठ्यत्वेन निर्धारितानि सन्ति।

एवं पञ्चसु प्रकरणेषु विभक्ता उपर्युक्तविषया ऋग्वेद-प्रातिशाख्यस्य प्रयोगपूर्वकज्ञानाय, ऋग्वेदसायणभाष्यस्यार्थावबोधाय च सहायकाः सन्ति। तस्मादस्य पाठ्यांशस्याध्ययनेनच्छात्राः पाठ्यक्रमे निर्धारितोद्देश्यपूर्तये क्षमा भविष्यन्ति।

## २. पाठ्यांशस्य सामान्योद्देश्यम्

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोङ्कितविषये प्रावीण्यमेष्यन्ति-

- वर्णानां संज्ञास्थानादिकथने
- ऋग्वेदीयपार्षदग्रन्थवाङ्मयस्य व्याख्याने
- शिक्षाव्याकरणोभयविषयसमन्वितस्य विषयस्य निरूपणे

- ऋग्वेद- पाठानुशासनविधिविवेचने
- ऋषिदेवताछन्दोविनियोगादियुतवेदार्थप्रकाशने च ।

**३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च**

| प्रकरणानि | विशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| **क** | स्वरवर्णस्थानोच्चारणसंहिता-वर्णपरिभाषाकथनम् वर्णसंज्ञा , वर्णानामुच्चारणस्थान-निदर्शनम् , ह्रस्वदीर्घप्लुतस्वरसन्धि-विवेकश्च | ऋक्प्रातिशाख्यस्य १,२ पटलगताः स्वरसंहितादिविषयाः | २० | ३२ |
| **ख** | स्वराः,उदात्तादयस्तेषां स्वरव्यञ्जनवर्णानाञ्च सन्धिविषय निरूपणम् । | ऋक्प्रातिशाख्यस्य ३-५ पटलगताः स्वरसन्ध्यादिविषयाः | २० | ३२ |
| **ग** | ध्वन्यागमाः, ह्रस्वस्य दीर्घभावापवाद- प्लुतिः, क्रमपाठश्चेति विषयविवेचनम् । | ऋक्प्रातिशाख्यस्यो-व्वटभाष्यस्य ६-१० पटलान्तर्गतानां ध्वन्यागमप्लुतिक्रम पाठादिविषयाः | २० | ३२ |
| **घ** | ऋग्वेदस्य सायणभाष्यस्य प्रथमद्वितीयाध्याययाः समागतानां (१-२३) सूक्तरथर्चाम् ऋषिच्छन्दोदेवताविनियोगपूर्वकविषयप्रकाशनम् । | ऋग्वेदस्य सायणभाष्यस्य प्रथमद्वितीयाध्याययोः समागतानाम (१-२३) सूक्तगतर्क्सम्बद्ध-विषयाः | २० | ३२ |
| **ङ** | सायणभाष्ययुतायाः ऋक्संहितायाः प्रथममण्डलान्तर्गतानां निर्धारित सूक्तगतनिर्दिष्टर्चाम् ऋषिच्छन्दोदेवताविनियोगपूर्वकमवबोधनम् । | सायणभाष्ययुतायाः ऋक्संहितायाः प्रथममण्डलान्तर्गत निर्धारितभागस्था-मृचाम् विनियोगादयो निर्धारिता विषयाः । | २० | ३२ |
| | | योगः | १०० | १६० |

## ४. पाठ्यवस्तुविवरणम्

**'क' प्रकरणे–**

उव्वटभाष्यभाष्यसहितस्य ऋक्प्रातिशाख्यस्य विष्णुमित्रकृतवृत्तिभूमिकासहितस्य १ , २ पटलगताः अधोङ्गितविषयाः – ग्रन्थकर्तुः परिचयः , शास्त्रावतारः , शास्त्रस्य सम्बन्धविषयः, मङ्गलाचरणम्, प्रयोजनञ्च निर्धारिताः सन्ति।

**प्रथमपटलगताः –** वर्णानां संज्ञा (१–२१ सूत्राणि) अनुस्वारव्यञ्जनयोर त्वविचारः (२२–२६ सूत्राणि) ह्रस्वादिस्वराणामुच्चारणकालः (२७–३०) स्वरभक्तेरुच्चारणकालः (३१–३५) वर्णानां स्थानानि (३८–५२) परिभाषा (५२–५७) पदान्तपदादिविषयाः (५८–६५ सूत्राणि ) प्रगृह्यसंज्ञा (६८–७७ सूत्राणि चेति विषयाः समाहिताः सन्ति )

**द्वितीयपटलगताः–** संहितास्वरूपादिविषयाः (१–४ सूत्राणि) सन्धिविषयिकी परिभाषा (५–७ सूत्राणि) स्वरव्यञ्जनसन्धिर्चा (८–२० सूत्राणि ) क्षैप्रादिसन्धयः( २१–४० सूत्राणि) प्रकृतिभावश्चेति (४१–६० सूत्राणि निर्धारिताः सन्ति )

**'ख' प्रकरणे–**

उव्वटभाष्ययुतस्यऋक्प्रातिशाख्यस्य ३–५ पटलेषु वर्णिता अधोङ्किताः प्रमुखविषयाः –

**तृतीये स्वरपटले** – स्वरसंख्या–उच्चारणप्रकारश्च (१–१० सूत्राणि), उदात्तादिस्वराणां सन्धिः ( ११–१७ सूत्राणि), स्वरोच्चारद्दोषाश्चेति विषयाः पाठ्यत्वेन निर्धारिताः सन्ति ( २९–३४)

**चतुर्थे सन्धिपटलगता** – अवशंगमादिसन्धीनां चर्चा (१–२० सूत्राणि विसर्जनीयसन्धिपरकविषयाः (२४–३२, ३६–४१ सूत्राणि) नकारविकारसम्बद्धसन्धयः (६५–७० सूत्राणि) शौद्धाक्षराः सन्धयः (८४–८९ सूत्राणि) पदान्ते आकारस्य अकारः (९० –९३ सूत्राणि चेति विषयाः पाठ्यत्वेन निर्धारिताः सन्ति )

**पञ्चमे नतिपटले** – नतिसन्धिविषयकविचाराः ( ११–२५ सूत्राणि ) च पाठ्यत्वेन निर्धारिताः

**'ग' प्रकरणे–**

उव्वटभाष्यभाष्यसहितस्य ऋक्प्रातिशाख्यस्य ६ –१० पटलेषु वर्णितेष्वधोङ्गिताः प्रमुखविषयाः–

**षष्ठे ध्वन्यागमपटले –** वर्णद्विर्वचनसम्बद्धविचारः (१–१६ सूत्राणि ) अभिनिधानम् (१७ –२४ सूत्राणि) ध्रुवोसंज्ञो नादः( ३९–४५) स्वरभक्तिश्च (४६ –५१ सूत्राणि )

**सप्तमे प्लुतिपटले–** सामवशसन्धिः (१–४ सूत्राणि) पदान्ते मक्षौ च ह्रस्वस्यदीर्घभावः(५–१७ सूत्राणि) पादादौ पदान्तह्रस्वस्य दीर्घभावश्च (३३ –४६ सूत्राणि )

**अष्टमे पटले** – अन्तःपादं पदान्तह्रस्वस्य दीर्घभावः( १–२५ सूत्राणि ) पादान्ते ह्रस्वस्यदीर्घभावः ( ४८–५० सूत्राणि )

**नवमे पटले** – पूर्वपदान्ते ह्रस्वस्य दीर्घभावः ( १–८ सूत्राणि ) अवग्रहरहितेषु पदेषु अन्तर्ह्रस्वस्य दीर्घभावः ( २५ –३४ सूत्राणि )

**दशमे क्रमपटले** –क्रमपाठसम्बद्धविषयाः ( १–६ सूत्राणि ) क्रमपाठे पदविशेषाणां परिग्रहः ( ७–११ सूत्राणि )

स्थितोपस्थितसंज्ञा ( १२-१४ ) चेति विषयाः
परिग्रहे सन्धिविशेषाणां प्रकृतिभावश्चेति ( २० – २२ सूत्राणि विषयाः )

**घ प्रकरणे–**

सायणभाष्ययुतायाः ऋग्वेदसंहितायाः प्रथमद्वितीयाध्याययोः समागतनां समेषां १–२३ सूक्तरथर्चां ऋषिच्छन्ददेवताविनियोगादिविषयाः। ।

**ङ प्रकरणे–**

सायणभाष्ययुतायाः ऋग्वेदसंहितायाः प्रथममण्डलान्तर्गतानामधोनिर्दिष्टर्चाम् ऋषिच्छन्दा्देवताविनियोग–निर्देशपूर्वका निर्धारितविषयाः।

**त्रिचत्वारिंशत्तमे सूक्ते–** कद्रुद्राय, यथानः, गाधपतिम्, यःशुक्रः, शं नः करत्यर्वते, अस्मे सोमः च

**पञ्चाशत्तमे सूक्ते** – उदुत्यम्, अदृश्रमस्य, येनापावक, उद्वयम्, उद्यन्नद्य च

**चतुःसप्ततितमे सूक्ते** – उपप्रयन्तः, उतब्रुवन्तु, यस्यदूतः, तमित्सुहव्यम्, नयोरुपब्दि च

**एकोननवतितमे सूक्ते** – आनो भद्राः, देवानां भद्रा, तान्पूर्वया, तन्नो वातः, तमीशानम्, स्वस्तिन इन्द्रः, पृषदश्वा, शतमिन्नु, भद्रं कर्णेभिः च

**नवनवतितमे सूक्ते** – जातवेदसे

**चर्तुदशैकशततमे सूक्ते** – इमारुद्राय, मृडानोरुद्रः, इदंपित्रे, मानोमहान्तम्, मानस्तोक(च

**पञ्चदशैकशततमे सूक्ते** – चित्रन्देवानाम्, सूर्योदेवीम्, तत्सूर्यस्य, तन्मित्रस्य, अद्यादेवाः च

**चतुर्विंशैकशततमे सूक्ते** – उषा उच्छन्ती, एषा दिवः, उपो अदर्शि, अभ्रातेव, आसांपूर्वासाम् , प्रबोधयोषः च

**चतुपञ्चाशदधिकैकशततमे सूक्ते**–विष्णोर्नुकम्, प्रतद्विष्णुः, तदस्यप्रियम्, ता वां वास्तूनि च

**चतुः षष्ठ्यधिकैकशततमे सूक्ते** – अस्य वामस्य, सप्त युञ्जन्ति, को ददर्श, अचिकित्वान्, मातापितरम्, द्वादशारम्, पञ्चारे चक्र( द्वाः सुपर्णा, यस्मिन् वृक्षे, अपश्यं गोपाम्, द्यौर्मेपिता, पृच्छामि त्वा, इयं वेदिः, ऋचोऽक्षरे, चत्वारिवाक्, इन्द्रं मित्रं वरुणम् , द्वादशप्रधयः, यज्ञेनयज्ञम् चेति

**५. शिक्षणविधयः शैक्षिकसामग्री च**

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते। सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनायाः प्राक्कल्पनादयश्छात्रकन्द्रिता विधयोऽपि प्रयोक्तुं शक्यन्ते। यथासम्भवं शिक्षकैः कलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः। विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः। तद्व्यवस्था सम्बद्धशिक्षकण विभागेन विद्यापीठेन वा विधेया। साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते। तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते। शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते। तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया।

## ६. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति – आन्तरिकं (निर्माणात्मकम्) बाह्यम् ( निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकरण विभागसमन्वितकार्य योजनायाम् आन्तरिक मूल्याङ्कनं विधीयते । गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशतमङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काःशतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां ने.सं.वि. परीक्षानियन्त्रण-कार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराः निर्धारिताः सन्ति साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति

**वार्षिक-परीक्षा-प्रश्नपत्रनिर्माण-सारणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| क,ख,ग,घ,ङ | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २ × १२ = २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६ ×७ = ४२ |
| | व्याख्यात्मकाः | ४ | ३ | ३ × ८ = २४ |
| | वस्तुगताः | १० | १० | १० ×१ = १० |
| | | २६ | २१ | १०० |

## ७. पाठ्यसूची

### क.पाठ्यग्रन्थौ

१.ऋग्वेदप्रातिशाख्यम् १-१० पटलान्तम्, उव्वटभाष्यसम्बलितम् अनुवाद परिष्कर्ता च डा. वीरेन्द्र कुमार वर्मा द्वितीय संस्करणम् १९८६ दिल्ली ।

२.पदपाठसंहिता ऋग्वेदसंहिता (सायणाचार्यकृतभाष्यसंबलिता) चौखम्बा विद्याभवन वाराणसीतः १९९१ खैष्टाब्दे प्रकाशिता, प्रथमसंस्करणम्, प्रथमद्वितीयभागौ ।

### ख . सहायकग्रन्थाः

१.ऋग्वेदप्रातिशाख्यम् उव्वटभाष्ययुतम्, वागीशशास्त्रिसम्पादितम् सं.सं.वि.वि. वाराणसीतः प्रकाशितम् ।

२.ऋग्वेदप्रातिशाख्य एक परिशीलन डा. वीरेन्द्र कुमार वर्मविरचितम्, वाराणसी १९७२ ।

३. ऋग्वेदसंहिता प्रथममण्डलान्ता, दयानन्दभाष्ययुता आर्यप्रकाशन, कुण्डेलवालन दिल्ली ।

४. ऋग्वेदसंहिता प्रथममण्डलान्ता, श्रीपादसातवलेकर हिन्दीभाष्ययुता ( ऋग्वेदका सुबोध भाष्य ) क्रै १९८५ स्वाध्यायमण्डल पारडी ।

**ग. सन्दर्भग्रन्थाः**

१.ऋक्तन्त्रम् (डा सूर्यकान्त सम्पादितम् १९७० क्रै दिल्ली )।

२.स्वरप्रक्रियाप्रकाशः, वामदेवमिश्रकृत १९९९ खै चौखम्बा-विद्याभवन , वाराणसी।

३.कौण्डिन्न्यायनशिक्षा शिवराजाचार्यकृता, स्वाध्यायशाला २०४९, काष्ठमण्डपम्।

४.ऋग्वेदसंहिता सरलहिन्दीभावार्थसहिता भाग १ सम्पा वेदमूर्तितपोनिष्ठ पं श्रीराम शर्मा आचार्यः प्रकाशक- युग निर्माण योजना विस्तार ट्रष्ट, गायत्री तपोभूमि, मथुरा, पुनरावृत्ति सन् २०११।

# विषयः — शुक्लयजुर्वेदः

पाठ्यांशनाम—**दर्शपूर्णमासेष्टि :**
स्तरः— शास्त्री
वर्षः- प्रथमः
पत्रम्— प्रथमम्

पाठ्यांशसङ्केतः— शु.वे. ३०१
पूर्णाङ्काः— १००
वार्षिकः पाठ्यभारः—१६० घण्टाः
साप्ताहिकः पाठ्यभारः— ६

**१. पाठ्यांशपरिचयः**

शास्त्रिकक्षायां प्रविश्य शुक्लयजुर्वेदं पिपठिषूणां छात्राणां कृतेऽयं पाठ्यांशो निर्धारितो वर्तते । अयं पाठ्यांशः पञ्चसु प्रकरणेषु विभक्तोऽस्ति । वेदस्य शुद्धस्योच्चारणस्य ज्ञानार्थं शिक्षानामकं प्रथमं वेदाङ्गमन्यस्मिन् पत्रे पाठ्यत्वेन निर्धारितमस्ति । अस्मिन् पत्रे वेदमन्त्रार्थज्ञानार्थं वेदप्रयोगज्ञानार्थं चाऽऽवश्यकाः पाठ्यांशा निर्धारिताः सन्ति ।

सामान्यतया वेदस्य मुख्यः प्रतिपाद्यो विषयो यज्ञोऽस्ति । अतो वेदाध्येतृभिर्वैदिकयज्ञानां ज्ञानमपि कर्तव्यं भवति । अत्र शुक्ल-यजुर्वेदमन्त्रसंहितायां कात्यायनश्रौतसूत्रे कातीयेष्टिदीपक( च प्रतिपादिता प्रकृतीष्टिरूपा दर्शपूर्णमासेष्टिः पाठ्यत्वेन समाविष्टा वर्तते ।

वेदमन्त्राणामर्थज्ञानं प्राचीनभाष्याधारेण करणीयमिति हेतोः शुक्लयजुर्वेदमन्त्रसंहितायाः प्रथमद्वितीयाध्यायौ महीधरभाष्यसहितौ पाठ्यांशत्वेन निर्धारितौ स्तः । दर्शपूर्णमासेष्टौ प्रयोज्यानां मन्त्राणां पाठने कल्पशास्त्रस्याऽपि सहैव पाठनमुचितमिति विचार्य कात्यायनश्रौतसूत्रस्य दर्शपूर्णमासेष्टिविधिबोधको भागः श्रौतकर्मसम्बद्धपरिभाषाविषयको भागश्चाऽत्र पाठ्यत्वेन समाविष्टो वर्तते । एवं च कल्पनामकं द्वितीयं वेदाङ्गमप्यत्र पाठ्यत्वेन समाविष्टो वर्तते । एवं च कल्पनामकं द्वितीयं वेदाङ्गमप्यत्र पाठ्यत्वेन समाविष्टमस्ति । तथैव दर्शपूर्णमासेष्टेः प्रयोगस्य ज्ञानार्थं तत्पद्धतिरपि पाठ्यांशत्वेन निर्धारिताऽस्ति । वैदिकयज्ञानां बोधाय तत्सम्बद्धानां पदानां पदार्थानां च ज्ञानमप्यावश्यकं भवति । तदर्थमत्र दर्शपूर्णमासेष्टिसम्बद्धाः श्रौतपदपदार्थाः पाठ्यत्वेन निर्धारिताःसन्ति ।

**२.पाठ्यांशस्य सामान्योद्देश्यानि**

अस्य पाठ्यांशस्याऽध्ययनेनच्छात्रा अधोलिखितेषु विषयेषु समर्था भविष्यन्ति—

- दर्शपूर्णमासेष्टि-पिण्डपितृयज्ञसम्बद्धानां शुक्लयजुर्वेदमन्त्राणामर्थनिरूपणे,
- श्रौतयज्ञसम्बद्धानां विविधानां पारिभाषिकविषयाणां विवेचने,
- दर्शपूर्णमासेष्टिसम्बद्धानामनुष्ठेयानां कर्मणामितिकर्तव्यताया वर्णने,
- दर्शपूर्णमासेष्टेः प्रयोगविधेर्वर्णने
- दर्शपूर्णमासेष्टिसम्बद्धानां श्रौतपदानां यज्ञपात्राणां व्याख्याने च ।

### ३.पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठ घण्टाः |
|---|---|---|---|---|
| क | सान्नाय्यवद्दर्शेष्टेः शाखाछेदन–वत्सापा–करण–गोदोहनादिकर्मसु, दर्शपूर्णमासेष्टेः व्रतग्रहणा–ऽपःप्रणयनादिकर्मसु, पिण्डपितृयज्ञे च प्रयोज्यानां मन्त्राणामर्थनिरूपणम्। | शुक्लयजुर्वेदमन्त्र–संहिताया महीधरभाष्यसहितयोः प्रथमद्वितीयाध्याययोः प्रतिपादिता विषयाः । | २५ | ४० |
| ख | यज्ञाधिकारि–यज्ञलक्षण–यज्ञपात्रस्वरूप–मन्त्रप्रयोगनियमादीनां विभिन्नानां श्रौतकर्म–सम्बद्धानां पारिभाषिकाणां पदानां विषयाणां च विवेचनम्। | कात्यायनश्रौतसूत्रस्य प्रथमाध्याये प्रतिपादिता विषयाः । | १५ | २४ |
| ग | उपवसथदिनविचाराऽग्न्यन्वाधानानुष्ठान–यजमाननियम–ब्रह्मवरणादि–सम्बद्धानां कात्यायनश्रौतसूत्र–सूत्राणामर्थापनम्। | कात्यायनश्रौतसूत्रस्य द्वितीय–तृतीयाध्याययोः प्रतिपादिता दर्शपूर्णमासेष्टिसम्बद्धा विषयाः । | ३० | ४८ |
| घ | दर्शपूर्णमासेष्टिपद्धतेः उपवसथदिनकृत्य–सङ्कल्पकरणा–ऽग्न्युद्धरणादीनां कृत्याना ( मिति–कर्तव्यताया निरूपणम् । | दर्शपूर्णमासेष्टिपद्धतेरिति कर्तव्यता । | १५ | २४ |
| ङ | यज्ञायुधम्, घृताची, जुहूः, योक्त्रम्, प्रस्तरः, उपसर्जन्यः, इडा इत्यादीनां श्रौतपदानामर्थप्रदर्शनम्। | निर्धारितानां श्रौतपदानामर्थाः। | १५ | २४ |

## ४. पाठ्यवस्तुविवरणम्

**‘क’प्रकरणे**

शाखाच्छेदनम्, वत्सापाकरणम्, शाखोपगूहनम्, उखाधिश्रयणम्, उखायां पवित्रस्थापनम्, गोदोहनम्, गोदोग्धारं प्रति अध्वर्योः प्रश्नः, दुग्धातञ्चनम्, उखापिधानम्, व्रतग्रहणम्, अपःप्रणयनम्, शूर्पाग्निहोत्रहवण्योः ग्रहणं प्रतपनं च, शकटधुरोऽभिमर्शनम्, ईषाभिमर्शनम्, शकटारोहणम्, हविःप्रेक्षणम्, अपद्रव्यनिरसनम्, हविरालम्भनम्, हविर्ग्रहणम्, हविश्शेषाभिमर्शनम्, शकटादवरोहणम्, हविस्सादनम्, पवित्रच्छेदनम्, हविषो यज्ञपात्राणां च प्रोक्षणम्, कृष्णाजिनस्याऽऽदानम् अवधूननम् आस्तरणं च, कृष्णाजिने उलूखलस्थापनम्, हविस्सम्पादनम्, शम्यया दृषदुपलाहननम्, उपवेषादानम्, कपालोपधानम्, कृष्णाजिनग्रहणम्, कृष्णाजिने दृषदुपलयोः स्थापनम्, तण्डुलपेषणम्, पिष्टसंयवनम्, आज्याधिश्रयणम्, पुरोडाशाधिश्रयणम्, पुरोडाशाभिमर्शनम्, पात्र्यङ्गुलीप्रक्षालनस्याऽऽप्तेभ्यो निनयनम्, स्फ्यादानम्, भूमौ स्फ्यप्रहारः, मृद्ग्रहणम्, वेदिप्रेक्षणम्, उत्करे मृत्क्षेपः, पूर्वपरिग्रहग्रहणम्, उत्तरपरिग्रहग्रहणम्, वेदिसम्मार्जनम्, स्रुवस्याऽऽदानं प्रतपनं च, स्रुचामादानं प्रतपनं च, पत्नीसन्नहनम्, आज्यस्य उद्वासनम् अवेक्षणम् उत्पवनं ग्रहणं चेत्यादिषु दर्शपूर्णमासेष्टेः कर्मसु प्रयोज्यानां मा.वा.शुक्लयजुर्वेदमन्त्रसंहितायाः प्रथमाध्याये स्थितानां सर्वेषां मन्त्राणां महीधरभाष्यानुसारेणार्थाः ।

इध्म-वेदि-बर्हिषां प्रोक्षणम्, प्रस्तरग्रहणम्, वेदिस्तरणम्, परिधिपरिधानम्, आहवनीये इध्मकाष्ठस्याऽऽधानम्, प्रस्तरस्तरणम्, जुहूपभृद्ध्रुवाणां सादनम्, हविःसादनाभिमर्शने, अग्निसम्मार्जनम्, जुहूपभृदादानम्, दक्षिणदिक्क्रमणम्, उत्तराघारहवनम्, समञ्जनम्, यजमानजपः, आग्नीध्रेण षडवत्तप्राशनम्, ब्रह्मणा प्राशित्रस्य ग्रहणं प्राशनं च, समिदाधानाय ब्रह्मणोऽनुज्ञा, समिदनुमन्त्रणम्, अग्निसम्मार्जनम्, व्यूहनम्, परिध्यञ्जनम्, प्रस्तरस्याऽऽदानमञ्जनं प्रहरणं च, आत्मालम्भः, परिध्यनुप्रहारः, जुहूपभृद्भ्यां संस्रवहोमः, जुहूपभृतोः शकटधुरि निधानम्, वेद्यालम्भः, स्रुक्स्रुवग्रहणम्, दक्षिणाग्नौ हवनम्, पत्नीकर्तृकवेदविमोकः, समिष्टयजुर्हवनम्, बर्हिर्हवनम्, प्रणीतानिनयनम्,कणप्रासनम्, पूर्णपात्रनिनयनम्, यजमानेन विष्णुक्रमक्रमणम्,यजमानेन स्वभागस्य भूम्याः प्राच्या आहवनीयस्य सूर्यस्य चाऽवलोकनम्,सूर्यप्रदक्षिणावर्तनम्, गार्हपत्योपस्थानम्, गार्हपत्यप्रदक्षिणावर्तनम्, व्रतविसर्जनम्, पिण्डपितृयज्ञश् चेत्यादिषु कर्मसु प्रयोज्यानां मा.वा.शुक्लयजुर्वेदसंहिताया द्वितीयाध्याये स्थितानां सर्वेषां मन्त्राणां महीधरभाष्यानुसारेणार्थाः ।

महीधरस्य परिचयः, महीधरभाष्यस्य वैशिष्ट्यं च ।

**'ख' प्रकरणे**

यज्ञाधिकारिणः,अवकीर्णिप्रायश्चित्तम्, यज्ञस्वरूपम्, आर्त्विज्याधिकारः, यागहोमलक्षणम्, नित्यकर्म-काम्यकर्मानुष्ठाननियमः, मन्त्रलक्षणम्, मन्त्रप्रयोगनियमाः, वेदबन्धनम्, यज्ञपात्रलक्षणानि,नित्यकाम्यकर्मणोः प्रतिनिधेर्विचारः, श्रुत्यादिक्रमनियमः,पदार्थानुसमयः, काण्डानुसमयः, अवत्तहविर्नाशे कर्तव्यम्, सत्राधिकारविचारः, तन्त्रविचारः, मन्त्रस्वरविचारः, हविर्निरूपणम्, हविरवदाननियमः, प्रैषाणां मन्त्रत्वम्, अपामुपस्पर्शनियमश्चेत्यादयः कात्यायनश्रौतसूत्रस्य प्रथमेऽध्याये प्रतिपादिताः सर्वे विषयाः ।

**'ग' प्रकरणे**

उपवसथदिनविचारः, अग्न्यन्वाधानम्, यजमाननियमाः, ब्रह्मवरणम्, ब्रह्मकर्मनिरूपणम्, अपःप्रणयनम्, अग्निपरिस्तरणम्, पात्रासादनम्, शूर्पाग्निहोत्रहवण्योः प्रतपनम्, शकटधुरोऽभिमर्शनम्, शकटदक्षिणचक्रारोहणम्, हविःप्रेक्षणम्, अपद्रव्यनिरसनम्, हविरालम्भनम्, हविर्ग्रहणम्, हविश्शेषाभिमर्शनम्, शकटादवरोहणम्, हविस्सादनम्, पवित्रच्छेदनम्, हविर्यज्ञपात्रप्रोक्षणम्, कृष्णाजिनादानम्, कृष्णाजिनावधूननम्, कृष्णाजिनास्तरणम्, कृष्णाजिने उलूखलस्थापनम्, हविष्कृदाह्वानम्, हविस्सम्पादनम्, हविषस्त्रिः फलीकरणम्,शम्यया दृषदुपलाहननम्, उपवेषादानम्, कपालोपधानम्, कृष्णाजिनग्रहणम्,कृष्णाजिने दृषदुपलयोः स्थापनम्, तण्डुलपेषणम्, पिष्टसंयवनम्, आज्याधिश्रयणम्, पुरोडाशाधिश्रयणम्, पुरोडाशाभिमर्शनम्, पात्र्यङ्गुलीप्रक्षालनस्याऽऽप्तेभ्यो निनयनम्, अन्वाहार्याधिश्रयणम्, वेदिखननप्रकारः, स्फ्यादानम्, भूमौ स्फ्यप्रहारः, मृद्ग्रहणम्, वेदिप्रेक्षणम्, उत्करे मृत्क्षेपः, पूर्वपरिग्रहग्रहणम्, उत्तरपरिग्रहग्रहणम्, वेदिसम्मार्जनम्, स्रुवस्याऽऽदानं प्रतपनं च, स्रुचामादानं प्रतपनं च, मुञ्जयोक्त्रेण पत्नीसन्नहनम्, आज्यस्य उद्वासनम् अवेक्षणम् उत्पवनं ग्रहणं च, इध्म-वेदि-बर्हिषां प्रोक्षणम्, प्रस्तरग्रहणम्, वेदिस्तरणम्, परिधिपरिधानम्, आहवनीये इध्मकाष्ठस्याऽऽधानम्, विधृत्योरुपरि प्रस्तरस्तरणम्, जुहूपभृद्ध्रुवाणां सादनम्, पुरोडाशयोरभिघारणम् अञ्जनम् आलम्भनं च,

सामिधेन्यनुवचनम्, समिदाधानम्, पूर्वाघारहवनम्, अग्निसम्मार्गः, जुहूपभृदादानम्, दक्षिणदिक्क्रमणम्, उत्तराघारहवनम्, समञ्जनम्, आर्षेयवरणम्, प्रयाजानुष्ठानम्, प्रयाजानुमन्त्रणम्, आज्यभागौ, प्रधानयागाः, स्विष्टकृद्यागः, प्राशित्रावदानादिकम्, इडावदानादिकम्, इडाह्वानादिकम्, पुरोडाशचतुर्धाकरणम्, इडादिभक्षणम्, अन्वाहार्योद्वासनम्, अनुयाजानु-ष्ठानम्, स्रुग्व्यूहनम्, सूक्तवाक-शंयुवाकपाठादिकम्, परिध्यनुप्रहारः, संस्रवहोमः, पत्नीसंयाजः, दक्षिणाग्नौ होमः, पत्नीकर्तृकवेदयोक्त्रविमोकः, समिष्ट्यजुर्हवनम्, बर्हिर्हवनम्, प्रणीतानिनयनम्,

कणप्रासनम्, पूर्णपात्रनिनयनम्, यजमानकर्तृकविष्णुक्रमक्रमणम्,यजमानेन स्वभागस्य भूम्याः प्राच्या आहवनीयस्य सूर्यस्य चाऽवलोकनम्,सूर्यप्रदक्षिणावर्तनम्, गार्हपत्योपस्थानम्, गार्हपत्यप्रदक्षिणावर्तनम्, आशीःप्रार्थना, आहवनीयोप-स्थानम्, व्रतविसर्गः, पिण्डपितृयज्ञश्चेत्यादयः कात्यायनश्रौतसूत्रस्य द्वितीयतृतीयाध्याययोः प्रतिपादिताः सर्वे विषयाः ।

कात्यायनस्य परिचयः, कात्यायनश्रौतसूत्रस्य वैशिष्ट्यं च ।

**'घ' प्रकरणे**

उपवसथदिनकृत्यम्, सङ्कल्पवाक्यम्, पञ्चभूसंस्काराः, अग्न्युद्धरणम्, अग्न्यन्वाधानम्, व्रतग्रहणम्, यजमाननियमाः, ब्रह्मवरणम्, प्रणीताप्रणयनम्, अग्निपरिस्तरणम्, पात्रासादनम्, शूर्पाग्निहोत्रहवण्योर्ग्रहणं प्रतपनं च, हविर्ग्रहणम्, हविस्सादनम्, पवित्रच्छेदनम्, हविर्यज्ञपात्रप्रोक्षणम्, कृष्णाजिनादानम्, कृष्णाजिनावधूननम्, कृष्णाजिनास्तरणम्, कृष्णाजिने उलूखलस्थापनम्, हविष्कृदाह्वानम्, वाग्विसर्गः, हविःकण्डनम्, कपालोपधानम्, कृष्णाजिनग्रहणम्, कृष्णाजिने दृषदुपलयोः स्थापनम्, तण्डुलपेषणम्, पिष्टसंयवनम्, आज्याधिश्रयणम्, पुरोडाशश्रपणम्, पात्र्यङ्गुलीप्रक्षालनस्याऽऽप्तेभ्यो निनयनम्, अन्वाहार्याधिश्रयणम्, वेदिमानम्, स्फ्यादानम्, भूमौ स्फ्यप्रहारः, मृद्ग्रहणम्, वेदेः प्रहरणदेशस्य प्रेक्षणम्, उत्करे मृत्क्षेपः, पूर्वपरिग्रहग्रहणम्, वेदिखननम्, उत्तरपरिग्रहग्रहणम्, वेदिसम्मार्जनम्, स्रुवस्याऽऽदानं प्रतपनं च,स्रुचामादानं प्रतपनं च, मुञ्जयोक्त्रेण पत्नीसन्नहनम्, आज्योद्वासनम्, पत्न्याऽऽज्यावेक्षणम्, इध्म-वेदि-बर्हिषां प्रोक्षणम्,प्रस्तरग्रहणम्, वेदिस्तरणम्, परिधिपरिधानम्, आहवनीये इध्मकाष्ठस्याऽऽधानम्, विधृत्योरुपरि प्रस्तरस्तरणम्, जुहूपभृद्ध्रुवाणां सादनम्, पुरोडाशयोरभिघारणम् अञ्जनम् आलम्भनं च,

सामिधेन्यनुवचनम्, समिदाधानम्, पूर्वाघारहोमः, अग्निसम्मार्गः, जुहूपभृदादानम्, दक्षिणदिक्क्रमणम्, उत्तराघारहोमः, समञ्जनम्, आर्षेयवरणम्, पञ्चानां प्रयाजानामनुष्ठानमनुमन्त्रणं च, आग्नेयसौम्याज्य-भागौ, आग्नेयाष्टाकपालपुरोडाशयागादयस्त्रयः प्रधानयागाः, स्विष्टकृद्यागः, प्राशित्रावदानादिकम्, इडावदानादिकम्, इडाह्वानादिकम्, पुरोडाश-चतुर्धाकरणम्, चतुर्धाकरणभाग-षडवत्तभागेडाभागभक्षणादिकम्, अन्वाहार्योद्वासनम्, अनुयाजानुष्ठानम्, स्रुग्व्यूहनम्, सूक्तवाक-शंयुवाकपाठादिकम्, परिध्यनुप्रहारः, संस्रवहोमः, पत्नीसंयाजः, दक्षिणाग्नौ होमः, पत्नीकर्तृकवेदयोक्त्रविमोकः,समिष्टयजुर्होमः, बर्हिर्होमः, प्रणीता-निनयनम्,कणप्रासनम्, पूर्णपात्रनिनयनम्, यजमानकर्तृकविष्णुक्रम-क्रमणम्, यजमानेन स्वभागस्य भूम्याः प्राच्या आहवनीयस्य सूर्यस्य चाऽवलोकनम्, सूर्यप्रदक्षिणावर्तनम्, गार्हपत्योपस्थानम्, गार्हपत्यप्रदक्षिणा-वर्तनम्, आशीःप्रार्थना, आहवनीयोपस्थानम्,

व्रतविसर्गः, ब्राह्मणतर्पण-सङ्कल्पः, सान्नाय्यवद्दर्शेष्टेः विशेषकर्माणि, पिण्डपितृयज्ञश्चेत्यादयो दर्शपूर्णमासेष्टिपद्धतेः सर्वे विषयाः ।

**'ङ'प्रकरणे**

यज्ञायुधम्, शूर्पः, अग्निहोत्रहवणी, स्रुवा, स्रुक्, घृताची, जुहूः, उपभृत्, ध्रुवा, दर्विः, षडवत्तधानी, प्राशित्रहरणम्, स्फ्यः, कपालम्, शम्या, कूर्चः, शृतावदानम्, मेक्षणम्, चरुमेक्षणम्, आज्यविलापनी, धृष्टिः, उपवेषः, अभ्रिः, अन्तर्धानकटः, योक्त्रम्, प्रस्तरः, बर्हिः, वेदः, इध्मः, परिधयः, भुवपतिः, यूनम्, विधृती, ब्रह्मौदनः, वरः, गार्हपत्यः, आहवनीयः, दक्षिणाग्निः, वैतानिकाग्नयः, सभ्यः, ग्रामाग्निः, तनूहवींषि, उपसर्जन्यः, पुरोडाशः, दक्षिणा, भूयसी, आहिताग्निः, पर्याधाता, अग्निहोत्रम्, अग्निहोत्री, विहरणम्, निरूहणम्, अवज्योतनम्, उन्नयनम्, उदिङ्गनम्, समारोपणम्, उपावरोहणम्, वीरोज्झः, वीरहा, अन्वारम्भणीया इष्टिः, पूर्णमासः, दर्शः, उपवासः, उपवसथः, अन्वाधानम्, व्रतोपायनीयम्, पात्रासादनम्, अवधूननम्, आवपनम्, अवहननम्, निष्पवनम्, परापवनम्, फलीकरणम्, कणाः, पेषणम्, प्रोहणम्,कपालोपधानम्, संयवनम्, आप्त्याः, स्तम्बयजुः, प्रतिपत्तिक्रिया, अन्वाहार्यः, प्रणवम्, पुरीषम्, अवनेजनम्, उपस्तरणम्, अभिघारणम्, प्रत्यञ्जनम्, अवदानम्, अवत्तम्, अनुज्ञा, प्रैषः, सामिधेन्यः, धाय्या, आघारः, समञ्जनम्, आश्रावणम्, प्रत्याश्रावणम्, प्रयाजाः, अनुवाक्या, पुरोरुक्, याज्या, वौषट्, निगदाः, निवित्, स्विष्टकृत्, ध्रुवाप्यायनम्, इडा, अनूयाजाः, व्यूहनम्, सूक्तवाकः, शंयुवाकः, पत्नीसंयाजः, समिष्टयजुर्होमः, प्रणीताविमोचनम्, पूर्णपात्रनिनयनम्, विष्णुक्रमाः, ब्राह्मणतर्पणम्, संस्था, कव्यम्, निपरणम्, कव्यवाहनः, प्राणभक्षः, पिण्डपितृयज्ञः, यवागूः, आतञ्चनम्, सान्नाय्यं चेति वेदभाषानिघण्टोर्ब्रह्मवर्गे (२७९तमश्लोकात् ३७० तमश्लोकपर्यन्तं) निरूपितानां श्रौतपदानामर्थाः ।

**५.शिक्षणविधिः**

अस्य पाठ्यांशस्य शिक्षणे यथासम्भवं निगमना-ऽऽगमन-प्रवचन-विमर्श-व्याख्यान-प्रश्नोत्तराद्या विभिन्नाः पद्धतयोऽवलम्बनीयाः । सति सम्भवे शिक्षणक्रमे छात्राः स्वयमेव यथा विशेषतो व्यापृता भवन्ति तथा प्रेरणीयाः । छात्रा यथासम्भवमन्वेषणेऽपि प्रचोदनीयाः । मन्त्राणां सूत्राणां श्लोकानां च कण्ठस्थीकरणमपि तदर्थबोधप्रयोगाद्यर्थं लाभप्रदमिति छात्राः मन्त्रसूत्रश्लोक-कण्ठस्थीकरणाय उत्प्रेरणीयाः । विषयानुसारेण प्रसङ्गानुसारेण च समुचितानां श्रव्यदृश्यसामग्रीणामपि प्रयोगः कर्तुं शक्यते । आवश्यकतानुसारेण कदाचिद् दूरशिक्षणविधिरपि अवलम्बनीयो भवति । अतस्तदनुकूलतया पाठयोजनाऽपि निर्मेया, प्रविध्युपयोगश्च विधेयः । एतदर्थं विश्वविद्यालयेन विद्यापीठेन च साहाय्यं कार्यम् ।

## ६.मूल्याङ्कनविधिः

मूल्याङ्कनविधिर्द्विविधोऽवलम्ब्यते– आन्तरिकः (निर्माणात्मकः), बाह्यः (निर्णयात्मकः) चेति । आन्तरिक-मूल्याङ्कनं मुख्यरूपेण कक्षागतमेव भवति । तत्रोपस्थितिः, छात्राणामाचरणम्, कक्षाकार्यम्, गृहकार्यम्, कक्षापरीक्षा, चेत्यादीनामाधारेण विभागस्याऽपि समन्वयेनाऽऽन्तरिकं मूल्याङ्कनं विधीयते । विंशतिः प्रतिशतमङ्का आन्तरिकमूल्याङ्कनस्य कृते निर्धारिताः सन्ति ।बाह्यमूल्याङ्कनस्य कृते शतस्य पूर्णाङ्कानां लिखितपरीक्षा भवति । परीक्षाफलप्रकाशने आन्तरिकमूल्याङ्कनस्याऽङ्कानां समायोजनं भवति । बाह्यपरीक्षार्थं प्रश्नपत्रनिर्माणमधोनिर्दिष्टप्रकारेण भवति–

**वार्षिकपरीक्षाप्रश्नपत्रनिर्माणसारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्र व्याः | समाधेयाः | |
| क, ख, ग, घ | विवेचनात्मकाः | ३ | २ | २४ |
| क, ख, ग, घ, ङ | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| क, ख, ग, घ | व्याख्यात्मकाः | ४ | ३ | २४ |
| क, ख, ग, घ ङ | वस्तुगताः | १० | १० | १० |
| | योगः | २६ | २१ | १०० |

## ७. पाठ्यसामग्रीसूची

**(क) पाठ्यग्रन्थाः**

१.**वाजसनेयि – माध्यन्दिन – शुक्लयजुर्वेदसंहिता,** पदपाठयुता, उवटकृतमन्त्रभाष्य-महीधरकृतवेददीपभाष्य-संवलिता, चौखम्बा-विद्याभवनम्, वाराणसी, २००७ क्रै. ।

२.**कात्यायनश्रौतसूत्रम्,** विद्याधरशर्मगौडविरचितया सरलाख्यया वृत्त्या सहितम्, काशी (वाराणसी), १९८७ वै.; (पुनर्मुद्रकम् चौखम्बा-संस्कृत-प्रतिष्ठानम्, दिल्ली, १९९० क्रै.) ।

३.**देवयाज्ञिकपद्धतिः** (कात्यायनश्रौतसूत्र-देवयाज्ञिकपद्धतिः), सम्पा. विद्याधरशर्मा, चौखम्बा-संस्कृत-सिरिज-अफिस, वाराणसी, १९३३-१९३६क्रै., पुनर्मु. २००४ क्रै. ।

**ख) सहायकग्रन्थाः**

१.**मा.वा.शुक्लयजुर्वेदसंहिता,** उवट-महीधर-भाष्यद्वयसमेता, सम्पा. वासुदेवशर्मा पणशीकरः, निर्णय- सागरमुद्रणालयः, १९१२क्रै.; पुनर्मु. सम्पा.जगदीशलालशास्त्री, मोतीलाल-बनारसीदासः, दिल्ली, १९७१ क्रै. ।

३.**कात्यायनश्रौतसूत्रम्,** कर्कभाष्यसहितम् (प्रथमो भागः), सम्पा. पट्टाभिरामशास्त्री, लालबहादुरशास्त्रि-कन्द्रीय-संस्कृत-विद्यापीठम्, नूतनदिल्ली, १९८२ क्रै. ।

**४.कातीयेष्टिदीपकः,** नित्यानन्द-पन्त-पर्वतीयः, चौखम्बा-संस्कृत-सिरिज-अफिस, वाराणसी, द्वि.सं. १९७३ क्रै. ।

**५.श्रौतपदार्थनिर्वचनम्,** विश्वनाथ-शास्त्री, एच. एन. बागची, वाराणसी, १९१९ क्रै., पृथिवी-प्रकाशनम्, वाराणसी, १९८७ क्रै. ।

**६.वेदभाषानिघण्टुः** (ब्रह्मवर्गः), शिवराज आचार्यः कौण्डिन्न्यायनः, स्वाध्यायशाला, काष्ठमण्डपनगरम्, २०५० वै. ।

**ग) सन्दर्भग्रन्थाः**

**१.यजुर्वेदभाष्यम्** (माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदसंहिताभाष्यम्), विवरणसहितम्, भाष्यकारः दयानन्द-सरस्वती, विवरणकारः ब्रह्मदत्तजिज्ञासुः, रामलाल-कपूर-ट्रष्ट, सोनीपत-हरयाणा, प्रथमो भागः, तृ.सं. १९८४ क्रै. ।

**२.शुक्लयजुर्वेद-माध्यन्दिनसंहिता,** वेदार्थपारिजाताख्यभाष्येण समन्विता, स्वामिकरपात्रः ( तृतीय-चतुर्थभागौ), श्रीराधाकृष्णधानुकाप्रकाशन-संस्थानम्, वृन्दावनम्, २०४३, २०४६ वै. ।

**३.यजुर्वेद** (माध्यन्दिनीय-वाजसनेयि-शुक्लयजुर्वेदसंहिता), पदपाठयुता, सङ्क्षेपीकृत-महीधरभाष्यसमेता, नेपालीभावार्थयुता, सुदर्शन-जोशी, गुडविल-प्रकाशकः, काष्ठमण्डपनगरम्, २०७४ वै. ।

**४.शुक्लयजुर्वेद** (नेपाली अनुवाद), राधारमण उपाध्याय, ऋषिराम पोखरेल, नेपाल प्रज्ञा प्रतिष्ठान, काठमाडौँ, २०७२ वै. ।

**५.शुक्लयजुर्वेदसंहिता** (नेपाली भाष्य), मोदनाथ शास्त्री, भुँडीपुराण प्रकाशन, काठमाडौँ, २०७६ माघ।

**६.वैदिक धर्म मूल रूपमा,** शिवराज आचार्य कौण्डिन्न्यायन, स्वाध्यायशाला, काठमाण्डु, द्वि.सं. २०६२ वै. ।

**७.Yajñāyudhāni (यज्ञायुधानि)**(An Album of Sacrificial Utensials, with Descriptive Notes), T.N.Dharmadhikari, Vaidika Samśodhana Mandala, Pune,1989.

## विषयः — शुक्लयजुर्वेदः

पाठ्यांशनाम—**सपार्षदं शिक्षाशास्त्रम्**
स्तरः— शास्त्री
खण्डः— प्रथमः
पत्रम्—द्वितीयम्

पाठ्यांशसङ्केतः— शु.वे. ३०२
पूर्णाङ्काः— १००
वार्षिकःपाठ्यभारः—१६० घण्टाः
साप्ताहिकः पाठ्यभारः— ६

### १. पाठ्यांशपरिचयः

शास्त्रिकक्षायां प्रविश्य शुक्लयजुर्वेदं पिपठिषूणां छात्राणां कृतेऽयं पाठ्यांशो निर्धारितो वर्तते । अयं पाठ्यांशः षट्सु प्रकरणेषु विभक्तोऽस्ति । वेदस्य शुद्धतयोच्चारणार्थमर्थबोधार्थं प्रयोगज्ञानार्थं च वेदाङ्गानामप्यध्ययनमावश्यकं भवति । वेदाङ्गेषु च शिक्षा प्राथम्यं भजत इति हेतोः शिक्षाशास्त्रस्य पाठ्यांशः प्रथमखण्ड एव शिक्षयितुमुचितो भवति ।

अस्मिन् पाठ्यांशेऽध्ययनीयतया मुख्यरूपेण शुक्लयजुर्वेदप्रातिशाख्यस्य आपञ्चमाध्यायात् प्रतिपादिताः सर्वे विषया निर्धारिताः सन्ति ।

वेदवर्णोच्चारणसम्बद्धानां कतिपयाना विषयाणां विवेचना-त्मकमध्ययनमपि पाठ्यत्वेनाऽत्र समाविष्टं वर्तते । तथैव कौण्डिन्न्यायनशिक्षायां प्रतिपादिताः शिक्षापरिभाषा-शिक्षाप्रयोजनादयः कतिपये महत्त्वपूर्णा आधारभूताः शिक्षाशास्त्रीया विषया अपि पाठ्यत्वेनाऽत्र निर्धारिताः सन्ति । अत्र शिक्षाशास्त्रसम्बद्धानि कतिपयानि विशिष्टानि सुभाषितान्यपि समाविष्टानि सन्ति ।

### २.पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याऽध्ययनेनच्छात्रा अधोलिखितेषु विषयेषु निपुणा भविष्यन्ति—

- शुक्लयजुर्वेदप्रातिशाख्ये प्रतिपादितस्य स्वरसंस्कारनियमस्य वर्णने,
- शुक्लयजुर्वेद उपलब्धानां विशिष्टानां वर्णानां विवेचने,
- शिक्षापरिभाषा-शिक्षाप्रयोजन-शिक्षककर्तव्यादिशिक्षाशास्त्रविषयाणां व्याख्याने,
- शिक्षाशास्त्रविषयकाणां कतिपयानां विशिष्टानां सुभाषितानां व्याख्याने च ।

### ३.पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | वर्णोत्पत्तिप्रक्रियायाः, संज्ञा-परिभाषाणाम्, वर्णस्थानकरणानाम्, | शुक्लयजुर्वेदप्रातिशाख्यस्य प्रथम-द्वितीयाध्याययोर्विषयाः । | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | उदात्तानुदात्तस्वरितस्वराणाम्, पदस्वराणां च व्यख्यानम् । | | | |
| ख | विसर्जनीय-नकार-मकारविकाराणाम्,षत्वणत्व-दीर्घत्वानाम्, स्वर-व्यञ्जनसन्धीनाम्, व्यञ्जन-द्वित्वस्य, पदपाठ-क्रमपाठ-नियमानां च निरूपणम् । | शुक्लयजुर्वेदप्रातिशाख्यस्य तृतीय-चतुर्थाध्यायोर्विषयाः । | ३० | ४८ |
| ग | अवग्रहस्वरूपव्याख्यानम्, शुक्लयजुर्वेदप्रातिशाख्ये प्रतिपादितानां पाठ्यक्रमे समाविष्टानामन्येषां कतिपयानां विषयाणां विवेचनम् च । | शुक्लयजुर्वेदप्रातिशाख्यस्य पञ्चमाध्यायस्य विषयाः, पाठ्यांशसम्बद्धा अन्ये विषयाश्च । | २० | ३२ |
| घ | शुक्लयजुर्वेदस्य यकार-रकार-वकारादिवर्ण-विशेषाणां स्वरूपस्य विवेचनम् । | कातीय-प्रतिज्ञासूत्रे तद्व्याख्याने च प्रतिपादिता विवेचिताश्च विषयाः । | १० | १६ |
| ङ | शिक्षाशास्त्रसम्बद्धानां शिक्षापरिभाषा, शिक्षा-प्रयोजनम् इत्यादीनां विषयाणां विश्लेषणम् । | शिक्षापरिभाषा-शिक्षाप्रयोजनादयः विषयाः । | १० | १६ |
| च | शिक्षाशास्त्रविषयकाणां पाठ्यत्वेन निर्दिष्टानां सुभाषितानामर्थप्रकाशनम् । | शिक्षाशास्त्रसम्बद्धानि निर्दिष्टानि सुभाषितानि । | १० | १६ |

**४. पाठ्यवस्तुविवरणम्**

**'क'प्रकरणे**

स्वरसंस्कारनिरूपणप्रतिज्ञा, वर्णोत्पत्तिप्रक्रिया, ओङ्काराऽथकारयोः प्रयोगः, वेदाध्ययनविधिः, संज्ञाः, परिभाषाः, मात्रानिरूपणम्, वर्ण-स्थानकरणनिर्देशः, अक्षरविचारः, पूर्वाङ्गतापराङ्गताविचारः, उदात्तानुदात्तस्वरितस्वराः, जात्यादयः स्वरितभेदाः, संहिताजन्य-विकारादिलक्षणानि चेत्यादयः शुक्लयजुर्वेद-प्रातिशाख्यस्य प्रथमे-ऽध्याये प्रतिपादिताः सर्वे विषयाः ।

तथैव पदस्वरपरिभाषा, सर्वानुदात्तानि पदानि, आद्युदात्तानि पदानि, द्व्युदात्तानि पदानि, त्र्युदात्तानि पदानि, सर्वोदात्तानि पदानि, अन्तोदात्तानि पदानि चेत्यादयःशुक्लयजुर्वेदप्रातिशाख्यस्य द्वितीयेऽध्याये प्रतिपादिताः सर्वे विषयाश्च ।

**'ख'प्रकरणे**

विसर्जनीयविकाराः, षत्व-णत्व-दीर्घत्व-नकारविकाराश्चेत्यादयः शुक्लयजुर्वेद-प्रातिशाख्यस्य तृतीयेऽध्याये प्रतिपादिताः सर्वे संहिता-विधयः ।

मकार-नकारविकाराः, पदपाठनियमाः, विसर्जनीयविकाराः, स्वरसन्धयः, प्रकृतिभावाः, व्यञ्जनसन्धयः, व्यञ्जनद्वित्वम्, व्यञ्जन-द्वित्वापवादः, यमपरिभाषा, सङ्क्रमनियमाः, क्रमपाठनियमाः, स्थितो-पस्थितनियमाश्चेत्यादयः शुक्लयजुर्वेद-प्रातिशाख्यस्य चतुर्थेऽध्याये प्रतिपादिताः सर्वे विषयाश्च ।

**'ग'प्रकरणे**

अवग्रहस्य परिभाषा,अवग्रहस्य विधयो निषेधाश्चेति शुक्लयजुर्वेद-प्रातिशाख्यस्य पञ्चमेऽध्याये प्रतिपादिताः सर्वे विषयाः ।

प्राति-शाख्यस्य लक्षणम्, प्रयोजनम्, उपलभ्यमानानां प्रातिशाख्यानां विवरणम्, शुक्लयजुर्वेदप्रातिशाख्यस्य परिचयश्च । शुक्लयजुर्वेद-प्रातिशाख्यस्य व्याख्याकाराणां व्याख्यानां च परिचयः समीक्षणं च । शुक्लयजुर्वेदे दन्त्यसकारस्य द्वित्वं भवति न वेति विवेचनम् । शुक्लयजुर्वेदे प्रयुक्तस्य 'पाष्ण्‍र्या' इति पदे कतमस्य वर्णस्य द्वित्वं भवतीतिनिरूपणम् । यमवर्णस्य स्वरूपं कीदृशं तल्लेखनप्रकारश्च कीदृश इति विवेचनञ्च ।

**'घ'प्रकरणे**

शुक्लयजुर्वेदे षकारस्य कुत्र खकारत्वेनोच्चारणं भवति कुत्र च षकारत्वेनैवोच्चारणं भवतीति निरूपणम् । शुक्लयजुर्वेदे यकारस्य कुत्र जकारत्वेनोच्चारणं भवति कुत्र च यकारत्वेनैवोच्चारणं भवतीति समीक्षणम् ।वकारस्य भेदानां निरूपणम्, सुस्पृष्टस्य वकारस्य उच्चारणे लेखने च कीदृशं वैशिष्ट्यं भवतीति विवेचनं च ।स्वरभक्तेः स्वरूपम्, तस्या भेदाः, रेफऋकारयोर्मध्ये स्वरभक्तेरस्तित्वं वर्तते न वा चेति विषयाणां निरूपणम् । भाषिकस्वरस्य परिचयश्च ।

**'ङ'प्रकरणे**

**अधस्तनानां शिक्षाशास्त्रीयविषयाणामध्ययनम् -**

| | |
|---|---|
| शिक्षापरिभाषा | (तैत्तिरीयोपनिषदि १।२।१, अन्यत्र च) |
| शिक्षाप्रयोजनम् | (पाणिनीयशिक्षायाम् श्लो. ५२, नारदीयशिक्षायाम् १।१।५, वर्णरत्नप्रदीपिकायां शिक्षायाम् श्लो. ४-८, अन्यत्र च) |
| शिक्षकप्रशंसा | (नारदीयशिक्षायाम् १।६।१७, माण्डूकीयशिक्षायाम्, श्लो. ३४- ३५, अन्यत्र च) |
| शिक्षककर्तव्यम् | (अमोघानन्दिन्यां शिक्षायाम् श्लो. १२१, अन्यत्र च) |
| शिक्षाविद्यारहितस्य निन्दा | (वर्णरत्नप्रदीपिकायां शिक्षायाम् श्लो. ९, अन्यत्र च) |

शिष्यगुणाः (मनुस्मृतौ २।११४-११५, संहितोपनिषद्ब्राह्मणे ३।११-२०, अन्यत्र च)
लक्ष्यलक्षणज्ञानमाहात्म्यम् (अमोघानन्दिन्यां शिक्षायाम् श्लो. १२३-१२५, कौण्डिन्यशिक्षायाम् श्लो. ९४-९६, अन्यत्र च)
विद्यादाननियमाः (मनुस्मृतौ २।१०९, निरुक्ते २।३-४, अन्यत्र च)
साङ्गवेदाध्ययनमाहात्म्यम् (पाणिनीयशिक्षायाम् श्लो. ४१-४२, अन्यत्र च)
वेदतत्त्वज्ञानमाहात्म्यम् (पाराशर्यां शिक्षायाम् श्लो. १४७-१५१, अन्यत्र च)

**'च'प्रकरणे**

**अधोनिर्दिष्टानां शिक्षासम्बद्धानां सुभाषितानां कण्ठस्थीकरणम् अर्थज्ञानं च—**

श्लोकप्रतीकानिस्थलनिर्देशाः

आचार्योपासनात् ... (माण्डूकीयशिक्षायाम्, श्लोकक्रमः १७७)
आलस्यान् मूर्खसंयोगात् ... ( ,, ,, १७८)
पदेनैकस्त मेधावी ... ( ,, ,, १७२)
येषां तीर्थागता विद्या ... ( ,, ,, १६१)
आगमैरधिकाः कश्चित्... ( ,, ,, १५८)
येषां च न ग्रहणशक्तिः ... ( ,, ,, १६८)
ऊर्ध्वं सहस्रादाम्नानम् .... ( ,, ,, १६९)
द्यूतंपुस्तकवाच्यं च .... (नारदीयशिक्षायाम् २।८।३०)
न शठाः प्राप्नुयुः .... ( ,, २।८।२६)
पञ्च विद्यां न गृह्णन्ति ....(याज्ञवल्क्यशिक्षायाम् २।५।९९, नारदीयशिक्षायाम् २।८।१४)
गुरुशुश्रूषया विद्या ..... ( ,, २।५।११२, ,, २।८।२९)
शुश्रूषारहिता विद्या ... (,, २।५।१११, ,, २।८।२८)
अञ्जनस्य क्षयं दृष्ट्वा ... ( ,, २।५।१०७,,, २।८।२०)
अहेरिव गणाद् भीतः .... (,, २।५।१००,,,२।८।२५, माण्डूकीयशि., श्लो. १६४)
गुणिता शतशो विद्या ... ( ,, २।५।१०३, ,, ,, १६५)
शतेन गुणिताऽऽयाति ... ( ,, २।५।१०४, ,, ,, १६६)
जलमभ्यासयोगेन ... ( ,, २।५।१०५, ,, ,, १७५)
यथा खनन् खनित्रेण .... ( ,, २।५।११०, मनुस्मृतौ २।२१८)
सुखार्थी चेत् त्यजेद् .... ( ,, २।५।१०२)
यथा खरश्चन्दनभारवाही ... ( पाराशर्यां शिक्षायाम्, श्लो. १५०)
यद् दुस्तरं यद् दुरापम् ... ( मनुस्मृतौ ११।२३८)
वशे कृत्वेन्द्रियग्रामम् .... ( ,, २।१०४)
नाऽपृष्टः कस्यचिद् ब्रूयात् ... ( ,, २।११०)
शुश्रूषा श्रवणं चैव .... (कामन्दकीयनीतिसारे ४।२१)
प्रज्ञा विवेकं लभते .... (वाक्यपदीये २।४८४)

आचार्यात् पादमादत्ते ....  (हरदत्तकृते आपस्तम्बधर्मसूत्रव्याख्याने १।२।४।२९)
व्याख्यानशक्तिमिह ...  (संहितासारवाङ्मय्याम् )
भवेन् न वा यद्यपि.....  (काव्यादर्शे १।१०४)
साध्यं हि सर्वम् ....  (पद्यमालायाम्, पृ. २, श्लो. ५)
जले तैलं खले गुह्यम् ...  (चाणक्यनीतिदर्पणे १४।५)
शिलष्टा क्रिया कस्यचित् ....  (मालविकाग्निमित्रे १।१६)
(एतानि सुभाषितानि पाणिनीयशिक्षायाः परिशिष्टे सङ्कलितानि सन्ति ।)

**५.शिक्षणविधिः**

अस्य पाठ्यांशस्य शिक्षणे यथासम्भवं निगमना-ऽऽगमन-प्रवचन-विमर्श-व्याख्यान-प्रश्नोत्तराद्या विभिन्नाः पद्धतयोऽवलम्बनीयाः । सति सम्भवे शिक्षणक्रमे छात्राः स्वयमेव यथा विशेषतो व्यापृता भवन्ति तथा प्रेरणीयाः । छात्रा यथासम्भवमन्वेषणेऽपि प्रचोदनीयाः । सूत्राणां श्लोकानां च कण्ठस्थीकरणमपि तदर्थबोधप्रयोगाद्यर्थं लाभप्रदमिति छात्राः सूत्रश्लोककण्ठस्थी-करणायोत्प्रेरणीयाः । विषयानुसारेण प्रसङ्गानुसारेण च समुचितानां श्रव्यदृश्यसामग्रीणामपि प्रयोगः कर्तुं शक्यते ।आवश्यकतानुसारेण कदाचिद् दूरशिक्षणविधिरप्यवलम्बनीयः । अतस्तदनुकूलतया पाठयोजनाऽपि निर्मेया, प्रविध्युपयोगश्च विधेयः । एतदर्थं विश्वविद्यालयेन विद्यापीठेन च साहाय्यं कार्यम् ।

**६.मूल्याङ्कनविधिः**

मूल्याङ्कनविधिर्द्विविधोऽवलम्ब्यते— आन्तरिकः(निर्माणात्मकः), बाह्यः (निर्णयात्मकः) चेति । आन्तरिक-मूल्याङ्कनं मुख्यरूपेण कक्षागतमेव भवति । तत्रोपस्थितिः, छात्राणामाचरणम्, कक्षाकार्यम्, गृहकार्यम्, कक्षापरीक्षा चेत्यादीनामाधारेण विभागस्याऽपि समन्वयेनाऽऽन्तरिकं मूल्याङ्कनं विधीयते । विंशतिः प्रतिशतमङ्का आन्तरिकमूल्याङ्कनस्य कृते निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य कृते शतस्य पूर्णाङ्कानां लिखितपरीक्षा भवति । परीक्षाफलप्रकाशने आन्तरिकमूल्याङ्कनस्याऽङ्कानां समायोजनं भवति । बाह्यपरीक्षार्थं प्रश्नपत्रनिर्माणमधोनिर्दिष्टप्रकारेण भवति —

**वार्षिक-परीक्षा-प्रश्नपत्रनिर्माणसारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क, ख, ग, | विवेचनात्मकाः | ३ | २ | २४ |
| क, ख, ग, ङ, च | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| क, ख, ग, घ | व्याख्यात्मकाः | ४ | ३ | २४ |
| क, ख, ग, घ, ङ, च | वस्तुगताः | १० | १० | १० |
| | योगः | २६ | २१ | १०० |

## ७. पाठ्यसामग्रीसूची

**(क) पाठ्यग्रन्थाः**


**१.शुक्लयजुर्वेदप्रातिशाख्यम्,** उवटाऽनन्तभाष्यद्वयेन सहितम्, सम्पा. वीरेन्द्रकुमारवर्मा, ज्ञानप्रकाश- प्रतिष्ठानम्, वाराणसी, १९७५ क्रै. ङ्कपुनर्मुद्रकम् चौखम्बा-संस्कृत-प्रतिष्ठानम्, दिल्ली, १९८७ क्रै.) ।

**२.कातीय-प्रतिज्ञासूत्रम्,** संस्कृतव्याख्यया, भूमिकया च सहितम्, आमोदवर्धनः कौण्डिन्न्यायनः, भुँडीपुराणप्रकाशनम्, काष्ठमण्डपनगरम्, द्वितीयं संस्करणम्, २०७५ वै. ।

**३.पाणिनीयशिक्षा,** संस्कृतव्याख्यया, भूमिकया, विविधैः परिशिष्टैश्च सहिता, शिवराज आचार्यः कौण्डिन्न्यायनः, चौखम्बा-विद्याभवनम्, वाराणसी, द्वि.सं.२००८ क्रै. ।


**ख) सहायकग्रन्थाः**


**१.शुक्लयजुःप्रातिशाख्यम्,** उवटभाष्यसहितम्, सम्पा. युगलकिशोरङ्कव्यास) पाठकः, काशी, १८८३- १८८८ क्रै. ।

**२.शुक्लयजुर्वेदप्रातिशाख्यम्,** उव्वटभाष्यसहितम्, सम्पा. जीवानन्दविद्या-सागरभट्टाचार्यः, कलिकाता, द्वि.सं. १८९३ क्रै. ।

**३.शुक्लयजुर्वेदप्रातिशाख्यम्,** उवटा-ऽनन्तभाष्यद्वयसहितम्, सम्पा. वी. वेङ्कटरामशर्मा, मद्रास-वि.वि., मद्रासनगरम्, १९३४ क्रै. ।

**४.शुक्लयजुर्वेदप्रातिशाख्यम्,** ज्योत्स्नया वृत्त्या युतम् **ङ्ककातीयशुक्लयजुः प्रातिशाख्यस्य श्रीरामशर्मणाप्रणीता ज्योत्स्नावृत्तिः),** सम्पा. युगलकिशोरमिश्रः, सं.सं.वि.वि., वाराणसी, १९८९ क्रै. ।

**५.प्रतिज्ञासूत्रम्,** अनन्तदेवयाज्ञिककृतभाष्यसहितम्, शुक्लयजुः प्रातिशाख्यपरिशिष्टे मुद्रितम्, सम्पा. युगल-किशोर(व्यास) पाठकः, काशी (वाराणसी), १८८३-१८८८ क्रै. ।

**६.प्रतिज्ञासूत्रम्,** नित्यानन्दपर्वतीयकृतव्याख्यासहितम्, हरिस्वामिसायण-भाष्यसहितस्य शतपथब्राह्मणस्य पञ्चमे खण्डे मुद्रितम्, मुम्बयी, १९४० क्रै. (पुनर्मु. नाग प्रकाशकः, दिल्ली, १९९० क्रै.) ।

**७.प्रतिज्ञासूत्रम्,** रामशर्मकृतवृत्तिसहितम्, शुक्लयजुर्वेदप्रातिशाख्यस्य ज्योत्स्नया वृत्त्या युते ग्रन्थे मुद्रितम्, सम्पा. युगलकिशोरमिश्रः, सं.सं.वि. वि., वाराणसी १९८९ क्रै. ।

**८.कौण्डिन्न्यायनशिक्षा,** रचयिता व्याख्याकारश्च शिवराज आचार्यः कौण्डिन्न्यायनः, स्वाद्ध्यायशाला, काष्ठमण्डपनगरम्, नेपालदेशः, २०४९ वै. ।

**९.याज्ञवल्क्यशिक्षा,** शिक्षावल्ल्याख्यया विवृत्या सहिता, अमरनाथशास्त्री दीक्षितः, काशी (प्र.सं.१९९४ वै.) २०१९ वै. ।

**१०.नारदीयशिक्षा,** शिक्षाविवेचन्याख्यया संस्कृतव्याख्यया, नारायण्याख्यया हिन्दीव्याख्यया, विविधैः परिशिष्टैश्च सहिता, शिवराज आचार्यः कौण्डिन्न्यायनः, चौखम्बा-विद्याभवनम्, वाराणसी, २००२ क्रै.।

**११.अथर्ववेदीया माण्डूकीशिक्षा,** सम्पा. भगवद्दत्तः, लाहौरनगरम्, १९२१ क्रै., पुनर्मु. दिल्ली, १९८१ क्रै. ।

**१२.शिक्षासङ्ग्रहः,** सम्पा. युगलकिशोरङ्कव्यास)पाठकः, वाराणसी, १८८९-१८९३ क्रै., द्वि.सं. (पुनर्मु.) सम्पा. रामप्रसादत्रिपाठी, सं.सं.वि.वि., वाराणसी, १९८९ क्रै. ।

**१३.'शुक्लयजुर्वेदमन्त्रसंहितायां दन्त्यसकारस्य द्वित्वस्य विचारः',** आमोदवर्धनः कौण्डिन्न्यायनः, ऋतम्भरा (अनुसन्धानात्मिका पत्रिका) -११, अनुसन्धानकर्(द्रम्, नेपाल-संस्कृत-विश्वविद्यालयः,२०६२ वै. ।

**१४.'यमवर्णानां स्वरूपं सङ्ख्या लेखनप्रकारश्च',** आमोदवर्धनः कौण्डिन्न्यायनः, ऋतम्भरा (अनुसन्धानात्मिका पत्रिका)-१५, अनुसन्धानकर्(द्रम्, नेपाल-संस्कृत-विश्वविद्यालयः, २०६९ वै. ।

**ग) सन्दर्भग्रन्थाः**

**१. अष्टाध्यायी-शुक्लयजुर्वेदप्रातिशाख्ययोः मतविमर्शः,** विजयपालः, सोनीपत-हरयाणा, २०४० वै. ।

**२. वाजसनेय-प्रातिशाख्य : एक परिशीलन,** युगलकिशोरमिश्रः, सं.सं.वि.वि., वाराणसी, १९९७ क्रै. ।

३. **Critical Studies on Kātyāyana's Śuklayajurvedaprātiśākhya,** by V.Venkatarama Sharma, University of Madras, 1935 (Reprinted : Yaska, Delhi, 1989.

# विषयः — सामवेदः

पाठ्यांशनामः **ब्राह्मणकल्पाध्ययनम्**
स्तरः शास्त्री
वर्षः प्रथमः
पत्रम्– प्रथमम्

पाठ्यांशसङ्केतः **साम.३०१**
पूर्णाङ्काः १००
वार्षिकःपाठ्यभारः १६० घण्टाः
साप्ताहिकः पाठ्यभारः ६

**१. पाठ्यांशपरिचयः**

चतुर्षु वेदेषु गीतिप्रधानः सामवेदः। सहस्रवर्त्मा सामवेदः इति निश्चितेऽपि कालवशाद् अद्यत्वे कौथुम-राणायनीय-जैमिनिशाखाः पठनपाठनसरण्यां विलोक्यन्ते। स्थानभेदाद् दक्षिणोत्तरभारतवर्षकारणादेतासां शाखानां द्रविडनागरगोवर्द्धनीनाम्न्य उच्चारणपद्धतयः प्रसिद्धाः सन्ति। पाठ्यांशेऽस्मिन् देशभेदेन कौथुमशाखायाः वेदाङ्गकल्पान्तर्गतं गोभिलगृह्यसूत्रमाधृत्योत्तरीया संस्कारपद्धतिरवलम्बितास्ति। दाक्षिणात्याः पद्धतिश्च द्राह्यायणगृह्यसूत्रमाधृत्य प्रचलति। सामवेदमवलम्व्य माध्यमिककक्षोत्तीर्णानां शास्त्रिस्तरेऽध्येतुकामानां छात्राणाङ्कृते पाठ्यांशोऽयं निर्धारितः। सार्थं स्वशाखाध्ययनमिति नियमः, ततश्च चतुर्णामेव वेदानामध्ययनमिति हेतोः पाठ्यांशोऽयं स्वशाखीयेषु शाखान्तरीयेष्वपि प्रवर्तते। ज्ञानमूलकत्वाद् विश्वस्थानां समेषां जनानां वेदाध्ययनाभिरुचिः साम्प्रतं वर्द्धमाना विद्यते। सम्प्रदायप्राप्तशाखाध्येतृणां ज्ञानपिपासूनां कृते चायं पाठ्यांश उपकारको भवेदिति धियात्र वैदिकसंस्काराणां परिचयः सरलतयोपस्थापितो वर्तते।

पाठ्यांशोऽयं षट्सु प्रकरणेषु विभक्तोऽस्ति। सामवेदकौथुमशाखाध्ययनं कृतवतां विद्यार्थिनां कृते ब्राह्मणकल्पाऽवबोधाय पाठ्यांशोऽयं निर्धारितः। अत्र कप्रकरणे प्रथमं ब्राह्मणग्रन्थाध्ययनं, तत्प्रतिपाद्यः स्वरश्छान्दोग्यब्राह्मणपरिचयश्चेत्येते विषयाः समाहिताः सन्ति। खप्रकरणे विषयबहुलस्य छान्दोग्य (मन्त्र) ब्राह्मणस्य विवाह-गर्भाधान-सीमन्तोन्नयन-पुंसवन-जातकर्मसंस्कारसम्बद्धब्राह्मणमन्त्रार्थविषयाः शिक्ष्यन्ते। गप्रकरणे नामकरण-चूडोपनयन-समावर्तनसंस्कारसम्बद्धब्राह्मणमन्त्रार्था निरूपिताः सन्ति। खगप्रकरणपठितमन्त्रार्थसम्बद्धप्राकरणिकशब्दार्थशिक्षणं गुणविष्णुभाष्यस्थ-श्रुत्यादिवाक्यतात्पर्यसमन्वयशिक्षणञ्च घप्रकरणगता विषयाः सन्ति। ङप्रकरणे सामवेदीयगोभिलगृह्यसूत्र-सुबोधिनीपद्धत्योः पारस्करगृह्यसूत्रस्य चाधारेण गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-चूडोपनयन-समावर्तन-विवाहसंस्काराः पाठ्यत्वेन निर्धारिताः सन्ति। तदत्र यथाशक्यं संस्काराणां परिपुष्ट्यै गृह्यपरिशिष्टवाक्यानां संकलश्च विहितोऽस्ति। चप्रकरणे अग्न्याधान-पञ्चमहायज्ञोपाकर्मादयो विषयाः प्रस्तुताः सन्ति। तदेवमत्र प्रथमपत्रे वैदिकवाङ्मयप्रविविक्षूणाङ्कृते ब्राह्मणकल्पाधारेण वैदिकसंस्कारगत-प्रयोगप्रवचननिपुणताभिवृद्धये पाठ्यांशा निर्धारिताः सन्ति।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोलिखितविषयेषु प्रावीण्यमेष्यन्ति–

- मन्त्रब्राह्मणान्तर्गताविवाहादिसंस्कारसम्बद्धब्राह्मणार्थप्रकाशने
- मन्त्रब्राह्मणगतपारिभाषिकार्थप्रबोधने
- मन्त्रब्राह्मणभाष्यस्थश्रुत्यादिवाक्यतात्पर्यप्रस्तुतौ
- विवाहादिसंस्काराणां बोधाचरणप्रवचनेषु
- अग्न्याधानपर्वकपञ्चमहायज्ञपरिचयप्रदाने
- सामवेदीय–शुक्लयजुर्वेदीयसंस्काराणां तुलनात्मकविवेक(प्रवचने च

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्याविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठाः |
|---|---|---|---|---|
| क | १.ब्राह्मण–स्वरप्रतिपाद्य–विषयाणामवबोधनम् २.सामब्राह्मणछान्दोग्योपनिषद्विषयप्रख्यापनम् | १ निर्धारिता ब्राह्मण–स्वर–प्रतिपाद्यविषयाः २. निर्धारिताः सामब्राह्मणछान्दोग्योपनिषद–विषयाश्च | १० | २० |
| ख | ऋषिच्छन्दोदेवताविनियोग ज्ञानपूर्वकं छान्दोग्यमन्त्रब्राह्मणस्य विवाह–गर्भाधान–पुंसवन–सीमन्तोन्नयन–जातकर्मसंबद्धमन्त्रार्थ–व्याख्यानम् | ऋषिच्छन्दोदेवताविनियोग सहिता–श्छान्दोग्यमन्त्रब्राह्मणस्य विवाह–गर्भाधान–पुंसवन–सीमन्तोन्नयन–जातकर्मसंबद्धा निर्धारितमन्त्रार्थाः | १५ | २५ |
| ग | ऋषिच्छन्दोदेवताविनियोग ज्ञानपूर्वकं छान्दोग्यमन्त्रब्राह्मणस्य नामकरण–चूडोपनयन–समावर्तनसंस्कारसम्बद्ध–मन्त्रार्थनिरूपणम् | ऋषिच्छन्दोदेवताविनियोग–ज्ञानपूर्वकं छान्दोग्यमन्त्रब्राह्मणस्य नामकरण–चूडोपनयन–समावर्तनसंस्कारसम्बद्धा निर्धारितामन्त्रार्थविषयाः: | १५ | ३० |
| घ | मन्त्रार्थसम्बद्धपारिभाषिक शब्दार्थव्युत्पादनम्, | निर्धारिता मन्त्रार्थसम्बद्धा शब्दार्थाः, | १५ | २५ |

| | | | | |
|---|---|---|---|---|
| | गुणविष्णुभाष्यस्थश्रुत्यादि वाक्यतात्पर्यस्य समायोजनम् । | गुणविष्णुभाष्यस्थश्रुत्या-दिवाक्यतात्पर्य समायोजनसम्बद्धा विषयाः | | |
| ङ | गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-चूडोपनयन-समावर्तन-विवाहसंस्कारनिरूपणम् | गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म-नामकरण-चूडोपनयन-समावर्तन-विवाहसंस्कार-सम्बद्धा निर्धारिता विषयाः | ३० | ५५ |
| च | १.अग्न्याधान-पञ्चमहायज्ञविधानम् २.उपवीति-उपाकर्म-वेदाध्ययनप्रयोगनिर्धारणं वाग्व्यवहरणञ्च | १.अग्न्याधान-पञ्चमहायज्ञाः २.उपवीति-उपाकर्म-वेदाध्ययनप्रयोगः, वाग्व्यवहरणसम्बद्धा निर्धारिता विषयाश्च | १५ | २५ |

**४. पाठ्यवस्तुविवरणम्**

**'क' प्रकरणे**

छान्दोग्यब्राह्मणाध्ययनसम्बद्धा अधस्तनविषयाः -

१.वेदः (संहिता-ब्राह्मण-आरण्यक-उपनिषदः) २.ब्राह्मणप्रतिपाद्यम्, ३.ब्राह्मणस्वरः, ४.छान्दोग्यब्राह्मणम्, ५.तद्भागद्वयम्, ६.मन्त्रविद्याशब्दव्युत्पत्तिः, ७.तत्सहपाठरहस्यम्, ८.अर्थज्ञानप्रशंसा तदज्ञाननिन्दा च, ९.ऋषिच्छन्दोदेवताविनियोगज्ञानम् १०.गुणविष्णुपरिचयः, ११. तद्भाष्यम्, १२.सायणपरिचयः, १३.सामवेदार्थप्रकाशः, १४.सम्पादककृतटिप्पणीबोधः ।

**'ख' प्रकरणे**

**विवाहादिसंस्कारसंबद्धमन्त्रार्थाः** -

ऋषिच्छन्दोदेवताविनियोगज्ञानपूर्वकं छान्दोग्यमन्त्रब्राह्मणस्य (१ प्रपाठ-कस्य ५ खण्ड) पर्यन्तानां संस्कारसम्बद्धानाम् अधस्तनतमन्त्राणां गुण-विष्णुभाष्यम् -

| विषयः | मन्त्रः | विशेषविषयः | मन्त्रसङ्केतः |
|---|---|---|---|
| १.पर्युक्षणम् (अभिषेक)-देवसवितः प्रसुव, | | एकज्योतीरूपा आदित्यादिस्तुतिः | (१.१.१), |
| २. सुराप्लवनम्- | काम वेद तेनाम | | (१.१.२), |
| ३. उपस्थप्लावनम्- | इमं त उपस्थम् | | (१.१.३), |
| ४.शरीरप्लावनम्- | अग्निं क्रव्यादमकृण्वन् | | (१.१.४), |
| ५.वस्त्रपरिधानम्- | या अकृन्तन्नवयन् | | (१.१.५), |

परिधत्त धत्त (१.१.६),
६.कन्यादानप्रसङ्गः- सोमोऽददत् (१.१.७),
७.आज्यहोमः- माते गृहेषु (१.१.१३),
८.अश्मारोहणम्- इममश्मानम् (१.२.१),
९.लाजहोमः- इयं नार्युपब्रूते (१.२.२),
अर्यमणं नु देवम् (१.२.३),
कन्यला पितृभ्यः (१.२.५),
१० विष्णुपादाक्रमणम्- एकमिषे विष्णुः (१.२.६-१२),
(सप्तपदी)
११.आशंसनम्- सखा सप्तपदी (१.२.१३),
१२.विवाहेक्षकजनप्रतिमन्त्रणम् सुमङ्गलीरियम् (सिन्दूरार्पणम्) (१.२.१४),
समञ्जन्तु विश्वे (१.२.१५),
१३.पाणिग्रहणम्- गृभ्णामि ते (१.२.१६),
सम्राज्ञी श्वसुरे भव (१.२.२०),
मम व्रते ते (पतिः, एकादशः, देवाज्ञाविवेचना)(१.२.२१),
१४.हृदयैक्यप्रार्थना-यदेतद्धृदयम् (प्राणमन्नस्य एकविंशतिबन्धनोक्तिः)(१.३.१०),
१५.रथारोहणम्- सुकिंशुकं शल्मलिविशेषभावार्थोद्भावनम् (१.३.११),
१६.गृहप्रवेशः- इहगावः (१.३.१३),
१७.चतुर्थीहोमः- अग्नि-वायु-चन्द्र-सूर्यमन्त्राः (१.४.१-५),
१८.**गर्भाधानम्-** विष्णुर्योनिम्, गर्भं धेहि, (१.४.६-७)
**१९.पुंसवनम्-** पुमांसौ, पुमानग्निः (१.४.८-९)
२०.**सीमन्तोन्नयनम्-** लअयमूर्जावतः (हरितयुग्मोदुम्बरावलम्बनम्)(१.५.१)
२१.सीमन्तोन्नयनम् येनादितेः सीमानम् शरेण (१.५.२)
२२.सीमन्तोन्नयनम् राकामहम् सुहवाम् चूर्णचात्रेण (१.५.३)
२३.सीमन्तोन्नयनम् यास्ते राक( मेध्यशलाकया (१.५.४)
२४.जातकर्म- इयमाज्ञेदमन्नमिद.(ब्रीहियवचूर्ण-सर्पिःप्राशनम्)(१.५.८),
मेधान्ते (१.५.९)
२५.चन्द्रदर्शनम् यत्ते सुसीमे (१.५.१०)

**'ग' प्रकरणे**

**नामकरणादिमन्त्रार्थाः**

ऋषिच्छन्दोदेवताविनियोगज्ञानपूर्वकं छान्दोग्यमन्त्रब्राह्मणस्य (१.५ तः२.१) पर्यन्तानां संस्कारसम्बद्धानां निम्नाङ्कितमन्त्राणां गुणविष्णुभाष्याध्ययनम्।

**विषयाः** **मन्त्राः** **विशिष्टविषयाः** **मन्त्रसंकतः**
**१.नामकरणम्-** कोऽसि कतमः (१.५.१४)

| | | | |
|---|---|---|---|
| | सत्वाह्नने | (दिनादिकालज्ञानम्) | (१.५.१५) |
| | अङ्गादङ्गाद् (२) अश्मा भव (उपमा-उपमेयार्थप्रकाशः), | | (१.५.१६-१८) |
| | पशूनां त्वा | | (१.५.१९) |
| **२.चूडाकरणम्-** | आयमगात् | | (१.६.१-८) |
| **३. उपनयनम्** | अग्ने व्रतपते | | (१.६.९) |
| | आगन्ता | आचार्यजपः | (१.६.१४) |
| | अरिष्टे हस्तम् | माणवकहस्तग्रहणम् | (१.६.१५) |
| | प्राणानां ग्रन्थिः | नाभ्यभिमर्शनम् (विशेषभावार्थः) | (१.६.२१), |
| | समिधम् | अनुशासनशिक्षा | (१.६.२७) |
| | इयं दुरुक्तम् | आचार्यवाचनम् | (१.६.२८), |
| | तस्य गोप्त्री | | (१.६.२९), |
| | तत्सवितुः | सावित्र्युपदेशः | (१.६.३०), |
| | सुश्रवसः | दण्डार्पणम् (विशेषभावार्थः) | (१.६.३२), |
| | अग्नये समिधम् | अस्तमिते (सूर्ये) समिदाधानम् | (१.६.३३), |
| **४.समावर्तनम्,** | ये अप्स्वन्तरग्नयः | अभिषेकः (अष्टौ अग्नयः) | (१.७.१), |
| | यो रोचनः | | (१.७.३), |
| | यशसे | | (१.७.४), |
| | येन स्त्रियम् | (भैषज्यविचारः) | (१.७.५), |
| | उद्यन् | सूर्योपस्थानम् | (१.७.६), |
| | चक्षुरसि | | (१.७.९), |
| | उदुत्तमं वरुण | मेखलामोक्षणम् (शुनःशेपप्रसङ्गः) | (१.७.१०) |
| | यक्षमिह | आचार्यपरिषद्वीक्षणम् | (१.७.१४), |
| | ओष्ठापिधाना | मुखपिधानम् | (१.७.१५), |
| | वनस्पते | रथारोहणम | (१.७.१६), |
| | मानस्तोक( | वाचनम् | (२.१.७), |
| | ये चत्वारः पथयः | आज्यहोमः | (२.१.१०), |
| | ग्रीष्मः | (ऋतुज्ञानम्) | (२.१.११) |

**'घ' प्रकरणे**

**(१) पारिभाषिकशब्दाः-**

छान्दोग्यमन्त्रब्राह्मणस्य (१.०त-२.१) पर्यन्तानां संस्कारसम्बद्धानां परिगणित-मन्त्रगुणविष्णुभाष्यस्थशब्दार्थज्ञानम्-

अदितिः, अनुमतिः, सरस्वती (१.१.१), गन्धर्वः, वाचस्पतिः (१.१.१), सुरा (१.१.२), अवयन् (१.१.५), जीवपत्नी (१.१.१३), एधन्ताम् (१.२.२), मायोष्ठ्याः (१.२.१३), सौभाग्यम् (१.२.१४), सुकिंशुकम् (१.३.११), सहस्रदक्षिणः (१.३. १३), नाथकामः (१.४.१), ऊर्जी (१.५.१), जरदष्टिम् (१.५.२), राका (१.५.३), सहस्रपोषणम्, रराणा (

१.५.४), पुष्करस्रजौ (१.५.९), आहस्पत्यम् (१.५.१४), दंष्ट्रः(१.६.४), स्वधितिः (१.६.६), जीवातवे (१.६.७), त्र्यायुषम् (१.६.८), ऋध्यासम् (१.६.९), कामचारवादभक्षः (१.६.९ गुणभाष्ये), अरिष्टाः (१.६.१४) अह्रुरिः(१.६.२२), पुनती (१.६.२८) भर्गः (१.६.३०), सुश्रवः (१.६.३२), अदब्धः, तनूपाः (१.६.३५), दशसनिः(१.७.६)

**(२) श्रुत्यादिवाक्याध्ययनम्**

छान्दोग्यमन्त्रब्राह्मणस्य १.० तः २.१ पर्यन्तानां संस्कारसम्बद्ध-परिगणितमन्त्राणां गुणविष्णुभाष्यस्थश्रुत्यादिवाक्यतात्पर्यज्ञानम्-

(१.१.१) यज्ञपतिरितिब्राह्मणे (श.ब्रा.४.२.२.१०), मुखतो हि प्रजा असृजत् ( तैतिरीयब्रा.२.२.९.८)

(१.१.३) त्वष्टा वै रेतः सिक्तं विकरोति (शाङ्खायनब्रा.३.९, श.ब्रा.१.९.२.१०), तस्मात् सुरोत्तमा ह्यापो. गृह्यासंग्रहवाक्यम् (२.४१), (१.५.१४-१५) पञ्चमं नामकरणम् ( गौ.ध.सू.८.१३), (१.५.१४-१५) दशरात्रे व्युष्टे पिता नाम करोति (गो.गृ. २.८.८)

(१.१.३) शतायुर्वै पुरुषः (ऐतरेयब्राह्मणम् २.१७ )

(१.५.३) या पूर्वा पौर्णमासी (ऐतरेयब्रा.७. ११ ब्रा.(२ अध्याय), षड्विंशब्रा.(५.६ खण्डः ४ ब्रा.). गोपथब्रा. २ खण्ड, १.१०)

गौर्वाहीकवद् गौणप्रयोगः (१.५.१७ गुणभाष्ये)

(१.६.१०-१३) व्रतपतिः (इन्द्रः) तस्मात् सर्वव्रतान्तेषु चरुरैन्द्रो विधीयते (गृह्यासंग्रह २.४५) ।

त्वं (मम) मित्रः असि (१.६.१५ लिङ्गव्यत्ययः)

अहं ब्रह्मचर्यम् आगाम्, माम् उपनयस्व (१.६.१६) को नामासि, असौ नामास्मि (१.६.१७-१८)

एतदुक्तं भवति- तव समर्पित एषः (१.६.२१ गुणभाष्ये)

(१.६.२८) मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने (मनुः २. १६९-१७०)

इवेन विनापि इवार्थं गमयन्ति (१.६.२८ गुणभाष्ये)

उदिते हि भगवति (१.६.३० गुणभाष्ये)

एतदुक्तं भवति- त्रैलोक्यात्मानम् (१.६.३१, गुणभाष्ये)

गोह्रयादयोऽग्नयः (१.७.१ टिप्पण्याम्)

आदित्यो यूपः (१.७.१३ गुणभाष्ये) तैतिरीयब्रा. २.१.५.२

(२.१.१०) त्रयो धर्मस्कन्धाः (छान्दोग्योपनिषद् २.२३.१)

**'ङ' प्रकरणे**

गोभिलगृह्यसूत्र-सुबोधिनीपद्धति-पारस्करगृह्यसूत्राधारेण गर्भाधानादि-संस्काराणां तुलनात्मकमध्ययनम्-संस्काराणां वेदमूलकता, गोभिलप्रवृत्तिः (गृह्यासंग्रहे २.९४) गृह्यकर्म, गृह्याग्निः, सामान्यनियमाः (गोभिलगृह्यसूत्रे १.१.१-६),

**विषयाः** **सुबोधिनीपद्धतिः** **गोभिलगृह्यसूत्राणि** **पारस्करगृह्यसूत्राणि**

१.विवाहः कालः (पृ.१६५) पुण्ये (२.१.१) विवाहः(उदगयने १.४.५.-७)
अग्न्युपसमाधानम् (उपलिप्त.१ ४ ३-४)
कन्यापरीक्षणम् (पृ.१६५) लक्षणप्रशस्तान् (२.१.२-८)
" वाग्दानम् (पृ.१६५) अग्न्युपसमाधानम् (उपलिप्त १.४.३-४)
" कन्यास्नपनम् (पृ.१६८)क्लीतकैः (२.१.१०)विवाहः (उदगयने १.४.५-१०)(ज्ञातिकर्म)
" कन्यादानम् (पृ.१७८) वासःपरिधापनम् (अहतेन २.१.१८-१९) अथैनां वासः (
१.४.११-१२)
" विवाहहोमः (पृ.१८६) दक्षिणेन (२.१.२४) अथैनौ (१.४.१६)
" अश्माक्रमणम् (पृ.१८७) हुत्वोपो.(२.२.१-४) अथैनाम् (१.७.१)
" लाजपरिचयः शमीपलाश (२.१.१५) कुमार्या (१.६.१)
" लाजहोमः (पृ.१८८)सकृत् (२.२.५-१०)गह्यसंग्रहे(२.२९-३४) ता जुहोति (१.६.२,
१.७.४-५,)
" सप्तपदाक्रमणम् (पृ.१९१) शूर्पेण (२.२.११-१३) अथैनाम् ( १.८.१-२)
" आशंसनम् (पृ.१९१) पद्धतिकारविधिः(२.२.१३)
" ईक्षकजनप्रतिमन्त्रणम् (पृ.१९२) ईक्षकान् (२.२.१४) अथैनाम् (१.८.९)
" (वरकर्तृकं सिन्दूरार्पणम्) अथैनौ समीक्षयति (१.४.१६)
## ७ पाठ्यसूची

**क) पाठ्यग्रन्थाः**

१.**ऋग्वेदभाष्यभूमिकासंग्रहान्तर्गते, ऋग्वेदभाष्यभूमिका, अथर्ववेदभाष्य–भूमिका** च (सं. आचार्यो बलदेव उपाध्यायः, चौखम्भा संस्कृत संस्थान, वाराणसी, वि.सं. २०४२ ।

२.**ऋग्वेदादिभाष्यभूमिका**–स्वामी दयानन्दसरस्वती, सम्पा. युधिष्ठिर मीमांसक, रामलाल कपूर ट्रष्ट, सोनीपत (हरियाणा), वि.सं. २०५९ ।

३.**अथर्ववेदीय-बृहत्सर्वानुक्रमणिका** (विश्वबन्धुसम्पादिता)-विश्वेश्वरानन्द संस्थानम्, होशिआरपुरम्, वि.सं. २०२२।
४.**अथर्ववेदसंहिता-शौनकीया** (सायणभाष्ययुता १-२ काण्डान्ता) -सम्पा. विश्वबन्धुः, विश्वेश्वरानन्दवैदिक-शोधसंस्थानम्, होशिआरपुरम् १९६०-१९६४ सन्।

**ख) सहायकग्रन्थाः**

१. **अथर्व संहिता विधान** (लेखकः आचार्य कश्ावदेव शास्त्री) -श्री लालबहादुर शास्त्री कन्द्रीय संस्कृत विद्यापीठ, नई दिल्ली १९८८-८९ सन्।
२. **अथर्ववेद का सुबोध भाष्य** (प्रथम भाग) -श्रीपाददामोदर सातवलेकर, स्वाध्याय मण्डल, पारडी १९८९।
३. **अथर्ववेदपरिशिष्टस्य** राजप्रथमाभिषेकः, पुरोहितकर्माणि, पुष्याभिषेकः, पिष्टरात्र्याः कल्पः, आरात्रिकम्, घृतावेक्षणम् (३-८) इति षट् परिशिष्यानि (सं. रामकुमारराय:, चौखम्भा ओरियन्टालिया, वाराणसी १९७६ सन्।
४. **अथर्ववेदभाष्य** (हिन्दी अनुवाद, भावार्थ र व्याकरण-निरुक्तादि प्रमाणसहित) भाष्यकार, सम्पादक तथा प्रकाशक : पं. क्षेमकरणदास त्रिवेदी, ५२ लूकरगंज, प्रयाग (इलाहबाद), सन् १९१२( १९२०।
५. **अथर्ववेदभाष्यभूमिका** (हिन्दीभाष्यसहिता) -गीता संस्कृत प्रकाशन, वाराणसी १९७८ सन्।
६. **अथर्ववेदीयापैप्पलादसंहिता** (१-३ भाग), सम्पा. आचार्य रघुवीर, सरस्वती विहार, लवपुर ( लाहोर), सन् १९३६, १९४०-१९४१।
७. **ऋग्वेदभाष्यभूमिका** (सविवरणशारदीऽहिन्दीव्याख्योपेता) -डा. शारदा चतुर्वेदी, कृष्णदास अकादमी, वाराणसी १९८४ सन्
८.पैप्पलादसंहिता (आथर्वण वेद), सम्पा. कुञ्ज विहारी उपाध्याय, निजी प्रकाशन, ओडिशा, पुरी, सन् २०१०।
९. **Atharva-Veda Samhita,** Translated into English With Critical and Exegetical Commentary by William Dwight Whitney, Revised and Brought Nearer to Completion and Edited by Charles Rockwell Lanman, Volumes 7-8 of Harvard Oriental Series, First Published : Harvard University, Cambridge, Massachusetts, America, 1905. (**Reprinted :** Motilal Banarsidass Publishers, Delhi, 1962, 1971, 1984, 1993, 1996, 2001, 2011).
१०. **Hymns of The Atharva-Veda,**Together with Extracts from the ritual books and the commentries translated by Maurice Bloomfield, Sacred Books of the East, Volume 42 (USA), 1897.
११. **The Hymns of The Atharva-Veda** (Vols. 1-2), Translated with a popular Commentary by Ralph T. H. Griffith, E. J. Lazarus and Company, Benares, 1st edition :1895-96. 2nd ed. 1916-17.

# विषयः — नव्यव्याकरणम्

पाठ्यांशनाम— **तिङन्तप्रक्रिया**
स्तरः — शास्त्री
वर्षः — प्रथम
पत्रम् — प्रथमम्

पाठ्यांशसङ्केतः— न.व्या.३०१
पूर्णाङ्काः— १००
वार्षिकः पाठ्यभारः — १६० घण्टाः
साप्ताहिकः पाठ्यभारः ६

**१. पाठ्यांशपरिचयः**

संस्कृतवाङ्मयज्ञानाय पाणिनीयव्याकरणाध्ययनं महत्त्वाधायकं वरीवर्ति । वेदरक्षायै प्रवृत्तं पाणिनीयव्याकरणं वेदाङ्गेषु प्रमुखं स्थानं बिभर्ति । **मुखं व्याकरणं स्मृतम्, मुखमिव प्रधानत्वान्मुख्यः, प्रधाने च कृतो यत्नः फलवान् भवति इत्यादिवचोभिः व्याकरणाध्ययनस्य महत्त्वं ख्यापितं वर्तते** । यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्, स्वजनः श्वजनो माभूत्, सकलं शकलं सकृत् शकृत् इत्यादिवचनैः संस्कृतभाषाया याथातथ्येन शुद्धस्वरूपज्ञानाय पाणिनीयव्याकरण-मेकसाधनमिति विद्वद्भिरैकमत्येन स्वीकृतम् । तेन हि बहुकालादेव व्याकरणाध्ययनस्य परम्परा प्रसृता विद्यते । इमामेव परम्परामनुसृत्य नेपालसंस्कृतविश्वविद्यालयेन नव्यव्याकरणस्य पठनपाठनं स्वीकृतमस्ति । सम्प्रति प्रचलितं त्रैवार्षिकस्नातकस्तरं चातुवार्षिक( परिवर्त्य तदनुकूलं विषयगतपाठ्यक्रमस्य विकाशो विधीयमानो वर्तते । तस्यामेव शृङ्खलायां नव्यव्याकरणविषयस्य प्रथमपत्रस्य पाठ्यक्रमोऽत्र संयोजितो वर्तते ।

पत्रेऽस्मिन् पाणिनीयव्याकरणस्य तिङन्तप्रकरणं पाठ्यांशत्वेन निर्धारितमस्ति । समग्रं पाठ्यक्रममममुं पञ्चसु प्रकरणेषु प्रविभज्य शिक्षणमूल्याङ्कनयोजना प्रस्तुता विद्यते । अनेन प्रकारेण प्रशिक्षिताश्छात्रा निर्धारितलक्ष्यप्राप्तये समर्था भविष्यन्तीति विश्वासो गृहीतो विद्यते । संस्कृतवाङ्मये प्रयुज्यमानानामर्थसमापिकानां क्रियापदानां व्युत्पादनमस्मिन् पाठ्यांशे विधीयते तेन हि संस्कृतभाषाया भाषिकपक्षस्य सम्यग्ज्ञानाय पाठ्यक्रमोऽयं बहूपयोगी स्यादिति विश्वासो वर्तते । परस्मैपदिनामात्मनेपदिनामुभयपदिनाञ्च धातूनां रूपसिद्धिप्रक्रियया, रूपावली-विमर्शनेन, सिद्धरूपाणां वाक्ये प्रयोगशिक्षणेन च छात्रेषु संस्कृतभाषायाः क्रियाविषयकं सुदृढं ज्ञानं सम्पद्यत इति विदुषां मतम् । शब्दशास्त्रस्य ज्ञानेन सह प्रयोशिल्पस्य शिक्षणमपि अस्य पाठ्यक्रमस्य प्रमुखं लक्ष्यमस्ति । **ज्ञानं भारः क्रियां विना** अस्याभिप्रायमात्मसात्कृत्य रूपसिद्धिप्रक्रियया सहैव सिद्धरूपाणां लेखरचनादौ प्रयोगाभ्यासेन शिक्षणं फलोपधायकं भवेदिति पाठ्यक्रमस्य प्रमुखं साध्यम् ।

पर्यन्ते चोद्देश्यं कर्(द्रीकृत्य निर्दिष्टसरण्या निर्दिष्टविषयवस्तूनां शिक्षणेन छात्रा व्याकरणविषयस्याधारभूतज्ञानवन्तो नव्यव्याकरणविषयस्योच्चस्तरीय-व्याख्यानग्रन्थाध्ययने योग्यतावन्तश्च भविष्यन्तीति विश्वस्यते ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति-

- तिङन्तप्रकरणस्य परिचयप्रदाने,
- पाणिनीयसूत्रनिर्दिष्टविधिना क्रियापदनिर्माणप्रक्रिया प्रदर्शने,
- धातुरूपावलीनिरूपणे,
- तिङन्तपदानां प्रयोगकौशले,
- ण्यन्त-सन्नन्त-यङन्तक्रियापदानां विशिष्टार्थप्रतिपादने,
- कर्तृवाच्य कर्मवाच्य भाववाच्यानां विश्लेषणे
- सूत्रार्थव्याख्याने कारिकार्थविवेचने च।

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि  पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | विशिष्टोद्देश्यानि | पाठ्यांशविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| **क** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति–<br>➢ लकारार्थकथने,<br>➢ तिङर्थनिरूपणे,<br>➢ निर्धारितधातूनां रूपसिद्धिप्रक्रियालेखने,<br>➢ सूत्रवार्तिकार्थापने,<br>➢ परस्मैपदिनामात्मनेपदिनाञ्च रूपावलीपरिचायने,<br>➢ कारिकार्थव्याख्याने,<br>➢ निर्धारितधातोः क्रियापदानां लेखरचनादौ नैपुण्येन प्रयोगे च। | भ्वादिप्रकरणस्यादितः **कत्थ**श्लाघायाम् इति धातुपर्यन्तो भागः। | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| **ख** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति–<br>➢ भ्वादिगणस्थधातूनां रूपसिद्धिप्रक्रियालेखने,<br>➢ रूपावलीपरिचायने,<br>➢ भ्वादिगणस्थक्रियापदानां लेखरचनादौ नैपुण्येन प्रयोगे,<br>➢ सूत्रवार्तिकार्थापने कारिकाव्याख्याने च। | भ्वादिप्रकरणस्य **अत** सातत्यगमने इति धातोरारभ्य भ्वादिप्रकरणान्तो भागः। | २० | ३२ |
| **ग** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति–<br>➢ अदाद्यादिप्रकरणविभागस्याशयकथने,<br>➢ प्रकरणगतधातूनां रूपसिद्धिप्रक्रियालेखने,<br>➢ रूपावलीसञ्चालने,<br>➢ सूत्रवार्तिकार्थनिरूपणे,<br>➢ लेखरचनादौ विविधप्रकृतिकानां क्रियापदानां नैपुण्येन प्रयोगे च। | अदादि प्रकारणादारभ्य क्र्यादिप्रकरणान्तो भागः। | २० | ३२ |
| **घ** | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति–<br>➢ चुरादीनां रूपसिद्धिप्रक्रियालेखने,<br>➢ रूपावलीपरिचायने,<br>➢ सिद्धरूपाणां लेखरचनादौ निपुणतया प्रयोगे,<br>➢ हेतुमण्ण्यन्तक्रियापदसाधने, | चुरादिप्रकरणादारभ्य यङ्लुक्–प्रकरणान्तो भागः | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | ➢ ण्यन्तक्रियापदप्रयोगे,<br>➢ सन्नर्थप्रतिपादने,<br>➢ सन्नन्तक्रियापदसाधने,<br>➢ लेखरचनादौ सन्नन्तक्रियापदप्रयोगे,<br>➢ यङर्थप्रतिपादने,<br>➢ यङन्तक्रियापदसाधने,<br>➢ सिद्धरूपाणामर्था - नुकूल्येन प्रयोगप्रदर्शने च । | | | |
| ङ | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति–<br>➢ सुबन्तानां धातुत्वविधानप्रक्रिया-निरूपणे,<br>➢ सुबन्तेभ्यः क्रियापदसाधने,<br>➢ साधितानां क्रियापदानामर्थकथने,<br>➢ अर्थानुरूपेण वाक्येषु प्रयोगप्रदर्शने,<br>➢ कर्मणि भावे च लकारविधानेन रूपसाधने,<br>➢ कर्तृवाच्य-कर्मवाच्य-भाववाच्यानां परिचयप्रदाने,<br>➢ आत्मनेपद-परस्मैपदयोः प्रयोगदिग्दर्शने,<br>➢ विशेषविवक्षायां कारकान्तराणामपि कर्तृत्वेन प्रयोगनिरूपणे,<br>➢ विशिष्टावस्थायां लकाराणां व्यत्ययेन प्रयोगनिरूपणे च । | नामधातुप्रकरणादारभ्य लकारार्थप्रकरणान्तो भागः । | २० | ३२ |
| | | योगः | १०० | १६० |

## ४. पाठ्यवस्तुविवरणम्

**'क' प्रकरणे–**

पाणिनीयव्याकरणे वैयाकरणसिद्धान्तकौमुद्यास्तिङन्तप्रकरणस्य ग्रन्थ–कर्तुर्भट्टोजिदीक्षितस्य च सामान्येन परिचयः । मङ्गलाचरणस्य परिचयपूर्वकं **श्रीत्राहन्ती**ति मङ्गलाचरणपद्ये, द्विविधेषु पदेषु तिङन्तपदपरिचयः, तिङन्तपदानां रूसिद्धिप्रक्रियाः, सिद्धरूपाणामर्थाः, क्रियापदानां कर्तृकर्मसामानाधिकरण्येन वाक्ये प्रयोगज्ञानस्य च पूर्वाधाररूपेणाधोऽङ्कितविषयाः – धातुः, धात्वर्थः, धातुप्रकाराः, दशलकाराः, लकारार्थाः, लादेशास्तिङः, तिङर्थाः, तिङामात्मनेपद–परस्मैपदव्यवस्था, परस्मैपदात्मनेपदानां पुरुषविभागः, पुरुषेषु वचनविभागः, युष्मदर्थेन सामानाधिकरण्ये मध्यमपुरुषस्य प्रयोगनियमः, अस्मदर्थेन सामानाधिकरण्ये उत्तमपुरुषस्य प्रयोगनियमः, ताभ्यामन्येन सामानाधिकरण्ये प्रथमपुरुषस्य प्रयोगनियमश्च । धातोर्भावे कर्मणि च लकारविधानप्रक्रिया भावकर्मप्रकरणे विधास्यत इति हेतोस्ततः प्राक् सर्वत्र कर्तरि लकारविधानेन जायमानानां रूपाणां सिद्धिप्रक्रिया च । सम्बद्धसूत्र—वार्तिक—परिभाषार्थवबोधनपूर्वकं परस्मैपदिनो **भू**धातो सर्वेषु लकारेषु ससूत्रं रूपसिद्धिः, रूपावली, सिद्धरूपाणामर्थानुकूलतया वाक्येषु प्रयोगः ।

**संहितैकपदे नित्या नित्या धातूपसर्गयोः । नित्या समासे वाक्ये तु सा विवक्षामपेक्ष्यते ॥** इति कारिका ।

आत्मनेपदिन **एध्**धातोः सर्वेषु लकारेषु सर्वासु च विभक्तिषु ससूत्रनिर्देशनं रूपसिद्धिप्रक्रिया, रूपावली, सिद्धरूपाणां वाक्येषु प्रयोगश्च । **श्तिपा शपाऽनुबन्धेन निर्दिष्टं यद्गणेन च । यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥** इति **ऊदृदन्तैरि**ति कारिका च । सेडनिड्धातूनां वर्गीकरणम् ।

**स्पर्ध संघर्षे** इति धातोरारम्भ **कत्थ श्लाघायाम्** इति पर्यन्ता आमात्मनेपदिनो धातवः । तेषां ससूत्रं रूपसिद्धिः । तत्र क्रमे समागतानि सूत्रवार्तिकादीनि, **षोपदेशा** धातवश्च । इमे विशेषेण विषयाः पाठनीयाः ।

**ख प्रकरणे–**

**अत सातत्यगमने** इति धातोरारभ्य **टु ओ श्वि** गतिवृद्ध्योः पर्यन्ता परस्मैपदि–आत्मनेपदि–उभयपदिनो धातवः, तेषां ससूत्रं रूपसिद्धिः, रूपावली, सिद्धरूपाणां वाक्येषु प्रयोगश्च । तत्रस्थानि सूत्रवार्तिकादीनि । **संज्ञायाः कार्यकालत्वात्** इति कारिका, **चङि द्वित्वादिप्रक्रिया**या वैशिष्ट्यञ्च ।

**ग प्रकरणे–**

**अदादिप्रकरणे–** अदादिप्रकरणस्य परिचयः । अदादिप्रकरणे **अद भक्षणे** इत्यस्माद्धातोरारभ्य **ह्नुङ् अपनयने** धातुपर्यन्ता परस्मैपदि–आत्मनेपदि–उभयपदिनो धातवः, तेषां ससूत्रं रूपसिद्धिः, रूपावली, सिद्धरूपाणां वाक्येषु प्रयोगश्च ।

सूत्रवार्तिकादीनामर्थाः, **पूर्वं धातुरुपसर्गेण युज्यते** इति कारिकाया प्रयोजनञ्च विशेषेण पाठ्यम्।

**जुहोत्यादिप्रकरणे–** जुहोत्यादिप्रकरणपरिचयः । अत्र प्रकरणेऽपि **हुदानादानयोः** धातोरारभ्य **गा स्तुतौ** पर्यन्ता धातवः, तेषां ससूत्रं रूपसिद्धिः, रूपावली, प्रमुखाणां रूपाणां वाक्यप्रयोगश्च। तत्रस्थानां सूत्रवार्तिकादीनामर्थाश्च।

**दिवादिप्रकरणे–** दिवादिप्रकरणस्य परिचयः। विकरणभेदेन प्रकरणविभागस्यौचित्यम्। अत्र प्रकरणे **दिवु**धातोरारभ्य **गृधु अभिकाङ्क्षायाम्** इति पर्यन्ता धातवः, तेषां ससूत्रं रूपसिद्धिः, रूपावली, प्रमुखरूपाणां वाक्यप्रयोगः, सूत्रवार्तिकादीनामर्थाश्च।

**स्वादिप्रकरणे–** स्वादिप्रकरणस्य परिचयः। विकरणकृतं वैशिष्ट्यम्। ततः **षुञ् अभिषवे** धातोरारभ्य **दाश हिंसायाम्** पर्यन्ता धातवः, तेषां सूत्रं रूपसिद्धिः, रूपावली, प्रमुखरूपाणां वाक्यप्रयोगः, सूत्रवार्तिकादीनामर्थाश्च।

**तुदादिप्रकरणे–** तुदादिप्रकरणस्य परिचयः। विकरणकृतं वैशिष्ट्यम्। अत्र **तुद् व्यथने** इत्यस्मादारभ्य **निशि अवयवे** पर्यन्ता धातवः, तेषां ससूत्रं रूपसिद्धिः, रूपावली, प्रमुखरूपाणां वाक्यप्रयोगः, सूत्रवार्तिकादीनामर्थाश्च।

**रुधादिप्रकरणे–** रुधादिप्रकरणस्य परिचयः । अत्र **श्नम्**विकरणकृतं वैशिष्ट्यम् । ततः **रुधिर् आवरणे** धातोरारभ्य **पृची सम्पर्क(** पर्यन्ता धातवः तेषां ससूत्रं रूपसिद्धिः, रूपावली, प्रमुखरूपाणां वाक्यप्रयोगः, सूत्रवार्तिकादीनामर्थाश्च।

**तनादिप्रकरणे–** तनादिप्रकरणपरिचयः । विकरणकृतं वैशिष्ट्यम् । ततः **तनु विस्तारे** धातोरारभ्य **डुकृञ् करणे** पर्यन्ता धातवः, तेषां ससूत्रं रूपसिद्धिः, रूपावली, प्रमुखरूपाणां वाक्यप्रयोगः, सूत्रवार्तिकादीनामर्थाश्च। उपसर्गपूर्वकात् **कृ**धातोर्निर्दिष्टार्थे सुडागमवैशिष्ट्यम्।

**क्र्यादिप्रकरणे–** क्र्यादिप्रकरणस्य परिचयः। **श्ना**विकरणकृतं वैशिष्ट्यम्। ततः **डुक्रीञ् द्रव्यविनिमये** धातोरारभ्य **ग्रह उपादाने** इति पर्यन्ता धातवः, तेषां ससूत्रं रूपसिद्धिः, रूपावली, प्रमुखरूपाणां वाक्यप्रयोगः, सूत्रवार्तिकादीनामर्थाश्च।

**घ प्रकरणे–**

**चुरादिप्रकरणे–** चुरादिप्रकरणस्य परिचयः । चुरादौ स्वार्थे णिचि धातुत्वे रूपसिद्धिवैशिष्ट्यम् । ततः **चुरस्तेये** धातोरारभ्यात्र प्रकरणे स्थिता सर्वे धातवः, तेषां ससूत्रं रूपसिद्धिः, रूपावली, प्रमुखरूपाणां वाक्यप्रयोगः, सूत्रवार्तिकादीनामर्थाश्च।

**आधृषाद्वा** इति गणसूत्रान्तर्गतेभ्यो धातुभ्यः णिचो वैकल्पिकत्वम् । **चिति**धातोरिदित्करणफलम्, **पॄ**धातोर्दीर्घोच्चारणफलञ्च।

**णिच्प्रकरणे–** णिच्प्रकरणस्य परिचयः। **ण्यन्ताण्णिचि पूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धिं बाधित्वा णिलोपः**, अस्याः पङ्क्तेराशयः, **बहिरङ्गोप्युपधाह्रस्वो द्वित्वात् प्रागेवेति** कथनस्याशयः, **प्रार्थयान्ति शयनोत्थितं प्रियाः**, अस्य साधुत्वम् । णिच्प्रकरणस्थितानां

धातुरूपाणां ससूत्रं रूपसिद्धिः, रूपावली, प्रमुखरूपाणां वाक्यप्रयोगः, सूत्रवार्तिकादीनामर्थाश्च। इमे विशेषेण विषयाः पाठनीयाः।

**सन्प्रकरणे–** सन्प्रकरणस्य परिचयः। **धातोः कर्मणः समानकर्तृकादिच्छायां वा** इति सूत्रार्थः। अस्मिन् प्रकरणे स्थितानां सूत्रवार्तिकादीनामर्थाः, धातुरूपाणां ससूत्रं रूपसिद्धिः, रूपावली, प्रमुखरूपाणां वाक्यप्रयोगश्च। **कार्यमनुभवन्** परिभाषाया आशयः, **शैषिकान् मतुबर्थीयाच्छैशिको मतुबर्थिकः .........** इति कारिका च।

**यङ्प्रकरणे–** यङ्प्रकारणस्य परिचयः। यङ्विधायकानां सूत्रवार्तिकादीनामर्थाः, यङ्प्रत्ययार्थस्य विविधता, अस्मिन् प्रकरणे निर्दिष्टेभ्यो **भू, व्रज** प्रभृतिधातुभ्यो निष्पन्नानां रूपाणां ससूत्रनिर्देशं सिद्धिप्रक्रिया, रूपावली च।

**नीक्नुक्लत्वोत्वरीक्संप्रसारणयलोप**विधयकानां सूत्रवार्तिकादीनामर्था उदाहरणानि च। **नुगित्यनेनानुस्वारोपलक्ष्यते** इत्यस्याशयः।

**यङ्लुक्प्रकरणे–** यङ्लुक्प्रकरणस्य सामान्येन परिचयः।

**ङ प्रकरणे–**

**नामधातुप्रकरणे–** नामधातुप्रकरणस्य परिचयः। सुबन्तानां धातुत्वसम्पादनेन विशिष्टार्थबोधकानां रूपाणां सिद्धिप्रक्रिया, सुबन्तेभ्यः क्यजादिप्रत्ययैर्जायमानानां रूपाणां ससूत्रं सविग्रहञ्च रूपसिद्धिप्रक्रिया, रूपावली, वाक्यप्रयोगश्च। णिच्प्रकरणे **क्यच्–काम्यच्–क्यङ्–क्विप्–क्यष्–णिच्**प्रत्ययविधायकानां सूत्र–वार्तिकादीनामर्थाः, नामधातु –प्रक्रियाया अर्थगुम्फनगत–वैशिष्ट्यञ्च। इमे विषया अत्र विशेषेण पाठनीयाः।

**कण्ड्वादिप्रकारणे–** कण्ड्वादिप्रकरणस्य सामान्यपरिचयः।

**प्रत्ययमालाप्रकरणे–** प्रत्ययमालाप्रकरणस्य परिचयः। एकाधिकैः सार्थकप्रत्यैर्जायमानानां रूपाणां रूपसिद्धिप्रक्रिया।

**आत्मनेपदप्रकरणे–** आत्मनेपदप्रकरणस्य परिचयः। आत्मनेपदप्रक्रियासम्बद्धानि अधोङ्कितानि सूत्राणि–**अनुदात्तङित आत्मनेपदम्, भावकर्मणोः, कर्तरि कर्मव्यतिहारे, न गतिहिंसार्थेभ्यश्च, इतरेतरान्योन्योपपधाच्च, नेर्विशः, परिव्यवेभ्यः क्रियः, विपराभ्यां जेः, आङो दोऽनास्यविहरणे, क्रीडोऽनुसंपरिभ्यश्च, समवप्रविभ्यः स्थः, प्रकाशनस्थेयाख्ययोश्च, उदोऽनूर्ध्वकर्मणि, अकर्मकाच्च, उद्विभ्यां तपः, आङो यमहनः** एतेषां सूत्राणामर्था उदाहरणानि च।

**धातोरर्थान्तरे वृत्ते....** इति कारिका, एवमेव **निसमुपविभ्यो ह्वः, स्पर्धायामाङः, वेः शब्दकर्मणः, उपपराभ्याम्, व्यक्तवाचां समुच्चारणे, विभाषा विप्रलापे, उदश्चरः सकर्मकात्, समस्तृतीयायुक्तात्, दाणश्च सा चेच्चतुर्थ्यर्थे, उपाद्यमः स्वकरणे, ज्ञाश्रुस्मृदृशां सनः पूर्ववत् सनः, उपाद्वदः** एतेषां सूत्राणां सोदाहरणमर्थाः।

**परस्मैपदप्रकरणे–** परस्मैपदप्रकरणस्य परिचयः। ततः – **शेषात्कर्तरि परस्मैपदम्, अनुपराभ्यां कृञः, अभिप्रत्यतिभ्यः क्षिपः, प्राद्वहः, परेर्मृषः, व्याङ्परिभ्यो रमः, उपाच्च,**

**विभाषाकर्मकात्, बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः, निगरणचलनार्थेभ्यश्च, अदेः प्रतिषेधः, अणावकर्मकाच्चित्तवत्कर्तृकात्** एतेषां सूत्राणां सोदाहरणमर्थाः।

**भावकर्मप्रकरणे–** भावकर्मप्रकरणस्य परिचयः। अत्र **लः कर्मणि च भावे चाकर्मकेभ्यः** इति सूत्रं पुरस्कृत्य धातोः कर्तरि कर्मणि, कर्तरि भावे च लकारविधाननियमः,कर्तृवाच्य-कर्मवाच्य-भाववाच्यवाक्यानां प्रयोगविधिः,

अस्मिन् प्रकरणे सकर्मकात् धातोः कर्मणि, अकर्मकाद् धातोः भावे लकारविधानेन जायमानानां रूपाणां ससूत्रं रूपसिद्धिः, सिद्धरूपाणां भाववाच्यवाक्ये कर्मवाच्यवाक्ये च प्रयोगः। **उक्तानुक्त**योराशयः, **गौणे कर्मणि दुह्यादेः ...........** इति कारिका च।

**कर्मकर्तृप्रकरणे–** कर्मकर्तृप्रक्रियायाः परिचयः । **कर्मणः कर्तृत्वे कर्मवद्भावादि**विशेषव्यवस्था च । ततः प्रकरणनिर्दिष्टक्रमेण सूत्रार्थः, ससूत्रं रूपसिद्धिश्च।

**लकारार्थप्रकरणे–** लकारप्रयोगस्य सामान्यनियमाः, विशिष्टार्थे लकारविधायकानामधोङ्कितानां सूत्रवार्तिकादीनां सोदाहरणमर्थाः – **अभिज्ञावचने लृट्, न यदि, विभाषा साकाङ्क्षे, परोक्षे लिट्, अत्यन्तापह्नवे लिड्वक्तव्यम्, हशश्वतोर्लङ् च, प्रश्ने चासन्नकाले, लट् स्मे, अपरोक्षे च, ननौ पृष्टप्रतिवचने, नन्वोर्विभाषा, पुरि लुङ् चास्मे, यावत्पुरानिपातयोर्लुट्, विभाषा कदाकर्ह्योः, लोडर्थलक्षणे च, वर्तमानसामीप्ये वर्तमानवद्वा, आशंसायां भूतवच्च, क्षिप्रवचने लृट्, हेतुहेतुमतोर्लिङ्, इच्छार्थेषु लिङ्लोटौ, धातुसम्बन्धे प्रत्ययाः, क्रियासमभिहारे लोट्।**

## ४. शिक्षणविधिः क्रियाकलापश्च

अस्य पाठ्यांशस्य शिक्षणे संस्कृते बहुप्रचलिता निगमागमव्याख्यानप्रवचनप्रश्नोत्तरात्मका विधय एव आवश्यकतानुसारं यथायथं प्रयोक्तव्याः। कक्षायां शिक्षकेण सह छात्रानपि सक्रियान् विधाय विषयवस्तुबोधाय विषयविश्लेषणाय च छात्राः समुत्प्रेरणीयाः । यथायथं शिक्षणोपकरणानां प्रयोगं विधाय शिक्षणप्रक्रियायां सारल्यमानेतव्यम् । आवश्यकतामाकलय्य समये समये विश्वविद्यालयो दूरशिक्षणपद्धते प्रयोगाय योजनामग्रेसारयितुं शक्नोतीति तस्यकृते वैद्युतोपकरणानां प्रयोगोऽपि समपेक्ष्यते।

## ५. मूल्याङ्कनम्

पाठ्यक्रममममुमधीयानानां छात्राणां मूल्याङ्कनं द्विविधया पद्धत्या विधीयते । पञ्चविंशत्यङ्कानां मूल्याङ्कनमान्तरं निर्माणात्मकं वा भविष्यति चेत्तर्हि पञ्चसप्तत्यङ्कानां मूल्याङ्कनं वार्षिकलेखपरीक्षामाध्यमेन विधास्यते । निर्माणात्मकमूल्याङ्कनस्य वार्षिकमूल्याङ्कनस्य च कार्यप्रक्रियागता निर्देशिका परीक्षानियन्त्रणकार्यालयस्य समन्वयेन यथासमयं प्रकाशयिष्यते।

वार्षिक–परीक्षा–प्रश्नपत्रनिर्माण–सारणी

| प्रकरणानि क,ख,ग,घ,ङ | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २ × १२=२४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६ ×७=४२ |
| | व्याख्यात्मकाः | ४ | ३ | ३ × ८=२४ |
| | वस्तुगताः | १० | १० | १० ×१=१० |
| | | २६ | २१ | १०० |

## ७. पाठ्यसूची

### (क) पाठ्यग्रन्थः

१. भट्टोजिदीक्षित, ***वैयाकरणसिद्धान्तकौमुदी*** (तृतीयो भागः)।

### (ख) सहायक ग्रन्थाः

१. भट्टोजिदीक्षित, वैयाकरणसिद्धान्तकौमुदी –*बालमनोरमा* (वासुदेव दीक्षित) सहिता *तत्वबोधिनी* (ज्ञानेन्द्रसरस्वती) टीका सं.गिरिधर शर्मा, परमेश्वरानन्द शर्मा, मोतीलाल, वनारासीदास, वाराणसी, सन् २०१२।

२. ब्रह्मानन्द त्रिपाठी, *शब्दधातुरूपचन्द्रिकाः,* चौखम्भा सुरभारती प्रकाशन, वाराणसी, सन् २०००।

### (ख) सन्दर्भग्रन्थाः

१. सोमनाथसिग्द्यालः, **प्रतिसंस्कृता सिद्धान्तकौमुदी,** प्रथमसंस्करणम्, नेपाल–एकछमी, काष्ठमण्डपः, वि.सं. २०१५।

२.रामचन्द्राचार्यः, **प्रक्रियाकौमुदी,** श्रीमुरलीधर मिश्रः (सम्पा.), सम्पूर्णानन्द संस्कृत विश्वविद्यालय प्रकाशन, वाराणसी, वि.सं.२०५६।

३.धर्मकीर्तिः, **रूपावतारः** हर्षनाथ मिश्र (सम्पा.), लालबहादुरशास्त्री–कन्द्रीय–संस्कृत–विद्यापीठम्, नयाँदिल्ली, सन् १९७४।

४.चक्रधरहंशनौटियालः, **बृहद्–अनुवाद–चन्द्रिका,** मोतीलाल बनारसी दास, वाराणसी, सन् १९६२।

५. टि.आर. कृष्णाचार्यः, **बृहद्धातुरूपावली,** शङ्करसुब्रह्मण्यशास्त्री (सम्पादकः), कुम्भघोण अनन्तशयनस्थ भास्कर मुद्रणालयः, आन्ध्रप्रदेश, शाक(१८४३।

६. नरेश झा, **धातुपाठः,** (सार्थः सप्रयोगश्च), चौखम्बा सुरभारती प्रकाशन, वाराणसी, सन् २०११।

७. मोहनप्रसादपोखेलः, **तिङन्तप्रकाशः,** (सरलानेपालीव्यख्यायुतः), काष्ठमण्डप पुस्तक घर, काठमाडौँ, वि.सं. २०७०

# विषयः — नव्यव्याकरणम्

**पाठ्यांशनाम— कृदन्तस्वरवैदिकप्रक्रिया ।**
**स्तरः** — शास्त्री
**वर्षः** — प्रथमः
**पत्रम्** — द्वितीयम्

**पाठ्यांशसङ्केतः**— न.व्या. ३०२
**पूर्णाङ्काः**— १००
**वार्षिकः पाठ्यभारः** १६० घण्टाः
**साप्ताहिकः पाठ्यभारः** ६

## १. पाठ्यांशपरिचयः

**रक्षोहागमलघ्वसन्देहाः** व्याकरणाध्ययनस्य मुख्यानि प्रयोजनानि । एतेष्वपि वेदरक्षणं व्याकरणाध्ययनस्य मुख्यं प्रयोजनम् । वैदिकशब्दानां सिद्धिप्रक्रियया, स्वरसञ्चारज्ञानेन च विना वेदानां रक्षणमसम्भवि । अतःशास्त्रिकक्षायाः प्रथमवर्षे नव्यव्याकरणविषयस्य द्वितीयपत्रेऽस्मिन् छात्रेभ्यः वैदिकशब्दानां सिद्धिप्रक्रिया-शिक्षणम्, स्वरप्रक्रियाज्ञानम्, धातुतः शब्दनिर्माणप्रक्रियाज्ञानम्, निर्मितशब्दानां वाक्येषु प्रयोगाभ्यासश्च भवत्विति लक्ष्यं निर्धारितमस्ति । एतदर्थं पाठ्यांशेऽस्मिन् भट्टोजिदीक्षितप्रणीताया वैयाकरणसिद्धान्तकौमुद्याः कृत्यप्रक्रियात उणादिभिन्नो-त्तरकृदन्तप्रकरणान्तो भागः, वैदिकशब्दसिद्धिप्रक्रियायाः प्रथमा-ध्यायतोऽष्टमाध्या- यपर्यन्तो भागः, स्वरप्रक्रियायाः कानिचित्सूत्राणि च निर्धारितानि सन्ति ।

पाठ्यांशस्यास्याध्ययनेनच्छात्राः संस्कृतवाङ्मये प्रयुज्यमानानां कृत्प्रत्ययनिर्मित-शब्दानां व्युत्पादने, सिद्धरूपाणामर्थज्ञानपूर्वकं वाक्येषु प्रयोगाभ्यासे, वैदिकलौकिकोभयविधशब्दानां भिन्नावस्थाववोधपूर्वकं वैदिकशब्दसिद्धिप्रक्रियाज्ञाने, उदात्तानुदात्तस्वरितस्वरसञ्चारज्ञाने च समर्थाः भविष्यन्तीत्यपेक्षितमस्ति । संस्कृतभाषाया भाषिकपक्षस्य सम्यग्ज्ञानाय च पाठ्यक्रमोऽयं बहूपयोगी वर्तते । निर्दिष्टविषयवस्तूनां शिक्षणेन छात्रा व्याकरणविषयस्याधारभूतज्ञानवन्तो नव्यव्याकरणविषयस्योच्चस्तरीयव्याख्यान-ग्रन्थाध्ययने योग्यतावन्तश्च भविष्यन्तीति विश्वसितो वर्तते । पाठ्यक्रमेऽस्मिन् पाठ्यांशपरिचयः, सामान्योद्देश्यम्, विशिष्टोद्देश्यम्, प्रकरणविभागः, शिक्षणविधिः, मूल्याङ्कनम्, प्रश्नपत्रनिर्मितिप्रक्रिया, सन्दर्भग्रन्थाश्चेति पाठ्यक्रमस्याधारभूत-तत्त्वानि समाविष्टानि सन्ति ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोङ्कितेषु विषयेषु क्षमा भविष्यन्ति—

- कृत्यकृत्प्रत्ययानां परिचयप्रदाने,
- ससूत्रं कृदन्तपदानां निर्माणे, वाक्येषु प्रयोगाभ्यासे च,
- वैदिकशब्दानां सिद्धिप्रक्रियाप्रदर्शने, तेषां प्रयोगे च,
- वैदिकलौकिकोभयविधशब्दानां प्रक्रियाभेदविमर्शने,
- स्वरपरिचयप्रदाने,

- उदात्तानुदातस्वरितस्वरसञ्चारप्रदर्शने,
- निर्धारितपाठ्यांशान्तर्गतानां सूत्रवार्तिकफक्किकाकारिका-नामर्थापने लेखनाभ्यासे च।

### ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यांशविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| क | अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोङ्कितेषु विषयेषु प्रावीण्यमेष्यन्ति–<br>➢ कृत्यप्रत्ययानां परिचयप्रदाने, तेषामर्थनिरूपणे च,<br>➢ ससूत्रं कृत्यप्रकरणान्तर्गतानां तव्यत्-तव्यानीयर्-केलिमर्-यत्-क्यप्-ण्यत्प्रत्ययान्तपदानां सिद्धिप्रक्रियाप्रदर्शने, तेषां वाक्येषु प्रयोगे च,<br>➢ सरूपासरूपप्रत्ययविवेचनपूर्वकं तत्रत्य नियमनिरूपणे।<br>➢ पूर्वकृदन्तपदानां साधुत्वनिष्पादने,<br>➢ ण्वुल्-तृच्-ल्यु-णिनि-अच्-क-श-ण-ष्वुन्-थकन्-ल्युट्-वुन्-अण्-ड-टक्-अच्-ट-इन्-खश्-खच्-णिनि-ख्युन्-खिष्णुच्-खुकञ्-क्विन्-कञ्-क्स-क्विप्-ण्वि-विट्-अञ्-क्वनिप्-प्रत्ययान्तपदानां सिद्धिप्रक्रियानिरूपणे, तेषां वाक्येषु प्रयोगे च।<br>➢ क्त-क्तवतु-ङ्वनिप्-अतृन्-कानच्-क्वसुच्-शतृ-शानच्-शानन्-क्नु-घिनुण्-युच्-उकञ्-षाकन्-आलुच्-रु-क्मरच्-घुरच्-क्वरप्-अक- | कृत्यप्रक्रियायाः पूर्वकृदन्तप्रक्रयायाश्च विषयाः। | ३० | ४८ |

| | | | | |
|---|---|---|---|---|
| | र-उ-कि-किन्-आरु-क्रुक्-लुकञ्-वरच्-ड्-ष्ट्रन्-इत्रप्रत्ययान्तपदानां सिद्धिप्रक्रियानिरूपणे, तेषां वाक्येषु प्रयोगे च।<br>➢ पूर्वकृदन्तप्रकरणस्थसूत्र-वार्तिक-फक्किका-कारिकाणां सोदाहरणमर्थनिरूपणे,<br>➢ सिद्धपदानामर्थानुरूपेण प्रयोगप्रदर्शने च। | | | |
| ख | अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोङ्कितेषु विषयेषु प्रावीण्यमेष्यन्ति—<br>➢ उत्तरकृदन्तपदानां साधुत्वनिष्पादने,<br>➢ तुमुन्-ण्वुल्-अण्-घञ्-क-णच्-इनुण्-अप्-अच्-क्त्रिमप्-अथुच्-नङ्-कि-क्तिन्-क्यप्-श-अ-अङ्-युच्-ण्वुल्-इक्-श्तिप्-कार-इफ्-घ-इण्-इञ्-इक्-ण्वुल्-अनि-क्त-ल्युट्-घञ्-ड-डट्-इक-इकक्-खल्-ल्यप्-णमुल्-खमुञ्-तस्प्रत्ययान्तपदानां सिद्धिप्रक्रियानिरूपणे, तेषां वाक्येषु प्रयोगे च।<br>➢ उत्तरकृदन्तप्रकरणस्थसूत्रवार्तिकफक्किकाकारिकाणां सोदाहरणमर्थनिरूपणे,<br>➢ सिद्धपदानामर्थानुरूपेण प्रयोगप्रदर्शने,<br>➢ कृत्प्रत्ययस्थानामनुबन्धा नां | उत्तरकृदन्तप्रक्रियाया निर्धारिता विषयाः। | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | प्रयोजननिरूपणे। | | | |
| ग | अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोङ्किकतेषु विषयेषु प्रावीण्यमेष्यन्ति—<br>➢ वैदिकपदसिद्धिप्रक्रियालेखने,<br>➢ लेट्लकारस्य प्रयोगप्रदर्शने,<br>➢ वैदिकलौकिकोभयविधपदानां प्रक्रियाभेदविमर्शने, लेखने च,<br>➢ वैदिकप्रक्रियायां जायमानानां विधीनां वैकल्पिकत्वप्रदर्शने,<br>➢ वैदिकप्रक्रियायां सुप्तिङादिप्रत्ययानां व्यत्ययविवेचने,<br>➢ वैदिकप्रक्रियायाः प्रथमतः पञ्चमाध्यायस्थानां सूत्र—वार्तिक—कारिका—फक्किकाणां सोदाहरणमर्थनिरूपणे च। | वैदिकप्रक्रियायाः प्रथमाध्यायतः पञ्चमाध्यायान्ता निर्धारिता विषयाः। | २० | ३२ |
| घ | अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोङ्किकतेषु विषयेषु प्रावीण्यमेष्यन्ति—<br>➢ वैदिकपदसिद्धिप्रक्रियालेखने,<br>➢ वैदिकलौकिकोभयविधपदानां प्रक्रियाभेदविमर्शने लेखने च,<br>➢ वैदिकप्रक्रियायाः षष्ठ—सप्तम—अष्टमाध्यायस्थानां सूत्र—वार्तिक—कारिका—फक्किकाणां सोदाहरणमर्थनिरूपणे च। | वैदिकप्रक्रियायाः षष्ठाध्यायतः अष्टमाध्यायान्ता निर्धारिता विषयाः। | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| ङ | अस्य प्रकरणस्याध्ययनान्ते छात्रा अधोऽङ्कितेषु विषयेषु क्षमा भविष्यन्ति–<br>➢ उदात्तानुदात्तस्वरितस्वराणां परिचयप्रदाने,<br>➢ वैदिकपदानां स्वरपरिचायने,<br>➢ उदात्तानुदात्तस्वरितस्वराणामुच चारणे,<br>➢ स्वरप्रकरणे निर्दिष्टसूत्र–वार्तिकाणामर्थवबोधनपूर्वकं रूपसिद्धिप्रक्रियाप्रदर्शने,<br>➢ स्वरसञ्चारप्रक्रियाकथने च। | स्वरप्रक्रियात : स्वरसञ्चारप्रकरणान्ता निर्धारिता विषयाः। | १० | १६ |
| | | | १०० | १६० |

**४. पाठ्यवस्तुविवरणम्**

**'क' प्रकरणे–**

**कृत्यप्रक्रियायाम्–**

कृत्या इति सूत्राधिकारे वर्तमानानां तव्यत्–तव्यानीयर्–केलिमर्–यत्–क्यप्–ण्यत्प्रत्ययविधायकसूत्राणि, तत्प्रसङ्गे णत्व–तदभाव–ईत्व–नुम्–तुक्–कुत्व–तदभावविधायक–सूत्राणि, तेषां रूप–सिद्धिः, प्रयोगश्च । । वा सरूपोऽस्त्रियाम् इति परिभाषासूत्रञ्च ।

**पूर्व–कृदन्तप्रक्रियायाम्–**

पूर्वकृदन्तप्रकरणस्य परिचयः। पूर्वकृदन्तप्रकरणे स्थितानांण्वुल्–तृच्–ल्यु–णिनि–अच्–क–श–ण–ष्वुन्–थकन्–ण्युट्–वुन्–अण्–ड–टक्–अच्–ट–इन्–खश्–खच्–णिनि–ख्युन्–खिष्णुच्–खुकञ्–क्विन्–कञ्–क्स–क्विप्–ण्वि–विट्–अञ्–क्वनिप्–क्त–क्तवतु–ङ्वनिप्–अतृन्–कानच्–क्वसुच्–इट्–शतृ–शानच्–शानन्–क्नु–घिनुण्–युच्–उकञ् –षाकन्–आलुच्–रु–क्मरच्–घुरच्–क्वरप्–अक–र–उ–कि–किन्–आरु–क्रुक्–लुकञ्–वरच्–डु–ष्ट्रन्–इत्रप्रत्ययैर्निष्पन्नानां रूपाणां ससूत्रं रूप–सिद्धिः, सिद्धरूपाणां वाक्येषु प्रयोगश्च । अवदत्तं विदत्तञ्च... मुकुन्दस्यासितमिदम्... इति कारिका।

**ख प्रकरणे–**

**उत्तरकृदन्तप्रक्रियायाम्–**

**उत्तर**कृदन्तप्रकरणस्य परिचयाः। उत्तरकृदन्तप्रकरणे स्थितानां तुमुन्–ण्वुल्–अण्–घञ्–क–णच्–इनुण्–अप्–क्त्रिमप्–अथुच्–नङ्–कि–क्तिन्–क्यप्–श–अ–अङ्–युच्–ण्वुल्–इक्–श्तिप्–कार–इफ्–घ–इण्–इञ्–इक्–ण्वुल्–अनि–क्त–ल्युट्–घ–घञ्–घ–ड–डट्–

इक-इकक्-खल्-इट्-ल्यप्-णमुल्-खमुञ्-तस्-प्रत्ययैर्निष्पन्नानां रूपाणां ससूत्रं सिद्धिः। सिद्धरूपाणामर्थानुरूपेण वाक्येषु प्रयोगः। संज्ञासु धातुरूपाणि... इति कारिका च।

**ग प्रकरणे–**

सिद्धान्तकौमुद्या वैदिकप्रक्रियायाः प्रथम-द्वितीय-तृतीय-चतुर्थ-पञ्चमाध्ययान्तर्गतानि अधोनिर्दिष्टसूत्रवार्तिकादीनि-

**प्रथमाध्याये-**

छन्दसि... विशाखयोश्च, षष्ठीयुक्त... नभोऽङ्गिरो... जनेरुसि, वृषण्व... अयस्मयादीनि... उभयसंज्ञा... छन्दसि परेऽपि, व्यवहिताश्च, इन्धिभवति... इन्धेश्छन्दो...।

**द्वितीयाध्याये-**

तृतीया च... द्वितीया... चतुर्थ्यर्थे... षष्ठ्यर्थे... यजेश्च... बहुलं छन्दसि, हेमन्त... बहुलम्... मन्त्रे घस...।

**तृतीयाध्याये-**

अभ्युत्सादयाम्... गुपेश्छन्दसि, नोनयति... कृमृदृ... छन्दसि निष्टर्क्य... हिरण्य... छन्दसि वनसन... छन्दसि सहः, वहश्च, कव्यपुरीष... हव्ये... जनसन... मन्त्रे श्वेत... श्वेतवहादीनाम्... अवे यजः, अवयाः श्वेत... विजुपे छन्दसि, आतो मनिन्... बहुलं छन्दसि, छन्दसि परेच्छायाम्... एजधिकारे... मन्त्रे वृषे... छन्दसि गत्य... अन्येभ्यो... छन्दसि लुङ्... लिङर्थे लेट्, सिब्बहुलं लेटि, इतश्च... लेटोऽडाटौ, सिब्बहुलं णिद्वक्तव्यः, स उत्तमस्य, आत ऐ, वैतोऽन्यत्र, उपसंवादा... छन्दसि शायजपि, हृग्रहोर्भश्छन्दसि, व्यत्ययो... सुप्तिङुपग्रह... (कारिका), लिङ्याशिष्यङ्, दृशेरग्वक्तव्यः, छन्दस्युभयथा, तुमर्थे... प्रयै रोहिष्यै... दृशे... शकि... ईश्वरे... कृत्यार्थे... अवचक्षे च, भावलक्षणे... सृपितृदोः कसुन्।

**चतुर्थाध्याये-**

रात्रेश्चाजसौ, नित्यं छन्दसि, भुवश्च, मुद्गलात्... दीर्घजिह्वी... कद्रु... गुग्गुलु... आविष्ट्य... छन्दसि ठञ्, वसन्ताच्च, हेमन्ताच्च, द्व्यचश्छन्दसि, नोत्व... ढश्छन्दसि, भवे... पाथोनदी... वेशन्त... स्रोतसो... सगर्भ... तुग्राद्... अग्राद्यत्, घच्छौ च, समुद्रा... बर्हिषि दत्तम्, दूतस्य... रक्षोयातूनाम्... रेवतीजगती... असुरस्य... माया... तद्वाना... अश्विमानण्, वयस्यासु... मत्वर्थे... मधोर्ञ च, ओजसो... वेशोयश... ख च, पूर्वैः कृत... अद्भिः संस्कृतम्, सहस्रेण... मतौ च, सोममर्हति यः, मये च, मधोः, वसोः समूहे च, अक्षरसमूहे, नक्षत्राद्घः, सर्वदेवात्तातिल्, शिवशम... भावे च।

**पञ्चमाध्याये-**

सप्तनो... शन्शतो... विंशते... युष्मदस्मदो... छन्दसि च, वत्सरा... संपरि... छन्दसि घस्, उपसर्गात्... थट् च छन्दसि, छन्दो विन्... तयोर्दार्हिलौ च... था हेतौ च... पश्च पश्चा... प्रत्नपूर्व... अमु च... वृकज्येष्ठाभ्याम्... अनसन्तान्न... बहुप्रजा... छन्दसि च, ऋतश्छन्दसि।

**घ प्रकरणे—**

सिद्धान्तकौमुद्या वैदिकप्रक्रियायाः षष्ठ–सप्तम–अष्टमाध्ययान्तर्गतनि अधोधोनिर्दिष्टानिं सूत्रवार्तिकादीनि।

**षष्ठाध्याये–**

छन्दसि वेति... तुजादीनाम्... बहुलं छन्दसि, ऋचि त्रेरुत्तर... रमेर्मतौ... चायः की, अपस्पृधे... खिदेश्छन्दसि, शीर्षम्... वा छन्दसि, शेश्छन्दसि... एमन्नादिषु... भय्यप्रवय्ये... ह्रदय्य ।... प्रकृत्यान्तः पाद... अव्याद... यजुष्युरः, आपो जुषाणो... अङ्ग इत्यादौ च, अनुदात्ते... अवपथासि च, आङो... ईषा... स्यश्छन्दसि... ह्रस्वा... पितरा... छन्दसि स्त्रियाम ्... सधमाद... पथि च... साद्यै... छन्दसि च, मन्त्रे सोमा... ओषधेश्च... ऋचितुनु... इकः सुञि, द्व्यचो... निपात... अन्येषामपि... छन्दस्युभयथा, वा षपूर्वस्य निगमे, जनिता मन्त्रे, शमिता यज्ञे, युप्लुवोर्दीर्घश्छन्दसि, छन्दस्यपि... बहुलं छन्दस्य... इरयो रे, छन्दस्युभयथा, तनिपत्यो... घसिभसो...श्रुशृणु... वा छन्दसि, आङितश्च, मन्त्रेष्वा... विभाषर्जो... ऋत्व्यवा...।

**सप्तमाध्याये–**

बहुलं छन्दसि, नेतरा... क्त्वापि... सुपां सुलुक्... इयाडि... आङ्याज... अमो मश्, लोपस्त... ध्वमो ध्वात्, यजध्वैन... तस्य तात्, तप्तनप्त... इदन्तो... क्त्वो यक्, इष्ट्वीनमिति च, स्नात् व्यादयश्च, आज्जसे...श्रीग्रामण्यो... गोः पदान्ते, छन्दस्यपि दृश्यते, ई च द्विवचने, दृक्स्वव... बहुलं छन्दसि, ह्वु ह्वरे... अपरि... सोमे... ग्रसित... सनिंस... पावकादीनाम्... द्योर्लोपो... मीनाते... बहुलम्... जसादिषु... नित्यं छन्दसि, न छन्दस्यपुत्रस्य, अपुत्रादी... दुरस्यु... अश्वा... देवसुम्नयो... कव्यध्वर... विभाषा... सुधितवसुधित... मास... स्ववः स्वत... कृषेश्छन्दसि, दाधर्ति... ससुवेति.. बहुलं छन्दसि।

**अष्टमाध्याये–**

प्रसमुपोदः... छन्दसीरः, अनो नुट्, नाद्धस्य, भूरिदाब्न... ईद्रथिनः, नसत्तनिषत्... अम्नरुध... भुवश्च... ओमभ्या... ये यज्ञ... प्रणवष्टेः, याज्यान्तः, ब्रूहिप्रेष्य... अग्नीत्प्रेषणे... विभाषा पृष्ट, निगृह्यानु... आम्रेडितम्... अङ्गयुक्तम्... विचार्यमाणानाम्, पूर्वं तु भाषायाम्, प्रतिश्रवणे च, अनुदात्तम्... चिदिति... उपरि... स्वरितमाम्रेडित... क्षियाशीः... अनन्त्य... प्लुतावै, च इदुतौ, एचो... प्रश्नान्ता... आमन्त्रिते... तयोर्य्वा... मतुवसो... दाश्वान्... वन उपसङ्ख्यानम्, उभयथर्क्षु... दीर्घादटि... आतोऽटि नित्यम्, स्वतवान्... छन्दसि वाऽप्रा... कः करत्... पञ्चम्याः परा... पातौ च... षष्ठ्याः पति... इडाया वा, युष्मत्... यजुष्येकेषाम्, स्तुतस्तोम... पूर्वपदात्, सुञः, सनोतेरनः, सहे पृत... निव्यभिभ्यो, छन्दस्यृद... नश्च धातु...।

**ङ प्रकरणे—**

उदात्तानुदात्तस्वरितस्वरपरिचयः । ततः, अनुदात्तं पदमेकवर्जम्, सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वाच्यम् (वा.), अनुदात्तस्य च यत्रोदात्तलोपः, आमन्त्रितस्य च, सुबामन्त्रिते पराङ्गवत्स्वरे, उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य,

एकादेश उदात्तेनोदात्तः, स्वरितो वाऽनुदात्ते पदादौ, उदात्तानुदात्तस्य स्वरितः, उदात्तस्वरितपरस्य सन्नतरः, धातोः, लिति, उञ्छादीनाञ्च, ञ्नित्यादिर्नित्यम्, यतोऽन्नावः, फिषोऽन्त उदात्तः (फि.सू.), वर्णानां तणतिनितान्तानाम् (फि.सू.), निपाता आद्युदात्ताः ( फि.सू.), उपसर्गाश्चाभिवर्जम् (फि.सू.), आद्युदात्तश्च, अनुदात्तौ सुप्पितौ, चितः, चितः सप्रकृतेबह्वकजर्थम्, (वा.), तद्धितस्य, कितः, अष्टनो दीर्घात्, तित्स्वरितम्, तास्यनुदात्तेन्ङिददु..., उपोत्तमं रिति, समासस्य, बहुव्रीहौ प्रकृत्या पूर्वपदम्, तत्पुरुषे तुल्यार्थतृतीया..., द्विगौ प्रमाणे, इगन्तकालकपालभगालशरावेषु द्विगौ, राजन्यबहुवचन–द्वन्द्वेऽन्धकवृष्णिषु, संख्या, कारकाद्दत्तश्रुतयोरेवाशिषि, ययतोश्चाऽतदर्थे, तिङ्ङतिङः, गतिर्गतौ एतानि सूत्रवार्तिकादीनि ॥ वैदिकवाक्ये अग्निमीले पुरोहितं यज्ञस्य... इत्यादिषु स्वरसञ्चारप्रक्रियाया च।

## ५. शिक्षणविधिः क्रियाकलापश्च

अस्य पाठ्यांशस्य शिक्षणे संस्कृते बहुप्रचलिता निगमागमव्याख्यान–प्रवचनप्रश्नोत्तरात्मकाः विधय एव आवश्यकतानुसारेण यथायथं प्रयोक्तव्याः । कक्षायां शिक्षकएण सह छात्रानपि सक्रियान् विधाय विषयवस्तुबोधाय विषयविश्लेषणाय च छात्राः समुत्प्रेरणीयाः । यथायथं शिक्षणोपकरणानां प्रयोगं विधाय शिक्षणप्रक्रियायां सारल्यमानेतव्यम् । आवश्यकतामाकलय्य यथासमयं विश्वविद्यालयो दूरशिक्षणपद्धतेः प्रयोगाय योजनामग्रेसारयितुं शक्नोति। तस्य कृते वैद्युतोपकरणानां प्रयोगोऽपि समपेक्ष्यते।

## ६. मूल्याङ्कनम्

पाठ्यक्रममममुमधीयानानां छात्राणां मूल्याङ्कनं द्विविधया पद्धत्या विधीयते। विंशत्यङ्का नां मूल्याङ्कनमान्तरं निर्माणात्मकं वा भविष्यति चेत्तर्हि पञ्चसप्तत्यङ्कानां मूल्याङ्कनं वार्षिकलेखपरीक्षामाध्यमेन विधास्यते। निर्माणात्मकमूल्याङ्कनस्य वार्षिकमूल्याङ्कनस्य च कार्यप्रक्रियागता निर्देशिका परीक्षानियन्त्रणकार्यालयस्य समन्वयेन यथासमयं प्रकाशयिष्यते।

**वार्षिक –परीक्षा–प्रश्नपत्रनिर्माणयोजना**

| क्र.सं. | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नाः | समाधेयाः प्रश्नाः | अङ्कभारः | अङ्काः |
|---|---|---|---|---|---|
| १. | रूपसिद्धिपरकाः (व्याख्यानात्मकाः) | ८ | ५ | १२ × ५ | ६० |
| २. | परिचय–व्याख्या–विश्लेषणात्मकाः (विवेचनात्मकाः) | ४ | ३ | ५ × ३ | १५ |
| ३. | सूत्रप्रतिपाद्यार्थविषयकाः(सङ्क्षिप्तो–त्तरापेक्षिणः) | ४ | ३ | ५ × ३ | १५ |
| ४. | वस्तुगताः | १० | १० | १ × १० | १० |
| | योगः | २६ | २१ | | १०० |

### ७. पाठ्यसूची

**(क) पाठ्यग्रन्थः**

१. **भट्टोजिदीक्षित,वैयाकरणसिद्धान्तकौमुदी** (चतुर्थो भागः)।

**(ख) सन्दर्भग्रन्थाः—**

**१. चक्रधरहंसनौटियाल,** ***बृहदनुवादचन्द्रिका*** ।

२. शालिग्राम सुवेदी, **स्वरवैदिकी प्रक्रिया,** रञ्जना नेपाली व्याख्या संवलिता, स्याङ्जा : स्याङ्जा साहित्य प्रतिष्ठान, वि.सं. २०७१ ।

३. मोहनप्रसादपोखेलः, **कृत्कारकप्रकाशः**, (सरलानेपालीटीकायुतः), काठमाडौँ : काष्ठमण्डप पुस्तक घर, वि.सं. २०७१ ।

# विषयः — सिद्धान्तज्योतिषम्

पाठ्यांशनाम—**व्यक्तवासनानुशीलनपूर्वकमनुपातीयसिद्धान्तो गोलपरिभाषा च**

पाठ्यांशसङ्केतः- सिज्यो.३०१

स्तरः— शास्त्री | पूर्णाङ्काः — १००

वर्षः— प्रथमः | वार्षिकः पाठ्यभारः -१६० घण्टाः

पत्रम्— प्रथमम् | साप्ताहिकः पाठ्यभारः — ६

**१. पाठ्यांशपरिचयः**

आकाशीयग्रहतारकादीनां गतिस्थित्यादिसाधनपरकं शास्त्रं सिद्धान्त-ज्योतिषं कथ्यते । ग्रहतारकाणां स्पष्टीकरणे तेषामुदयादिनिर्धारणे ग्रहाणाऽनयने च सिद्धान्तज्योतिषं ग्रहगणितस्य सिद्धान्तनिर्धारणं करोति। तेषां सिद्धान्तानामाधारेण पञ्चाङ्गं निर्मीयते। पञ्चाङ्गस्यैव आधारेण अस्माकं यज्ञकर्मानुष्ठानं व्रतपर्वादिकं च सम्पाद्यते । अतएव वेदस्य नेत्राङ्गभूतं ज्योतिषं श्रुतिषडङ्गेषु मूर्ध्नि संस्थितं मन्यते। उक्तञ्च

यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद् वेदाङ्गशास्त्राणां ज्योतिषं मूर्ध्नि संस्थितम् ॥

खगोलीयपिण्डानां गतिस्थित्यादिविवेचने, फलग्रन्थानुसारेण फलादेश-विधाने, समस्तस्य जीवस्य जगतश्च यथार्थस्थितिज्ञाने, भविष्यफलवर्णने, व्यवहारोपयोगिविषयाणां विश्लेषणे, शुभमुहूर्तनिर्धारणे,वर्षफलवर्णने च आधार-भूतगणितक्रियासम्पादनाय अस्यैव सिद्धान्तज्योतिषस्य गणितक्रियाया एव सर्वप्रथमं प्रयोगो भवति।

सिद्धान्तज्योतिषद्वारा ग्रहगणितसिद्धान्तनिर्धारणार्थं व्यक्तगणितवासना-नुशीलनमुपादेयसिद्धान्तानां परिज्ञानं खगोलीय क्षेत्राणां यथार्थस्थितिपरिज्ञानञ्च परमोपयोगिकं मन्यते । एनमेव सिद्धान्तमाधारीकृत्य एष पाठ्यक्रमो निर्धारितः । सिद्धान्तज्योतिषं पिपठिष्यमाणानां छात्राणां कृते एष पाठ्यक्रमः परमोपयोगी भविष्यतीति सुतरामाशास्यते।

स्कन्धत्रयात्मकं समस्तमपि ज्योतिषशास्त्रं प्रथममाकाशीयपिण्डादीनां गतिस्थित्यादिकं निर्धार्य तेषामेवाऽऽधारेण विश्वह्माण्डस्य वस्तुस्थितिं निर्धारयति । आकाशीयस्थितिनिर्धारणाय सिद्धान्त-ज्योतिषे बहव उपायाः प्रयुज्यन्ते। तेषामुपायानां परिज्ञानं व्यक्ताव्यक्तगणित आधारितम् । अतएव सिद्धान्तज्योतिषाध्ययनात् पूर्वं व्यक्तवासनापरिज्ञान-मनुपातीयसिद्धान्तानां परिशीलनं खगोलीयदृश्यपदार्थानां क्षेत्राणाञ्च परिचयज्ञानं परमावश्यकमिति एतमेव विषयत्रयं समाविश्य एष पाठ्यक्रमो निर्धारितः।

**२. पाठ्यांशसामान्योद्देश्यानि**

अस्य पाठ्यक्रमस्य पठनेन सामान्यतश्छात्रवर्गा अधोऽङ्कितविषयेषु समर्था भविष्यन्ति।

- सिद्धान्त-ज्योतिषसम्बद्ध सामान्य विषय विमर्शने।

- व्यक्तवासनानुशीलने।
- अनुपातीयसिद्धान्तानां विवेथने।
- खगोलीयक्षेत्राणां स्थानानाञ्च लक्षणपरिचयप्रदाने च।

**३. पाठ्यांशस्य विशिष्येद्देश्यानि पाठ्यबिषयसंयोजनञ्च**

| प्रकरणानि | प्रकरणगतविशिष्येद्देश्यम् | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| क | सिद्धान्तज्योतिषाध्ययनात् प्राग्ज्ञातव्यविषयावगमे | सिद्धान्तज्योतिष सम्बद्ध-विषानुवृत्ति विमर्शनम् | १० | २० |
| ख | अस्य पाठ्यांशस्य अध्ययनेनच्छात्रवर्गाः अधोङ्कितविषयेषु विशिष्टज्ञानवन्तो भविष्यन्ति -भास्करकृतव्यक्त ( पाटी) गणित (लीलावती नाम ग्रन्थ ) स्य भारमानादीनां परिभाषाव्याख्याने। तेषामाधुनिक भारमानादीनां प्रचलितभारमानादिना सह समीक्षणे।भास्करकृत व्यक्त ( पाटी ) गणित (लीलावती नाम ग्रन्थ ) स्य समग्रसूत्राणां वासनाप्रतिपादने। | भास्करकृत व्यक्त ( पाटी) गणित - लीलावत्या निर्धारिता विषयाः। | ४० | ६० |
| ग | रेखागणितस्य परिभाषानुरूप पञ्चमाध्यायनिर्दिष्टानां परिभाषाणां विवेचाने सम्बद्धसाध्येषु तेषां प्रयोगे। रेखागणितस्य ६ अध्यायान्तर्गतनिष्पत्ति ( अनुपात) गतसिद्धान्तानामुपपत्या प्रस्फुटीकरणे। | रेखागणितस्य निर्धारिता विषयाः। | ३० | ४५ |
| घ | सिद्धान्तज्योतिषसम्बद्धखगोलीयविषयाणां लक्षण निरूपणे। खगोलीयक्षेत्रसम्बद्धविषयवस्तूनां परिभाषा (परिचय ) प्रकटने। | गोलपरिभाषायाः निर्धारिता विषयाः। | २० | ३५ |

**४. पाठ्यवस्तुविवरणम्**

**'क' प्रकरणे**

**सिद्धान्तज्योतिष सम्बद्ध-विषानुवृत्ति विमर्शनम्**

१)प्राचीनार्वाचीनज्योतिषलक्षणपरिज्ञानम् २) सिद्धान्त-सहिंता-जातक-ज्योतिषविषयाणां स्वरूपप्रतिपादनम् तेषां मध्ये सिद्धान्तज्योतिषस्यौत्कर्ष्यप्रतिपादनम् ३) तिथि-

वार-नक्षत्र-योगानां समुत्पत्तिकारणवर्णनम्, तेषां क्षयवृद्धित्वे हेतुत्वप्रशर्दनम् ४)ग्रहाणां वक्रमार्गत्वे नव्यमतानुशीलनम् ५) वेलान्तर-देशान्तर-चरान्तर-संस्काराणामौचित्यप्रदर्शनम् ६) अभीष्टदेशीयसूर्योदयेष्टकालसाधनम् पञ्चाङ्गतोऽभीष्टकालिकग्रहस्फुटीकरणम् ७) ग्रहाणामुदयास्तत्वेहेतुत्व निदर्शनम् ८) अभीष्टदेशीयराश्युदयसाधनपूर्वकं प्रथम-दशम-लग्नाऽऽनयनम् ९) रवीन्दुग्रहणयोर्यथार्थसिथतिवर्णनम् १०) चन्द्रसूर्ययोः पञ्चताराणाञ्चपरिचयप्रकाशनम् ११) सिद्धान्तज्योतिषाध्ययने व्यक्ताव्यक्तगणितावगमौचित्यप्रदर्शनम् १२) एकदेशीय-तिथी-नक्षत्रयोगानाभीष्टदेशीयकरणम्।

**'ख'प्रकरणे**

**अ) भास्करकृत व्यक्त ( पाटी) गणित ( लीलावती नाम ग्रन्थ ) स्य प्राचीना परिभाषाः**

१) प्राचीनमुद्रापरिभाषाः (२) भारमापनपरिभाषाः(।३) सुवर्णमापने माषादीनां मानानि (४) दूरत्वमापने अङ्गुलादीनां मानानि (५) घनहस्तादीनां मानानि ( ६) द्रोणादीनां मानानि (७) प्राचीनपरिभाषाणां प्रचलिताऽऽधुनिक -भारमानादिभिः समीक्षणम्।

**आ) भास्करकृत व्यक्त( पाटी )गणित ( लीलावती नाम ग्रन्थ) स्य निम्नविषयाणां वासनानुशीलनम्**

१) अभिन्नपरिकर्माष्टकम्

(२) भागप्रभागजातिविश्लेषणं भिन्नपरिकर्माष्टकञ्च। ३) शून्यपरिकर्माष्टकमिष्टकर्मवर्गकर्मगुणकर्माणि च।

४) त्रैराशिकपञ्चराश्यादीनां भाण्डप्रतिभाण्ड मिश्रव्यवहारोपयोगिनां वाप्यादिप्रकरण-गणितसम्बद्रानां क्रयविक्रय रत्नमिश्रसुवर्णगणितच्छन्दश्चित्यादिसाधनोपयोगि विषयाणां सूत्राणि।

५) सङ्कलितसंकलितैक्यकृतियोग घनयोगान्त्यघनमध्यघन सर्वघनाऽनयनप्रकाराः।

६) मुखचयगच्छाऽऽनयनरीतयः।

७) गुणोत्तरश्रेढीविषयकविधिप्रतिपादनोपायाः।

८) समविषमादिवृत्तभेदपरिगणनोपयोगिविषयाः।

९) जात्यत्रिभुजलक्षणं सप्रकारान्तरं तत्साधनञ्च।

१०) आसन्नमूलाऽऽनयनविधिः।

११) भुजकोटिकर्णानामभिन्नमानाऽऽनयनम्।

१२) कर्णकोटियुतेर्भुजस्य च ज्ञानात् कर्णकोट्योः पृथगानयनम्।

१३) भुजकर्णयोगे कोट्याञ्च ज्ञातायां तत्साधनप्रकारः।

१४) कोटिकर्णान्तरे भुजे च दृष्टे कोटिकर्णसाधनम्।

१५) कोट्यैकदेशेन युते कर्णे भुजे च ज्ञाते कोटिकर्णाऽऽनयनप्रकारः।

१६) भुजकोट्योर्योगे कर्णे च ज्ञाते भुजकोट्योः पृथगानयनम्।

१७) त्रयाणां भुजानां ज्ञानात् त्रिभुजे आवाधालम्बक्षेत्रफलसाधनप्रकारः।

१८) अक्षेत्रलक्षणम्
१९) त्रिभुजचतुर्भुजयोः फलानयनप्रकारः।
२०) समचतुर्भुजायतक्षेत्रयोः फलसाधने उपयुक्ता रीतिः।
२१) फलावलम्बश्रुतीनां द्वितीयकर्णस्य च साधनप्रकारः।
२२) इष्टकर्णकल्पने विशेषः।
२३) विषमचतुर्भुजफलविश्लेषणविधिः।
२४) समानलम्बचतुर्भुजस्य आबाधादिज्ञाने उपयुक्ता रीतयः।
२५) ब्रह्मगुप्तस्य नियतकर्णसाधनप्रकारस्य विश्लेषणम्।
२६) अभीष्टजात्यद्वयबाहुकोट्य इत्यादिसूत्रीयौचित्य प्रतिपादनम्।
२७) समानान्तरचतुर्भुजसमानलम्बचतुर्भुजयोः फलाऽऽनयनम्।
२८) सन्ध्याद्यानयनप्रकाराः।
२९) कर्णयोर्योगादधो लम्बज्ञानोपायः।
३०) सूच्यावाधालम्बभुजज्ञानोपायाः।
३१) वृत्तक्षेत्रफलगोलपृष्ठफलगोलघनफलाऽऽनयनेषु सप्रकारान्ता युक्तयः।
३२) शरजीवाव्यासाऽनयनोपायाः।
३३) वृत्तान्तर्गतत्र्यस्रादिनवास्रान्तक्षेत्राणां भुजसाधने उपयुक्ता रीतिः।
३४) स्थूलज्यासाधनविधिः।
३५) चापसाधनविधिः।
३६) खातघनफलाऽऽनयनप्रकारः।
३७) सूचीखातघनफलाऽऽनयनप्रकारः।
३८) चितिव्यवहारसम्बद्धसूत्राणि।
३९) क्रकचव्यवहारसम्बद्धसूत्राणि।
४०) राशिव्यवहारसम्बद्धसूत्राणि।
४१) छायाव्यवहारे प्रयोज्यमानसूत्राणि
४२) त्रैराशि प्रशंसा।
४३) कुट्टक(प्रयोज्य सूत्राणि।
४४) स्थिरकुट्टक संश्लिष्टकुट्टकप्रयोज्यसूत्राणि।
४५) अङ्कपाशगणिते प्रयोज्यमानानि सूत्राणि
४६) अङ्कपाशगणितस्य गूढत्वप्रतिपादनम्।
४७) लीलावत्या ( पाटीगणितस्य ) प्रशंसा च।

**'ग'प्रकरणे**

**अ) रेखागणितस्य परिभाषानुरूपपञ्चमाध्यायस्य परिभाषानुशीलनम्**

१) निष्पत्यनुपातयोः परिभाषा।
२) अनुपातीयराशीनां साजात्यज्ञानम्।

३) अनुपातीयेषु चतुर्षु राशिषु तुल्यगुणकगुणितयोः प्रथमद्वितीययोः यः सम्बन्धः स एव अभीष्टगुणगुणितयोस्तृतीयचतुर्थयोरपि सम्बन्धः।

४) योगान्तरनिष्पत्तिः।

५) उत्क्रमनिष्पत्तिः।

६) एकान्तरनिष्पत्तिः।

७) अनुपातीयराशिषु भाज्ययोगहरयोगयोरनुपातस्य तुल्यत्वप्रतिपादनञ्च।

**आ) रेखागणितस्य ६ अध्यायान्तर्गतसाध्यानां सोपपत्तिकं समाधानम्।**

१) तुल्यलम्बत्रिभुजयोः समानान्तरचतुर्भुयोश्च या निष्पत्तिः सैव तदाधारयोरपि भवतीति प्रतिपादनम्।

२) त्रिभुज-तद्भुजसम्बद्धानुपातानुशीलनम् ।

३) रेखातत्खण्डानुपातविमर्शनम्।

४) समानान्तरचतुर्भुजयोः मिथः सम्बन्ध विचारः।

५) सजातीयबहुभुजनिर्माणप्रकारः।

६) त्रिभुजयोः सम्बन्धस्तद्भुजसम्बन्धेन तुल्यो भवतीति प्रतिपादनम्।

७) सजातीयबहुभुजक्षेत्रेषु तद्भुजफलयोः परस्परसम्बन्धविमर्शः।

८) क्षेत्राणां परस्परसाजात्यनिरुपणम्।

९) रेखाक्षेत्रयोः परस्परसम्बन्ध विचारः।

१०) समानान्तरचतुर्भुजयोस्तदीयभुजघातयोः सम्बन्धविचारः।

११) कर्णाश्रितसमानान्तरचतुर्भुजनिष्पत्तिविचारः।

१२) मध्यमसम्बन्धिरेखान्वेषणे युक्तिः।

१३) जात्यत्रिभुजे भुजकोटिकर्णानां तद्गतसजातीयक्षेत्राणाञ्च सम्बन्धविमर्शः।

१४) त्रिभुजद्वये यदि मिथो द्वयोर्भुजयोः समानान्तरत्वं तुल्यनिष्पत्तिकं च भवेत् तदा तयोराधारैककत्वञ्च भवतीति प्रतिपादनम्

१५) वृत्तसम्बद्धानुपातविषयकविमर्शश्च।

**'घ'प्रकरणे**

**गोलपरिभाषज्ञानम्**

**अ) खगोलीयवृत्तपरिचयः**

(१) गोलः (२) महद्वृत्तम् (३) लघुवृत्तम् (४) पूर्वापरवृत्तम् (५) याम्योत्तरवृत्तम् (६) नाडीवृत्तम् (७) क्रान्तिवृत्तम् (८) क्षितिजवृत्तम् (९) अहोरात्रवृत्तम् (१०) कोणवृत्तम् (११) उन्मण्डलवृत्तम् (१२) ग्रहगतध्रुवप्रोतवृत्तम् १३) ग्रहक्षितिजवृत्तम् (१४) कदम्बभ्रमणवृत्तम् (१५) दृक्क्षेपवृत्तम् (१६) दृग्वृत्तम् (१७) विमण्डलम् (१८) कक्षावृत्तम् (१९) प्रतिवृत्तम् (२०) नीचोच्चवृत्तञ्च।

**आ) खगोलीयविशिष्टस्थानानां लक्षणानि**

(१) पृष्ठकेन्द्रम् (२) गर्भकेन्द्रम् (३) खस्वस्तिकम् (४) निरक्षखस्वस्तिकम् (५) अधः खस्वस्तिकम् (६) अधोनिरक्षखस्वस्तिकम् (७) समस्थानम् (८) कदम्बस्थानम् (९) पूर्वगोलसन्धिः (१०) पश्चिमगोलसन्धिः (११) क्रान्तिपातः १२) स्वपृष्ठस्थानम् (१३) भूकेन्द्रञ्च

**इ) खगोलीयविशिष्टविषयाणां परिभाषा**

१) अक्षांशाः २) लम्बांशाः ३) नतांशाः४) उन्नतांशाः५) परमक्रान्त्यंशाः६) विक्षेपपातः७) प्रथमलग्नम् ८) चतुर्थलग्नम् (९) अस्तलग्नम् (१०) दशमलग्नम् ११) हारः १२) ग्रहस्थानम् १३) नक्षत्रस्थानम् १४) मध्यमशरः १५) स्पष्टशरः १६)मध्यमा क्रान्तिः १७) स्पष्टा क्रान्तिः १८) चरांशाः १९) भुजांशाः २०) कोट्यंशाः २१) अग्रांशाः २२) दृगंशाः २३) दिगंशाः २४) वित्रिभलग्नम् २५) मध्यशङ्कुः २६) कोणशङ्कुः २७) शङ्कुः २८) शङ्कुतलम् २९) पलभा ३०) पलकर्णः३१) दृग्ज्या ३२) दिग्ज्या ३३) चरज्या ३४) भुजज्या ३५) कोटिज्या ३६) अग्रा ३७) क्रान्तिज्या ३८) दृग्गतिः ३९) दृक्क्षेपः ४०) लग्नाग्रा ४१) उत्क्रमज्या ४२) द्युज्या ४३) कुज्या ४४) तद्धृतिः ४५) हृतिः४६) तद्वृत्यूर्धखण्डम् ४७) इष्टहृतिः ४८) यष्टिः ४९) यष्टितलम् ५०) अन्त्या ५१) नतिः ५२) लम्बनम् ५३) आयनवलनम् ५४) आक्षवलनम् ५५) स्पष्टवलनञ्च

**ई) खगोलीयविशिष्टसूत्रपरिचयः**

१) ऊर्ध्वाधरसूत्रम् २) निरक्षोर्ध्वाधरसूत्रम् ३) पूर्वापरसूत्रम् ४) समसूत्रम् ५) ध्रुवसूत्रम् ६) कोणसूत्रम् ७) दृक्कुजसूत्रम् ८) उदयास्तसूत्रम् ९) निरक्षोदयास्तसूत्रम्

**उ) भूगोलीयविशिष्टविषयपरिज्ञानम्**

१) भूगोलस्वरूपम् २) भूपरिधिः ३) स्पष्टभूपरिधिः ४) स्पष्टभूव्यासः ५) देशान्तरम् ६) भूमध्यरेखा७) निरक्षदेशाः ८) स्वनिरक्षदेशः९) उत्तरगोलः १०) दक्षिणगोलः११) उत्तरायणम् १२)दक्षिणायनम् १३)निरक्षदेशीयराश्युदयासवः १४) स्वदेशीयराश्युदयासवः १५) दृक्कर्मप्रयोजनञ्च।

**५. शिक्षणविधयः शैक्षिकसामग्री च**

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकेन्द्रिता विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः। तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया। साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते। तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते। शिक्षकप्रशिक्षण-व्यवस्थापि तत्रापेक्षते। तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियतावश्यमवलम्बनीया।

**६. मूल्याङ्कनविधिः**

मूल्याङ्कनं द्विधा विभक्तमस्ति — आन्तरिकं (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्य

सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायाम् आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशदङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिक–मूल्याङ्कनस्याङ्कानां नें सं.वि. परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराः निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि ग्रहीतुं शक्यते ।

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माण–सारणी**

| प्रकरणानि क,ख,ग | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २ × १२ = २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६ ×७ = ४२ |
| | व्याख्यात्मकाः | ४ | ३ | ३ × ८ = २४ |
| | वस्तुगताः | १० | १० | १० ×१ = १० |
| | | २६ | २१ | १०० |

## ६. पाठ्यसूची

**(क) पाठ्यग्रन्थाः**

१) लीलावती भास्कराचार्य रचिता

२) रेखागणितम ( ५ ६ अध्यायौ ) सीतारामझा कृतम्

३) गोलपरिभाषा वैद्यनाथ पाण्डेय रचिता

४) लघुजातक पद्धतिः वि डी कर्णशास्त्री

५) ज्योतिषशास्त्रेतिहासः लोकमणि दाहाल

**ख) सहायकग्रन्थः**

१.जयन्त आचार्यः, वसन्त आचार्य, सौरार्यब्राह्मपक्षीय तिथिगणितम् गोलपरिभाषासहितम्, आचार्य अनुसन्धान केन्द्र, लाजिम्पाट प्रकाशन, वि.सं. २०६७ ।

# विषयः सिद्धान्तज्योतिषम्

पाठ्यांशनाम—**त्रिकोणमितिगणितम्, गोलीयोत्रसम्बद्धसूत्राणां प्रमुखाः सिद्धान्ताः, बीजगणितसूत्रोपपत्तिः क्षेत्रमितिश्च** पाठ्यांशसङ्केतःज्यो.३०२

स्तरः— शास्त्री पूर्णाङ्काः **— १००**

वर्षः— प्रथम वार्षिकः पाठ्यभारः – १६० घण्टाः

पत्रम्— द्वितीय साप्ताहिकः पाठ्यभारः **— ६**

**१. पाठ्यांशपरिचयः**

ज्योतिःशास्त्रं वेदस्य नेत्रमस्ति। शास्त्रस्यास्य बहवो महत्वपूर्ण विषया बीजरूपेण वेदेषु प्राप्यन्ते। लक्षचतुष्टयात्मकं ज्योतिषशास्त्रं बहु विस्तृतमस्ति तच्च विभक्तम्–सहिंता, सिद्धान्तः, होरा च गणितशास्त्रमपि ज्योतिषस्यैव अङ्गमस्ति । अङ्कगणित बीजगणितरेखागणितादय सर्वेद्रपि गणितस्य अङ्गान्येव सन्ति । खगोलीयपिण्डानां गतिर्स्थित्यादिबोधनाय तथाविधगणितस्य ज्ञानंम् नितरामपेक्षितिं भवति । गणितविषय आर्यभट –ब्रह्मगुप्त–भाष्कराचार्यादिभिर्नैक(गणिताग्रन्था लिखिताः। ते एव विषया अत्र पाठ्यांशे निर्धारिता सन्ति।

चतुर्षु प्रकरणेषु विभक्ते पाठ्यक्रमेऽस्मिन् क प्रकरणे त्रिकोणमिति, ख प्रकरणे विजगणितं, ग प्रकरणे गोलीयरेखागणितं , घ प्रकरणे च त्रिधरातलीयक्षेत्राणां सोपपत्तिकगणितक्रियासम्बद्धा विषया निर्धारिता : सन्ति।

गणितस्य ज्ञानं विना ज्योतिःशास्त्रस्याध्यननसम्भवम् । निर्धारितगणितानामध्ययनेन ज्योतिशशास्त्रस्य अध्यनाय सौकर्यं स्यादिति धिया पाठ्यक्रमेऽस्मिन् गणितसम्बद्धा विषया यथा प्रकरणं विभज्य निर्धारिताः सन्ति।

**२. पाठ्यांशसामान्योद्देश्यानि**

अस्य पाठ्यांशस्याध्ययनेनच्छात्राः अधोलिखितविषयेषु क्षमा भविष्यन्ति –

- त्रैकोणमितिकसिद्धान्तानां व्याख्याने,
- गोलीयरेखागागणितीयसिद्धान्तानां प्रतिपादने,
- बीजगणितीयसूत्राणां निरूपणे,
- क्षेत्रमितेः सिद्धान्तप्रतिपादने च ।

**३.पाठ्यांशस्य विशिष्टेद्देश्यानि पाठ्यविषयसंयोजनं च**

| प्रकरणानि | प्रकरणगतविशिष्येद्देश्यानि | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| क | त्रैकोणमितिकसूत्राणामव बोधने तेषामुपयोगे च | त्रिकोणमितेर्निर्धारितविषयाः । | ३० | ४८ |
| ख | बीजगणितीयसूत्रोपपत्तिनि | विजगणितसूत्रोपपत्तिः | ३० | ४८ |

| | | | | |
|---|---|---|---|---|
| | रूपणे | | | |
| ग | गोलीयरेखागणितीयसिद्धान्तानां प्रतिपादने प्रयोगे च | गोलीयरेखागणितसिद्धान्तसम्बद्धा विषयाः। | २० | ३२ |
| घ | त्रिधरातलीयक्षेत्राणां वासनावबोधने | त्रिधरातलीयक्षेत्रवासनाः। | २० | ३२ |

## ४. पाठ्यवस्तुविवरणम्

**'क'प्रकरणे**

त्रिकोणमितिगणितस्य महत्त्वम्, ज्याकोटिज्यादीनां परिभाषा, कोणचापयोः सम्बन्धः, कोणस्य त्रैकोणमितिकसम्बन्धः स्थिरो भवतीति प्रतिपादनम्, प्रधानत्रैकोणमितिकसम्बन्धाः, त्रैकोणमितिकसम्बन्धाधारेण प्रश्नानां समाधानम्, षष्ट्यंशपद्धतिः, शतांशपद्धतिः, वृत्तीयपद्धतिः, ज्याकोटिज्यादीनां परस्परपरिणमनज्ञानम्, तेषामुदाहरणानि च, शून्यत्रिंशदंशपञ्चचत्वारिं-शत्षष्टि नवत्यंशानां ज्याकोटिज्यादिप्रमाणसाधनम् तदाधारितोदाहरणानि च, जात्यत्रिभुजगणितम्, औच्यान्तरानयनं भास्करीयोदाहरणानि च, शून्यकोणस्य त्रैकोणमितिकप्रपञ्चः, पदज्ञानं तद्वशेन धनर्णत्वज्ञानञ्च, तदाधारितोदाहरणम्, कोणानां योगान्तरज्याकोटिज्यादीनां साधनं तदुदाहरणानि च, द्वित्र्यादिगुणितानां द्वित्र्यादिविभक्तानां कोणानां ज्याकोटिज्यादिसाधानं तदुदाहरणानि च, पञ्चदशनवांशादीनां ज्यासाधनप्रकारः, त्रिभुजसाधन-प्रकारावबोधनम्, लघुरिक्थगणितम्, लघुरिक्थाधारितत्रिभुजसाधनं तदु-दाहरणानि च।

**'ख'प्रकरणे**

मङ्गलाचरणादिकम्, योगे युतिःस्यादित्यादेः, संशोध्यमानमित्यादेः, भागहारेऽपि चैवमित्यस्य, कृतिः स्वर्णयोः स्वमित्यादेश्च वासनावगतिः, शून्यषड्विधगणितविधायकसूत्राणामुपपत्तिः, अस्मिन् विकारः खहरे न राशावित्यादेरुपपत्तिः, यावत्तावत्कालकानीलकादीनां कल्पनाज्ञानम्, योगोऽन्तरं तेषु समानजात्योरित्यादेः, स्याद्रूपवर्णाभिहतौ तु इत्यादेः, द्वित्र्यादिकानामित्यादेः, तदभावितं चासमजातिघाते इत्यादेः, भागादिकं रूपवदित्यादेः, गुण्यः पृथगुणकखण्डसम इत्यादेः, भाज्यच्छेद इत्यादेः, कृतिभ्य आदायइत्यादेश्च वासनावबोधम्, करणीगणितस्य योगान्तर-गुणनभागहारवर्गवर्गमूलविधायकसूत्राणामुपपत्तिः, कुट्टकगणितपरिचय- स्तथा कुट्टकगणितप्रतिपादकसूत्राणामुपपत्तिः, वर्गप्रकृतेः परिचयस्तथा चक्रवालगणितपरिचयस्तथा तत्तद्गणितप्रतिपादकसूत्राणां वासना, एकवर्णसमीकरणोपयोगिसूत्राणामेकवर्णमध्यमाहरणविधेः प्रति-पादकानां सूत्राणाञ्चोपपत्तिः, अनेकवर्णसमीकरणमध्यमाहरणसम्बद्धसूत्राणाञ्चोप- पत्तिः, भावितगणितोपपत्तिः, उपसंहारश्लोकानां भावा-र्थावगतिश्च।

**‘ग’प्रकरणे**

सरलधरातलेनच्छेदितस्य गोलस्याऽऽकारनिरूपणम्, गोलपृष्ठस्थवृत्तस्य परिधिनिष्ठबिन्दवस्तद्वृत्तपृष्ठकेन्द्रात्समानेऽन्तरे भवन्तीति प्रतिपादनम्, वृत्तपृष्ठकेन्द्रादागतयोर्महावृत्तयोस्तस्मिन् वृत्ते यदन्तरं तत्तुल्यमेव ताभ्यां पृष्ठकेन्द्रे जनितकोणप्रमाणं भवतीति प्रतिपादनम्, व्यासाग्रगतबिन्दौ लम्बरूपस्य सरलक्षेत्रस्य एकस्मिन्नेव बिन्दौ स्पर्शो भवतीति प्रतिपादनम्, समद्विबाहुकत्रिभुजस्याऽऽधारलग्नकोणयोःसमत्वप्रतिपादनम्, चापीयत्रिभुजे आधारलग्नकोणयोः समत्वे तत्समुखभुजयोरपि समतायां कारणम्, चापीयत्रिभुजे भुजद्वययोगस्तृतीयभुजादधिको भवतीति प्रतिपादनम्, चापीयत्रिभुजस्य भुजानां संयुतेः खरसाग्निभागादल्पत्वं भवतीति प्रतिपादनम्, चापीयत्रिभुजे बृहत्कोणसम्मुखभुजोऽल्पकोणसम्मुख-भुजादधिकस्तथास्थूलभुज-सम्मुखकोणोऽल्पभुजसम्मुखकोणादधिक एव भवतीति प्रतिपादनम्, चापीयत्रिभुजकोणानां भुजानाञ्च स्पर्धित्व-प्रतिपादनम्, चापीयत्रिभुजे कोणत्रययोगविषयक विचारः, पृष्ठकेन्द्रेतर-बिन्दुतो वृत्तपरिधिं यावद गतेषु चापेषु न्यूनाधिकत्वविषयकविचारः, चापजात्ये भुजस्य खाङ्गाल्पत्वे सम्मुखकोणस्यापि खाङ्गाल्पत्वं खाङ्गाधिक( खाङ्गाधिकत्वमेव भवतीति प्रतिपादनम्, चापजात्ये भुजयोः खाङ्गाधिकत्वे खाङ्गाल्पत्वे च कर्णचापस्य खाङ्गाल्पत्वं तथा भुजयोर्मध्ये एकस्य खाङ्गाधिकत्वेऽन्यस्य न्यूनत्वे तु कर्णस्य खाङ्गाधिकत्वप्रतिपादनम्, चापीयत्रिभुजे शीर्षकोणात्कृतलम्बचापस्य त्रिभुजान्तर्गतत्वे, बहिर्गतत्वे चाधारलग्नकोणयोः खाङ्गाल्पानल्पत्वविवेकः, चापीयत्रिभुजे शीर्षकोणा-त्कृतलम्बचापस्याधारे आबाधालम्बयोरल्पत्वनिरूपणम्, बृहद्वृत्तद्वयपृष्ठ-केन्द्रगताभ्यां लघूरुवृत्ताभ्यांबृहद्वृत्तयोर्ये खण्डे भवतस्तयोस्तुल्यत्व-प्रतिपादनञ्च ।

**‘घ’प्रकरणे**

घनधरातलस्य, धरातलीयलम्बस्य, समानान्तरधरातलस्य घनकोणस्य च परिभाषा, एकस्या रेखाया एकखण्डमेकस्मिन् धरातलेऽन्यखण्डमन्यस्मिन् धरातले न भवतीति प्रतिपादनम्, एकधरातलीयरेखासम्बद्धविचारः, धरातले लम्बकरणसिद्धान्तः, यदि द्वे रेखे एकस्मिन् धरातले लम्बरूपे तदा ते मिथः समानान्तरे, यदि च समानान्तरे तदा ते लम्बरूपे भवत इति प्रतिपादनम् , धरातलीयरेखाणां समानान्तरत्वे धरातलयोरपि समानान्तरत्वनिरूपणम्, धरातले बहिर्गतबिन्दुतो लम्बकरणोपायः, एकस्माद् बिन्दुत एक एव लम्बो भवतीति प्रतिपादनम्, धरातलीयरेखाणां समानान्तरत्वसाधने युक्तिः, समानान्तधरातलैर्छेदितयोः रेखयोः खण्डेषु निष्पत्तितुल्यत्वप्रतिपादनम्, धरातलयोर्मिथोलम्बत्वे तद्गतरेखयोरपि परस्परलम्बत्वप्रतिपादनम्, घनकोणसम्बद्धविचारः, वृत्तान्तर्गतसजातीयक्षेत्रसम्बद्धविचारः, वृत्तयोः सम्बन्धस्तद्व्यासवर्गसम्बन्धेन तुल्यो भवतीति प्रतिपादनञ्च ।

## ४. शिक्षणविधयः शैक्षिकसामग्री च

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकेन्द्रिता विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियतावश्यमवलम्बनीया ।

## ५. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति – आन्तरिकं (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वित-कार्ययोजनायाम् आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यं कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशदङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नें सं.वि. परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराः निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि ग्रहीतुं शक्यते ।

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माण–सारणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| क,ख,ग,घ,ङ | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २ × १२ = २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६ ×७ = ४२ |
| | व्याख्यात्मकाः | ४ | ३ | ३ × ८ = २४ |
| | वस्तुगताः | १० | १० | १० ×१ = १० |
| | | २६ | २१ | १०० |

**६. पाठ्यसूची**

**(क) पाठ्यग्रन्थाः**

१. बलदेवमिश्र, सरलत्रिकोणमिति
२. नीलाम्बर, गालीयरेखागणितम्
३. भास्कराचार्य, बीजगणितम्
४. क्षेत्रमिति ( ११, १२ अध्यायौ )

# विषयः — फलितज्योतिषम्

पाठ्यांशनाम—**जातकशास्त्रम्**
स्तरः— शास्त्री
खण्डः— प्रथमः
पत्रम्— प्रथमम्

पाठ्यांशसङ्केतः—फ .ज्यौ ३०१
पूर्णाङ्काः— १००
वार्षिकः पाठ्यभारः—१६० घण्टाः
साप्ताहिकः पाठ्यभारः— ६

**१. पाठ्यांशपरिचयः**

वेदाङ्गभूतं ज्योतिषशास्त्रं सिद्धान्तसंहिताहोराभेदेन त्रिधा विभक्तमस्ति । तत्र फलितज्योतिषस्य शास्त्रिस्तरीयपाठ्यक्रमे त्रिस्कन्धज्यौतिषं समाविष्टमस्ति । परन्त्वत्र शास्त्रिकक्षायाः प्रथमे वर्षे प्रथमे पत्रे होराशास्त्रान्तर्गतं जातकशास्त्रमवलम्ब्य एष पाठ्यक्रमो निर्धारितः ।

तत्र जन्मकाले गणितदृष्ट्या आकाशे दृश्यमानानां ग्रहनक्षत्रादीनामाधारेण फलविवेचनविधायकं शास्त्रं जातकशास्त्रमभिधीयते । जातकस्य शुभाशुभ-फलादेशविधायकं जातकशास्त्रं समग्रफलादेशस्य सिद्धान्तनिर्देशनं करोति । जातकशास्त्रं व्यक्तिविशेषे संघट्यमानफलादेशार्थं मूलसिद्धान्तभूतमस्ति ।

अयं पाठ्यक्रमो मूलतः फलितज्यौतिषस्य जातकशाखासम्बद्धो वर्तते । द्वादशीं कक्षां तत्समकक्षामन्यां वा परीक्षामुत्तीर्य नेपालसंस्कृतविश्वविद्यालयान्तर्गतेषु विद्यापीठेषु फलितज्यौतिषविषयमवलम्ब्य शास्त्रिकक्षायां पिपठिषूणां छात्राणां कृते जातक-शास्त्रशिक्षणाय तत्र प्रथमपत्रस्य कृते निर्धारितोऽयं पाठ्यांशः पञ्चसु प्रकरणेषु विभक्तोऽस्ति ।

**२. पाठ्यांशस्य सामान्योद्देश्यानि**

पाठ्यांशस्यास्याध्ययनेनच्छात्रा अधस्तनविषयेषु समर्था भविष्यन्ति-

(क) जन्मपत्रिनिर्माणसिद्धान्तस्याधारभूतज्ञानप्राप्तये,
(ख) स्तरीय-जन्मपत्रिका-निर्माणे,
(ग) जातकशास्त्राधारेण फलादेशसिद्धान्तपरिज्ञाने,
(घ) ग्रहजनितयोगानां समीक्षणे,
(ङ) जातकस्य शुभाशुभफलवर्णने च ।

**३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च**

| **प्रकरणानि** | **प्रकरणगतविशिष्टोद्देश्यानि-** एतत्प्रकरणनिर्दिष्टपाठ्यांशस्याध्ययनेन छात्रा अधोऽङ्कितविषयेषु विशिष्टज्ञानवन्तो भविष्यन्ति | **पाठ्यविषयाः** | **अङ्काः** | **पाठघण्टाः** |
|---|---|---|---|---|
| क | (१) पञ्चाङ्गपरिचयप्रदाने,<br>(२) नक्षत्रचरणानुसारेण | ज्योतिषशब्दव्युत्पत्तितो ग्रहाणां | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | राशिविभागव्याख्याने,<br>(३) अष्टकूटपरिज्ञाने,<br>(४) तिथिकरणयोगनक्षत्राणां स्वामिनः परिज्ञाने | बालादिदीप्ताद्यवस्था-परिज्ञानञ्च इत्यन्ता निर्धारिता विषयाः। | | |
| ख | (१) वेलान्तरचरान्तरसंस्कारपूर्वकं दिनरात्रिमानसाधने,<br>(२) अक्षांशदेशान्तरसंस्कार-पूर्वकमिष्टघट्यादिसाधने,<br>(३) जन्मनक्षत्रस्य भुक्तभोग्यघट्यादिसाधने,<br>(४) ग्रहस्पष्टीकरणे,<br>(५) ससन्धिद्वादशभावसाधने,<br>(६) षड्वर्गकुण्डलीनिर्माणे,<br>(७) विंशोत्तरीभिागीयोगिनीदशासु आद्यदशासाधने,<br>(८) दशाया भुक्तभोग्यवर्षादिसाधने दशान्तर्दशासाधने च,<br>(९) अनेन क्रियात्मकेनाध्ययनेन स्तरीयजन्मपत्रिका-निर्माणे, | अक्षांशादितो ग्रहशान्तिपरिचयपर्यन्ता निर्धारिता विषयाः। | २० | ३२ |
| ग | (१) राशि-ग्रहप्रभेदपरिज्ञाने,<br>(२) वियोनिजन्मपरिशीलने,<br>(३) निषेकसूतिकारिष्ट्यायुर्दाय-व्याख्याने,<br>(४) दशान्तर्दशाष्टकवर्गविवेचने,<br>(५) कर्माजीवविश्लेषणे,। | होराशब्दस्य व्युत्पत्तिज्ञानाद् धनागमज्ञानपर्यन्ता निर्धारिता विषयाः | २० | ३२ |
| घ | (१) राजयोगपरिशीलने,<br>(२) नाभसचन्द्रद्विग्रहयोगपरिज्ञाने,<br>(३) प्रव्रज्यायोगविश्लेषणे,<br>(४) ऋक्ष-ग्रह-राशिशील-दृष्टिफल-भावफलविश्लेषणे। | राजयोगविमर्शतः सूर्यादिग्रहेषु जातस्य स्वरूपादिविवेचनपर्यन्ता निर्धारिता विषयाः।। | २० | ३२ |
| ङ | (१) आश्रययोगवर्णने, | एकादिवृद्ध्या | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | (२) प्रकीर्णसम्बद्धविषयविश्लेषणे, (३) अनिष्टपरिशीलने, (४) स्त्रीजातकविवेचने, (५) नष्टजातकव्याख्याने, (६) निर्याणसम्बद्धविषयसमीक्षणे, | स्वगृहस्थानां मित्रक्षेत्रगानाञ्च ग्रहाणां पृथक् पृथक् फलानि इत्यतो ग्रन्थस्य निर्विघ्नपरिसमाप्तौ विद्वत्प्रणामाञ्जलयश्च इति पर्यन्ता निर्धारिता विषयाः ॥ | | |
| | | योगः | १०० | १६० |

**द्रष्टव्यम्**

सर्वेभ्यः प्रकरणेभ्यः पृथक् पृथक् प्रश्ना नैव प्रष्टव्या भवन्ति, अपितु प्रश्नपत्रनिर्माण-सरणीमनुसृत्य समष्टिरूपेण प्रश्नाः पृच्छ्यन्त ।

**४. पाठ्यवस्तुविवरणम्**

**'क' प्रकरणे**

(१) ज्योतिषशब्दव्युत्पत्तिः, ज्योतिषशास्त्रप्रयोजनम्, ज्योतिषशाखापरिचयश्च,
(२) पञ्चाङ्गपरिचये तिथि-वार-नक्षत्र-योग-करणपरिचयः,
(३) अष्टकूट- वर्ण-वश्य-तारा-योनि-ग्रहमैत्रक-गणमैत्र-भकूट-नाडीपरिचयः,
(४) घातविषयसम्बद्धपरिचयः,
(५) कालमानम्,
(६) संवत्सरायनर्तु-मास-पक्षाणां परिचयः,
(७) तिथिस्वामि-तिथिवृद्धि-तिथिक्षय-नन्दादितिथिपरिचयः,
(८) करणपरिचयः,
(९) वारपरिचयः,
(१०) नक्षत्रपरिचयः,
(११) नक्षत्रपादपरिचयः,
(१२) राशिविभागज्ञानम्,
(१३) योग-स्वामिपरिज्ञानम्, अशुभयोगपरिहारश्च,
(१४) ग्रहकक्षासम्बद्धविषयपरिचयः,
(१५) ग्रहाणामवस्थापरिचयः ।

**'ख' प्रकरणे**

(१) अक्षांश-देशान्तर-वेलान्तर-चरान्तर-चरखण्ड-पलभा-क्रान्ति-सूर्योदय-सूर्यास्त-दिनमान-रात्रिमानानि,
(२) स्थानीयेष्टघटिकासाधनम्,
(३) जन्मनक्षत्रस्य भुक्तभोग्यघटिकासाधनम्,

(४) चन्द्रस्पष्टीकरणम्,
(५) एकदेशीयपञ्चाङ्गाधारेण स्थानीयपञ्चाङ्गनिर्माणम्,
(६) अहर्गणपरिचयः, अयनांशसाधनञ्च,
(७) सूर्यादिग्रहाणां स्पष्टीकरणम्,
(८) लङ्कोदयमान-स्वोदयमान-नतज्ञानानि,
(९) प्रथमलग्न-दशमलग्नसहितं ससन्धिद्वादशभावस्पष्टीकरणम्,
(१०) चलितचक्रनिर्माणम्,
(११) क्षेत्र-होरा-द्रेष्काण-नवांश-द्वादशांश-त्रिंशांशज्ञानपूर्वकं षड्वर्गकुण्डलीनिर्माणम्,
(१२) दशाप्रसङ्गे विंशोत्तरीय-त्रिभागी-योगिनीदशानामाद्यदशासाधनम्,
(१३) दशाया भुक्तभोग्यसाधनम्,
(१४) दशान्तर्दशासाधनम्,
(१५) कालचक्रदशापरिचयः,
(१६) स्तरीयजन्मपत्रिकानिर्माणम्, ग्रहशान्तिपरिचयश्च।

**'ग' प्रकरणे**

(१) होराशब्दस्य व्युत्पत्तिज्ञानम्,
(२) कालपुरुषाङ्गविभागज्ञानम्,
(३) राशिस्वरूपम्,
(४) नवांश-द्वादशांश-त्रिंशांश-होरा-द्रेष्काण-क्षेत्रञ्चैतेषां षड्वर्गकथनम्,
(५) राशीनां दिन-रात्रि-पृष्ठोदय-शीर्षोदय-क्रूर-सौम्य-स्त्री-पुरुषसंज्ञापरिज्ञानम्,
(६) ग्रहाणामुच्च-नीच-वर्गोत्तम-मूलत्रिकोणानि,
(७) तन्वादिद्वादशभावानां संज्ञाः, नामान्तराणि च,
(८) केन्द्र-पणफरापोक्लिम-त्रिकोणानां नामानि,
(९) लग्नादीनां बलाबल-परिज्ञानम्, राशीनां वर्णज्ञानञ्च,
(१०) कालपुरुषस्य विभागकथनम्,
(११) ग्रहाणां नामान्तर-वर्ण-स्वामि-दिगीश-सौम्य-पापत्वपरिज्ञानम्,
(१२) ग्रहाणां पुं-स्त्री-क्लिबसंज्ञानम्, पञ्चमहाभूताधिपत्यञ्च,
(१३) ग्रहाणां ब्राह्मणादि-वर्णाधिपत्यं सत्वादि-गुणविभागश्च,
(१४) सूर्य-चन्द्र-भौम-बुध-गुरु-शुक्र-शनीनां स्वरूपपरिज्ञानम्, तेषां धातु-स्थान-वस्त्र-द्रव्यर्तुज्ञानञ्च,
(१५) ग्रहाणां दृष्टि-काल-रस-नैसर्गिक-मित्रामित्रसम-तात्कालिक-मित्रामित्रकथनम्, पञ्चधामैत्र्यादिज्ञानञ्च,
(१६) ग्रहाणां स्थान-दिक्-चेष्टा-काल-नैसर्गिकबलपरिज्ञानम्,
(१७) वियोनिजन्मज्ञानम्,
(१८) वियोनिजन्मज्ञाने योगान्तराणि,

(१९) वियोनिजन्मनि चतुष्पदानामङ्ग-विभागवर्णनम्, तत्र राशिविभागज्ञानम्, तद्वर्णज्ञानञ्च,
(२०) वियोनिजन्मपरिज्ञानम्, तत्र जल-स्थल-पक्षि-वृक्षविशेषपरिज्ञानञ्च,
(२१) स्त्रीणां गर्भधारणयोग्यर्तुकालकथनम्,
(२२) स्त्री-पुरुषसंयोगे मैथुनप्रकारवर्णनम्,
(२३) गर्भसम्भवासम्भवत्वज्ञानम्,
(२४) आधानकालवशादाप्रसवावधिशुभाशुभत्वपरिज्ञानम्,
(२५) आधानकालिकलग्नात् पित्रादीनां शुभाशुभत्वज्ञानम्,
(२६) गर्भिणीमरणयोग-गर्भस्रावयोगज्ञानम्, तत्र शस्त्रेण मृत्युयोगपरिज्ञानञ्च,
(२७) गर्भपुष्टिज्ञानम्,
(२८) स्त्री-पुं-यमलजन्मज्ञानम्, पुं-स्त्री-क्लिबजन्मयोगान्तराणि,
(२९) बहुगर्भयोगास्तत्र द्वित्रादिगर्भसम्भवयोगाः,
(३०) गर्भस्वरूपम्, तन्मासाधिपतयश्च,
(३१) विकृताङ्गयोगः,
(३२) सदन्त-जन्मयोगाः,
(३३) वामनाङ्गहीनयोगाः, अन्ध-काणयोगाश्च,
(३४) प्रसवकालज्ञानम्, बहुवर्षगर्भधारणयोगपरिज्ञानञ्च,
(३५) जन्मलग्नात् पितुः परोक्षेऽपरोक्षे वा जन्मज्ञानम्,
(३६) सर्पैकजरायुनालवेष्टित-कोशवेष्टितजन्मज्ञानम्,
(३७) यमलयोगः,
(३८) जारजात-पितृबन्धनयोगपरिज्ञानम्,
(३९) पोतोदक-बन्धनागारावट-क्रीडाभवन-देवालय-श्मशान-रम्यप्रदेशाग्निशाला-नृप-देवगृहादिषु प्रसवज्ञानम्, जन्मस्थानविचारः,
(४०) मात्रा त्यक्तो दीर्घायु-सुखी च येन ग्रहयोगेन भवति जातकस्तज्ज्ञानम्,
(४१) प्रसवगृहज्ञानम्,
(४२) प्रसवकाले दीपसम्भवासम्भवज्ञानम्,
(४३) सूतिकागृहस्य स्वरूपपरिज्ञानम्, सूतिकागृहस्य दिग्ज्ञानम्, सूतकागृहे सूतिकाशयनज्ञानञ्च,
(४४) उपसूतिका-सङ्ख्याज्ञानम्,
(४५) जातकस्य स्वरूपज्ञानम्,
(४६) द्रेष्काणवशादङ्गविभागज्ञानम्,
(४७) जातकस्याङ्गे चिह्नज्ञानम्, व्रणज्ञानञ्च,
(४८) बालारिष्टविमर्शः,
(४९) अनुक्तमरणकालानामरिष्टयोगानां समयज्ञानम्,

(५०) मय-यवन-मणित्थ-पराशराणां मतानुसारेण सूर्य-चन्द्र-भौम-बुध-गुरु-शुक्र-शनीनां परमायुःप्रमाणम्, तेषां परमनीचस्थानां ग्रहाणामायुर्दायकथनञ्च,

(५१) आयुर्दायस्य चक्रपातेन ह्रासम्,

(५२) आयुर्दायस्य विशेषसंस्कारानुसारेण लग्नस्थेन पापेन चक्रपातवदायुषोंऽशहरणम्,

(५३) मनुष्यादीनां परमायुर्वर्णनम्,

(५४) परमायुर्दाययोगज्ञानम्,

(५५) आयुर्दाये दोषारोपणम्, तत्र आयुःसाधने विष्णुगुप्त-देवस्वामि-सिद्धसेनानां मतखण्डनम्, जीवशर्म-सत्याचार्यादीनां मतमण्डनञ्च,

(५६) सत्याचार्यमते आयुर्दायसाधनम्, सत्याचार्यमतेन आनीतायुःसंस्कारपरिज्ञानम्, लग्नायुर्दाये सत्यमतस्याङ्गीकरणम्,

(५७) अमितायुर्योगपरिज्ञानम्,

(५८) सलग्नग्रहाणां दशाक्रमः, दशावर्ष-प्रमाणम्, केन्द्रस्थानां ग्रहाणां दशाक्रमज्ञानम्,

(५९) दशाक्रमे तदन्तर्दशानयनप्रकारज्ञानम्, ग्रहाणां बलक्रमेण दशासंज्ञानञ्च,

(६०) सम्पूर्णा-रिक्तावरोहिण्यारोहिणीदशाज्ञानम्,

(६१) लग्नदशायाः शुभाशुभफलज्ञानम्,

(६२) ग्रहाणां नैसर्गिकदशावर्षज्ञानम्,

(६३) दशान्तर्दशानुरूपफलज्ञानम्,

(६४) दशारम्भकालिकलग्नग्रहवशेन शुभाशुभफलवर्णनम्,

(६५) दशारम्भकाले चन्द्राक्रान्तराशिवशेन शुभाशुभफलपरिज्ञानम्,

(६६) सूर्य-चन्द्र-भौम-बुध-गुरु-शुक्र-शनीनां शुभाशुभदशाफलज्ञानम्,

(६७) लग्नदशाफलम्,

(६८) अज्ञातजन्मसमये प्रजातानां ग्रहदशाज्ञानोपायः,

(६९) दशानयने विशेषज्ञानम्, ग्रहाणां विरोधफलपरिज्ञानञ्च,

(७०) सूर्य-चन्द्र-भौम-बुध-गुरु-शुक्र-शनि-लग्नानामष्टकवर्गपरिज्ञानम्, तदनुरूपफलवर्णनञ्च,

(७१) कर्माजीवाधारेण वृत्तिज्ञानम्,

(७२) ग्रहाणामंशाधारेण वृत्तिपरिज्ञानम्, तदाधारेण धनागमज्ञानञ्च

**'घ' प्रकरणे**

(१) राजयोगविमर्शः, राजयोगफलवर्णने जीवशर्म-यवनमतम्,

(२) द्वात्रिंशद्राजयोगवर्णनम्,

(३) चतुश्चत्वारिंशद्राजयोगवर्णनम्,

(४) पञ्चराजयोगवर्णनम्,

(५) प्रकारान्तरेण राजयोग-वर्णनम्,

(६) राजयोगेषु राज्यावाप्तिकथनम्,

(७) राजयोगानां पुनः प्रकारान्तरेण वर्णनम्,
(८) राजयोगे जातस्य राज्यावाप्तिकालज्ञानम्,
(९) भोगिनां शबरदस्यु-स्वामिनां जन्मयोगपरिज्ञानम्,
(१०) नाभसयोगेषु आश्रयदलयोगयोर्लक्षणम्, आश्रययोगत्रयस्य दलयोगद्वयस्य च व्याख्याने कारणदर्शनम्,
(११) गदाद्याकृतियोगानां लक्षणानि,
(१२) वज्रादियोगलक्षणकथने पूर्वशास्त्र-प्रामाण्यकथनम्,
(१३) यूपादिचक्रान्तयोगलक्षणानि,
(१४) सङ्ख्यायोगलक्षणानि,
(१५) आश्रयदलयोग-जातफलम्,
(१६) गदादिगोलान्तयोगजातानां फलवर्णनम्,
(१७) वज्रादियोगानाम्, यूपादियोगानाम्, नौकूटादियोगानाम्, अर्द्धचन्द्रादियोगानाम्, दामिन्यादियोगानाम्, युगादियोगानाञ्च फलविश्लेषणम्,
(१८) सूर्यात् पणफरापोक्लिमस्थशशिनि जाते फलवर्णनम्,
(१९) सफलमधियोग-लक्षणम्,
(२०) सुनफादियोगचतुष्टयलक्षणानि तज्जन्मफलवर्णनञ्च,
(२१) केमदूमयोगलक्षणफले, ग्रहविशेषैः सुनफादियोगकारकत्वे फलवर्णनम्,
(२२) योगकर्तुः शनेश्चन्द्रस्य च दृश्यादृश्यत्वे पुरुषस्य वर्णनम्,
(२३) लग्नाच्चन्द्राद् वोपचयगत-शुभग्रहफलानि,
(२४) जातकस्य भौमादिग्रहेषु, चन्द्रादिभिरन्वितेषु तत्फलानि
(२५) प्रव्रज्याकारकग्रहाणामस्तादिफलवर्णनम्,
(२६) चतुरादिभिर्ग्रहैरेकस्थितैर्विनाऽपि प्रव्रज्यायोगः,
(२७) यस्मिन् योगे जातः शास्त्रकरो भवति येन च राजाऽपि दीक्षितो भवति एता-दृशयोगवर्णनम्,
(२८) अश्विन्यादिसप्तविंशतिनक्षत्रजातानां पृथक् फलवर्णनम्,
(२९) मेषादिद्वादशराशिगते चन्द्रमसि तत्तद्राशिजातस्य पृथक् पृथक् स्वरूपपरिवर्णनम्,
(३०) जातकस्य प्रत्येकराशिस्थित-ग्रहैर्जायमानस्वरूपाणि,
(३१) मेषादिकर्कटान्तस्थे कुजादिदृष्टे जातकस्य स्वरूपपरिवर्णनम्,
(३२) सिंहादिमीनस्थे चन्द्रमसि बुधादिदृष्टे जातकस्य स्वरूपम्,
(३३) होराद्रेष्काणव्यवस्थितचन्द्रे सूर्यादिग्रह-दृष्टिफलानि,
(३४) मेषादिनवमांशगतचन्द्र इतरग्रह-दृष्टिवर्णने वैशिष्ट्यदर्शनम्,
(३५) तन्वादिद्वादशभावोपगतेषु सूर्यादिग्रहेषु जातस्य स्वरूपविवेचनम्।

**'ङ' प्रकरणे**

(१) एकादिवृद्ध्या स्वगृहस्थानां मित्रक्षेत्रगानाञ्च ग्रहाणां पृथक् पृथक् फलानि,

(२) कुम्भलग्नजातस्याशुभफलवर्णनम्,
(३) होरास्थितग्रहफलानि,
(४) द्रेष्काणस्थचन्द्रफलम्,
(५) मेषादिनवमांशजातफलानि,
(६) स्वत्रिंशांशस्थ-भौमादिग्रहफलानि,
(७) भौमादित्रिंशांशस्थयोः पुष्पवतोः स्वरूपसन्दर्शनम्,
(८) सप्रयोजनं ग्रहाणां कारकसंज्ञा-परिवर्णनम्,
(९) यौवने सुखीयोगः, ग्रहाणां फलदानसमयज्ञानञ्च,
(१०) दारसुतहीनजन्मज्ञानम्,
(११) जीवित एव भार्यामरणयोगः,
(१२) विकलनयनदारजन्मयोगः,
(१३) सुतहितवन्ध्यापतिजन्मज्ञानम्,
(१४) परयुवतिगजन्मज्ञानम्,
(१५) वंशच्छेदकादियोग-वातरोग-श्वास-क्षयादिरोग-कुष्ठि-नेत्रहीन-बधिरादिरोग-पिशाचान्धादिरोग-वातोन्मादादिरोग-विकृतदशनयोग-दासयोग-बन्धनयोग-परुषवचनादियोगपरिवर्णनम्,
(१६) स्त्रीजातकफलवर्णने पुरुषजन्मोक्तफलातिदेशस्थफलविश्लेषणम्,
(१७) लग्नेन्दुवशात् स्त्रिया वपुराकृतिवर्णनम्,
(१८) भौमर्क्षे लग्नगे वा चन्द्रे भौमादित्रिंशांशजातायाः स्वरूपपरिवर्णनम्,
(१९) बुधशुक्रयोरन्यतमगृहे वा लग्नगे चन्द्रे भौमादित्रिंशांशजातायाः स्वरूपसंवर्णनम्,
(२०) चन्द्रार्कजीवसौर-क्षेत्राणामन्यतमे लग्नगे चन्द्रे वा भौमादित्रिंशांशजातायाः स्वरूपसन्दर्शनम्,
(२१) चन्द्रलग्नगतत्रिंशांशाधारेण फलविवेचने विचारणीयविषयद्वयवर्णनम्,
(२२) पुरुषाकाररूपाभिः स्त्रीभिः सह स्त्रीणां मदनशमनकयोगद्वयवर्णनम्,
(२३) सप्तमस्थानाधारेण स्त्रीणां पतिवर्णनम्,
(२४) स्त्रीणां चन्द्रात् सप्तमस्थानाच्च फलवर्णनरीतिदर्शनम्,
(२५) येन योगेन जाता मात्रा सह बन्धकी भवति येन च रोगार्दिता योनिर्येन च सुभगा भवतीति योगत्रयवर्णनम्,
(२६) सप्तमस्थाने ग्रहरहितायाः स्त्रियाः फलविवेचनप्रकारः,
(२७) सप्तमभावस्य राशिनवमांशादीनामाधारेण स्त्रियाः फलविवेचन-प्रकारः,
(२८) यस्याश्च शुक्रबुधानां मध्ये द्वौ वा त्रयो ग्रहा लग्नगताः स्युस्तस्याः स्वरूपम्,
(२९) विधवायोगविवेचनम्,
(३०) पुरुषिणी ब्रह्मवादिनी-योगद्वयवर्णनम्,
(३१) स्त्रीणां प्रव्रज्यायोगविवेचनम्,

(३२) शिलाप्रहारादिभिर्जायमानमृत्युयोगवर्णनम्,
(३३) भूमौ मरणज्ञानम्,
(३४) मृतस्य शरीरपरिणामः,
(३५) जातो जन्तुः कस्माल्लोकादागत इति कथनम्,
(३६) मृतस्य गतिज्ञानोपायवर्णनम्,
(३७) नष्टजातकस्य जन्मवर्षर्तु-तिथि-नक्षत्रेष्टकाललग्नादिज्ञानम्,
(३८) मेषादीनां द्रेष्काणत्रयजन्मफलानां संक्षेपेणोपस्थापनम्,
(३९) वराहोक्तग्रन्थाध्यायनामानि,
(४०) वराहमिहिरकृतपञ्चसिद्धान्तिका तत्कृतस्कन्धत्रयात्मकज्योतिषस्य प्रयोजनञ्च,
(४१) सत्स्वपि यवने श्वरादिरचितविविधशास्त्रेषु वराहरविहितशास्त्रस्य विशिष्टवैशिष्ट्यदर्शनं तत्प्रयोजनवर्णनञ्च,
(४२) बृहज्जातकग्रन्थस्य निर्माणसमयादारभ्य बहुकालपर्यन्तं जायमान-जनिष्यमाणत्रुटीनां संशोनधनाय ग्रन्थकारकृत-प्रार्थनापरिवर्णनम्,
(४३) ग्रन्थकारवराहमिहिरशब्दैः स्ववृत्तान्तवर्णनम्,
(४४) ग्रन्थस्य निर्विघ्नपरिसमाप्तौ विद्वत्प्रणामाञ्जलयश्च।

## ५. शिक्षणविधयः शैक्षिकसामग्री च

### (क) शिक्षणविधयः

(१) शिक्षणक्रमेऽधिकाधिकरूपेण छात्राणां सहभागिता भवत्वित्यत्र समायोजनीया।
(२) तदनु सामूहिकविचारविमर्श-संवाद-प्रश्नोत्तरादिमाध्यमेन छात्राः प्रेरणीयाः।
(३) शास्त्रार्थशैल्या परस्परं संवाद-प्रश्नोत्तरादिप्रक्रियया सरलया संस्कृतगिरा छात्राः शिक्षणीयाः। शिक्षणे निगमनागमन-प्रश्नोत्तर-प्रवचन-विमर्श-प्रदर्शनात्मकाः शिक्षणविधय एवात्र प्रयुज्यन्ते।
(४) सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनासम्बद्धाः प्राक्कल्पनादयश्छात्र-केन्द्रिता विधयोऽपि प्रयोक्तुं शक्यन्ते।
(५) शिक्षणे यथासम्भवं अधिकाधिकच्छात्रसहभागितापूर्वकं शिक्षकैः यथावसरं तत्र मार्गं निर्दिश्यः योजकस्य भूमिका निर्वहणीया भवति।

### (ख) शैक्षिकसामग्री

(१) विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगप्रसङ्गे कक्षागतपाठानुसारेण पूर्वमेव सङ्गणकयन्त्रे श्रव्यात्मकं दृश्यात्मकं वा पाठ्यसामग्रीं निर्माय प्रोजेक्टरयन्त्रमाध्यमेन तत्तत्सामग्रीजातं प्रदर्श्य च स्वविषयाध्यापनं सम्यक् कर्तुं शक्यते।

(२) सति सम्भवे शिक्षकेण विषयानुकूलानां समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगविधानमपि कर्तुं शक्यते।

(३) एतादृशप्रदर्शनमनु दृष्टानां श्रुतानां वा विषयाणां बोधाय काठिन्यं वर्तते न वेति विज्ञाय तन्निराकरणं शिक्षकेण कर्तव्यम्।

(४) एतदतिरिक्तमाकाश-दर्शनकार्यक्रमस्याप्यावश्यकता भवति।

(५) तत्राध्ययनभ्रमणमपेक्षते।

(६) आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्था अपि कार्या।

(७) शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते।

(८) अत्र कतिपयसामग्रीणां व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया।

(९) तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया भवति।

## ६. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति- आन्तरिकं (निर्माणात्मकं) बाह्यं (निर्णयात्मकं) च।

### (क) आन्तरिकमूल्याङ्कनम्

(१) आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशदङ्काः सन्ति निर्धारिताः।

(अ) आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति।

(आ) कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्य-योजनायामान्तरिकमूल्याङ्कनं विधीयते।

(इ) गृहकार्यं कक्षापरीक्षा, परियोजनाकार्यम्, इत्यादीन्यन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति।

### (ख) बाह्यमूल्याङ्कनम्

(१) प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति।

(२) नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिक-मूल्याङ्कनस्याङ्कानां नेसंविपरीक्षानियन्त्रण-कार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते।

(३) बाह्यपरीक्षायां निर्धारिताङ्कान् अशीतिःसङ्ख्यायां परिवर्त्य तत्रान्तरिकमूल्याङ्कने निर्धारिताङ्कान् तत्र समायोज्यन्ते। द्वयोः सम्मेलनेन पूर्णाङ्काः शतमेव भवन्ति।

(४) स्वतन्त्रपरीक्षार्थिनां कृते त्वान्तरिकमूल्याङ्कनाभावाद् बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव यथावद्रूपेण स्थाप्यन्ते।

(५) बाह्यमूल्याङ्कनस्य तु वर्षान्ते विश्वविद्यालयेन लेखनात्मिका बाह्यपरीक्षा सञ्चाल्यते।

(६) साधारणतया बाह्यपरीक्षा परीक्षाकेन्द्रे छात्राणां भौतिकोपस्थितौ लेखात्मिकैव भवति परन्तु परिस्थितिवशात् परीक्षाकेन्द्रगतत्वेन व्यवस्थापनस्य काठिन्ये समुपस्थिते सा परीक्षा, अन्तर्जालमाध्यमेनापि सञ्चालयितुं शक्यते।

(७) बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराः निर्धारिताः सन्ति ।

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माणसारणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसङ्ख्याः | | अङ्काः |
|---|---|---|---|---|
| क ख ग घ ङ | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ × १२ | २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ × ७ | ४२ |
| | व्याख्यात्मकाः | ४ | ३ × ८ | २४ |
| | वस्तुगतताः | १० | १० × १ | १० |
| योगाः | | २६ | २१ | १०० |

## ७. पाठ्यसूची

### (क) पाठ्यग्रन्थः

१. वराहमिहिरविरचितम् **बृहज्जातकम्** ।

### (ख) सहायकग्रन्थाः

१. माधवप्रसाद पाण्डेय, **कुण्डलीप्रकाश,** चौथो संस्करण, काठमाडौँ : ज्योतिर्विद्या प्रालि कीर्तिपुर, वि.सं. २०७७ ।

२. मीठालाल हिमतराम ओझा, **भारतीयकुण्डलीविज्ञान**, वाराणसी : देवर्षि प्रकाशन, वि.सं. २०५४ ।

३. वराहमिहिरविरचितम् **लघुजातकम् ।**

### (ग) सन्दर्भग्रन्थाः

१. काशीनाथदैवज्ञ **शीघ्रबोधः**, वाराणसीः चौखम्बा कृष्णदास अकादमी, वि.सं. २०४२ ।

२. नयराज पन्त, **गोलबोध**, काठमाडौँ : पाठ्यक्रम विकास केन्द्र, त्रिभुवन विश्वविद्यालय, नेपाल, वि.सं. २०३४ ।

३. माधवप्रसाद पाण्डेय **व्यावहारिकज्योतिष**, पाल्पाः बाँसमाथि प्रकाशन, वि.सं. २०६३ ।

४. विन्ध्येश्वरीप्रसादद्विवेदी, **जन्मपत्रदीपकः,** अष्टमसंस्करण, वाराणसी : चौखम्बा संस्कृत संस्थान, वि.सं. २०५० ।

५. बृहज्जातकस्य **भट्टोत्पलकृतटीका ।**

# विषयः फलितज्यौतिषम्

पाठ्यांशनाम — **जातकपद्धतिर्भावफलञ्च**
स्तरः — शास्त्री
वर्षः — प्रथमः
पत्रम् — द्वितीयम्

पाठ्यांशसङ्केतः - फ.ज्यौ.३०२
पूर्णाङ्काः — १००
वार्षिकः पाठ्यभारः — १६० घण्टाः
साप्ताहिकः पाठ्यभारः — ६

**१ पाठ्यांशपरिचयः**

सत्यपि गणितफलितभेदद्वये ज्यौतिषशास्त्रस्य फलादेशपक्ष एव विशेषरूपेण जनजिज्ञासा जागर्ति । फलितज्यौतिषस्य कारणेनैवास्य शास्त्रस्य महत्त्वं विश्वस्मिन् विश्वे दिनानुदिनमेधमानमस्ति । वर्तमानसमयेऽपि प्रत्यक्षरूपेण सामान्यजनजीवनसंपृक्तस्यास्य महत्त्वं सर्वातिशायि वर्तते । फलादेशे दृष्टिपथमागतासु विविधासु पद्धतिषु भावफलादेशपद्धतिर्योगफलादेशपद्धतिश्च सद्यःप्रभावजननी महत्त्वपूर्णा च दरीदृश्यते । भावफलादेशे योगफलादेशे च ग्रहस्थित्याधारेण सूक्ष्मरूपेण जातकस्य शुभाशुभफलकथने जातकशास्त्रेण सह जातकपद्धतिसम्बद्धगणितविषयस्याध्ययनं परमोपयोगि भवति । अतः फलादेशकरणे जातकपद्धतिर्जातकशास्त्रञ्च समकालमेवाध्येतव्यं मननीयञ्च भवति।

केवलं भावाधारेण, तत्रस्थग्रहाधारेण, भावस्थग्रहजन्ययोगाधारेण च यस्य कस्यापि जातकस्य सूचितसूच्यमानसूचयिष्यमाणभाग्याभाग्यादिसमग्रजीवन- सम्बद्धफलवर्णनमपि दुःसाध्यमेव भवति । जातकपद्धत्यनुसारेण जातकफल-विवेचनक्रमे वास्तवजन्मकालाधारेण शास्त्रीयनियमानुसारेण निर्मितां जन्म-पत्रिकामवलम्ब्यार्षमतानुसारेण वर्णितमेव फलं यथार्थतः समीचीनं भवति । अत एवास्मिन् जातकशास्त्रसम्बद्धपाठ्यांशे जातकस्य सूक्ष्मातिसूक्ष्मफलादेशाय फलं विविदिषूणां कृतेऽवश्यज्ञातव्यभूता ग्रहबलाबलविवेचिनी जातकपद्धतिश्च समायोजिता । विषयाणामुचितविधिना शिक्षणेन फलितज्यौतिषं पिपठिषूणां छात्रवर्गाणां कृत एष पाठ्यांशो बहूपयोगी भविष्यतीति आशास्यते।

पाठ्यांशोऽयं पञ्चसु प्रकरणेषु विभक्तोऽस्ति। **क**-प्रकरणे जातक-पद्धतिर्निर्धारिता। **ख-ग-घ-ङ**प्रकरणेषु भावफलादेशो योगफलादेशश्च निर्धारितः। अत्र कतिपयविषयाः सैद्धान्तिकरूपेण तथैव कतिपयविषयास्तु प्रयोगात्मक-रूपेणापि पाठयितुं शक्यन्ते । पाठ्यांशस्यास्येमानि वैशिष्ट्यानि सन्ति-

- जातकपद्धतिसहितजातकशास्त्रसम्बद्धविषयाणां समावेशः
- विषयवस्तूनां बोधस्तद्विश्लेषणञ्च
- सम्बद्धविषयवस्तूनां व्यावहारिकः प्रयोगः

- निर्दिष्टजातकविषयाणामाधारेण फलादेशसामर्थ्योत्पादनम्
- स्तरानुरूपेण पाठ्यवस्तूनां चयनम्
- निर्दिष्टज्योतिषसम्बद्धविषयाणां बोध–व्यावहारिकसामर्थ्य–परीक्षणपरं मूल्याङ्कनञ्च।

**२ पाठ्यांशस्य सामान्योद्देश्यानि**

पाठ्यांशेनानेन निर्दिष्टविषयाणामध्ययनस्यान्ते छात्रा निम्नलिखितविषये समर्था भविष्यन्ति–

- स्तरीयजन्मपत्रिकां निर्माय कुण्डलीस्थग्रहस्थित्यनुसारेण जातकपद्धत्य–नुकूलग्रहबलाबलत्वसाधने
- जन्मपत्रिकाधारेण ग्रहाणां बलाबलत्वसमीक्षणपूर्वकं भावस्थग्रहाधारेण भावफलनिरूपणे
- जातकशास्त्रोक्तविधिना जन्मकुण्डल्यां दृग्गोचरीभूतानां विविधयोगानामा–धारेण शुभाशुभफलविवेचने
- ग्रहावस्थाभिर्जातजायमानजनिष्यमाणप्रभाववर्णने
- भावस्थग्रहैर्जातानां सन्तानसुखैकावलीधनाधीशादियोगानां समीक्षणे
- विषकन्यादियोगनिर्धारणपूर्वकमायुर्दायादिसाधने
- विशेषरूपेण सन्दर्भभूतविषयाणामवबोधने निर्दिष्टविषयाणामभिव्यक्ती–करणे च।

**३ पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च**

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | –ससन्धिद्वादशभावसाधने<br>–ग्रहाणां षड्बलसाधने<br>–आयुर्दायसाधने<br>–मनुष्याणां मनुष्येतराणाञ्च परमायुः कथने<br>–दशास्वरूप–दशाक्रमकथने<br>–दशाक्रमबलसाधने<br>–दशाप्रवेशकालिकलग्नसाधने | पाठ्यवस्तुविवरण–क्रमे 'कु प्रकरणे निर्दिष्टाः | २० | ३५ |

| | | | | |
|---|---|---|---|---|
| ख | –पितृ–मातृ–भ्रातृ–मातुल–<br>पत्नीकष्टयोगकथने<br>–सन्ततिसम्बद्धविविध–<br>प्रश्नानामुत्तरणे<br>–विविधराजयोगकथने<br>–स्त्रीजातकस्य पृथक्फलकथने<br>–सपरिहारविषकन्यादियोग–<br>लक्षणपरिज्ञाने | पाठ्यवस्तुविवरण–<br>क्रमे 'ख' प्रकरणे<br>निर्दिष्टाः | २० | ३० |
| ग | –ग्रहाणां<br>शयनादिद्वादशावस्थानयने<br>–ग्रहाणां<br>दृष्ट्यादित्र्यन्तरावस्थानयने<br>–ग्रहाणां क्षेपकाङ्ककथने<br>–ग्रहाणां<br>जाग्रतादित्र्यवस्थानयने<br>–ग्रहाणां<br>दीप्तादिनवावस्थानयने<br>–ग्रहाणां<br>बालादिपञ्चावस्थानयने<br>–ग्रहाणां<br>प्रवासादिद्वादशावस्थानयने<br>–ग्रहाणां<br>लज्जितादिषडवस्थानयने<br>–ग्रहाणामवस्थाविशेषेण<br>भावफलवर्णने<br>–शत्रुकृतमृत्युयोगस्य तीर्थक्षेत्रे<br>मृत्युयोगस्य च लक्षणवर्णने<br>–ग्रहाणां शयनादिद्वादशावस्था–<br>बालादिपञ्चावस्था–<br>दीप्ताद्यवस्थाजन्यफलवर्णने | पाठ्यवस्तुविवरण–<br>क्रमे 'ग' प्रकरणे<br>निर्दिष्टाः | ३० | ४५ |

| | | | | |
|---|---|---|---|---|
| घ | –जन्मकुण्डल्याधारेण मारकग्रहकथने<br>–कन्द्रेश-त्रिकोणेशसम्बन्धजन्यराजयोग कथने<br>–धन–दारिद्र्य-ऋणग्रस्तयोगानां लक्षणफलवर्णने<br>–सूक्ष्मरूपेण ग्रहदशाफलवर्णने<br>–ग्रहाणां स्थित्यनुसारेण दशाफलवर्णने<br>–षष्ठ–सप्तम–अष्टम-द्वादशभावेशानां विशेषदशाफलकथने<br>–अवस्थाविशेषानुसारेण लग्नादिद्वादेशभावेशानां फलकथने | पाठ्यवस्तुविवरणक्रमे 'घ' प्रकरणे निर्दिष्टाः | २० | ३० |
| ङ | –शुकसूत्रनिर्दिष्टजातकफलस्य वैशिष्ट्यवर्णने<br>–शुकसूत्रोक्तदिशा शुभाशुभविवेचनपूर्वकतन्वादि-द्वादशभावफलवर्णने<br>–गृहवाहनसन्ततिप्राप्ति-योगानांलक्षणफलवर्णने<br>–विलम्बेन सन्ततिकारकयोगकथने<br>–त्रिकोणस्थानोत्पन्नयोगकथने<br>–अनिष्ट–परजात–कुष्ठि-व्रण–पङ्गु–खञ्ज–मूर्ख-बुद्धिमान्–बुद्धिहीनयोगानां लक्षणफलकथने<br>–कम्पन–हृदय–पित्त-व्रणरोगकारकयोगानां लक्षणफलवर्णने | पाठ्यवस्तुविवरणक्रमे 'ङ' प्रकरणे निर्दिष्टाः | १० | २० |

| | | | | |
|---|---|---|---|---|
| | -परस्त्री-व्यभिचारि-विविधस्वभावयोगानां लक्षणफलवर्णने -अपकीर्ति-हीनवीर्य-कामुक-वाचाल-नेत्रविकल-दद्रुरोग-कमलपित्तरोग-विकलाङ्ग-क्लीबकाण-मुष्कवृद्धि-दन्तरोगकारक-खल्वाट-शरीरदुर्गन्ध-सुखि-कुलप्रसिद्ध-राजमान्य-भाग्यवद्योगानां लक्षणफलवर्णने -षष्ठेशलग्नेशाभ्यामुत्पन्नयोगफलवर्णने | | | |

### ४. पाठ्यवस्तुविवरणम्

**'क'प्रकरणे**

१.ससन्धिद्वादशभावसाधनम् २.ग्रहदृष्टिसाधनम् ३.ग्रहाणामुच्चबलसाधनम् ४. ग्रहाणां सप्तवर्गजबलसाधनम् ५.युग्मायुग्मराशिनवमांशबलसाधनम् ६. केन्द्रादिबलसाधनम् ७.ग्रहाणां दिग्बलसाधनम् ८.ग्रहाणां कालबलसाधनम् ९. पक्ष-त्र्यंश-वर्षेशादिबलसाधनम् १०. आयनबलसाधनम् ११. ग्रहाणां चेष्टाबलम् १२. ग्रहाणां नैसर्गिकबलम् १३. युद्धादिबलसाधनम् १४. भावानां त्रिविधबलसाधनम् १५. चन्द्रार्कयोश्चेष्टाबलसाधनम् १६. इष्टकष्टसाधनम् १७. सप्तवर्गेष्टकष्टसाधनम् १८.योगजामितायुर्दायोदाहरणमंशायुःसाधनार्थं चेष्टागुणकादिसाधनम् १९. आश्रयगुणकसाधनम् २०. आश्रयगुणकसंस्कारविशेषं कर्म २१. योग्यगुणकमंशायुर्दायोपयोगिनो दायांशादिसाधनम् २२. चक्रार्धहानिः २३. वर्षाद्यंशायुःसाधनम् २४. पिण्डनिसर्गजीवशर्मोक्तायुर्दायोपयोगिदायांशसाधनम् २५. लग्ने पापग्रहे हानिकथनम् २६. पिण्डनिसर्गजीवशर्मोक्तायुर्वर्षाद्यानयनम् २७. लग्नायुरानयनम् २८. अंश-पिण्ड-निसर्ग-जीवशर्मोक्तायुषां मध्ये कतमं ग्राह्यमिति विश्लेषणम् २९. हीनबलत्वादिलक्षणवर्णनं तथांशायुषोर्बहुसम्मतत्ववर्णनपूर्वकायुर्दायस्य सत्यासत्ये शिष्यसन्देहनिराकरणम् ३०. मनुष्याणां मनुष्येतराणाञ्च परमायुःकथनम् ३१. दशास्वरूपं शुभाशुभफलञ्च ३२. दशाक्रमकथनम् ३३. दशाक्रमबलं रिष्टकररिष्टहरबलञ्च ३४. रिष्टकररिष्टहरबलयोर्बलसाम्ये निर्णयप्रकारः ३५. अन्तर्दशाक्रमः ३६. विदशाः ३७. सूक्ष्मदशाफलार्थं दशाप्रवेशकालिकलग्नसाधनम् ३८. दशाशुभाशुभत्ववर्णनम् ३९.

अष्टवर्गफलस्य रूपत्वाधिकत्वकल्पनकारणम् ४०. फलस्य व्यभिचारे किं करणीयमिति कथनम्।

**'ख'प्रकरणे**

१. पितृकष्टयोगः २. मातृकष्टयोगः ३. भ्रात्ररिष्टयोगः ४. मातुलकष्टयोगः ५. पत्नीकष्टयोगः ६. भगिनीकष्टयोगः ७. जातकचिह्नानि ८. भ्रातृनाशयोगः ९. मातृनाशयोगः १०. सहजसुखविचारः ११. बालारिष्टविचारः १२.अरिष्टभङ्गविचारः १३. शीघ्रमृत्युयोगाः १४. सन्ततिभावविचारः १५. सन्ततिसंख्याविचारः १६. सन्ततिहानियोगः १७. पुत्रहानियोगः १८. सन्ततिप्राप्त्यप्राप्तिविचारः १९. क्लीबयोगः २०. पुत्रसुखहानियोगः २१. त्रिंशद् वर्षात्परं पुत्रप्राप्तियोगः २२. सार्वभौमराजयोगः २३. कीर्तिविस्तारकराजयोगः २४. बलाद्राज्याप्तियोगः २५. महाराजाधिराजयोगः २६. सिंहासनयोगः २७. एकावलीयोगः २८. चतुश्चक्रयोगः २९. शत्रुजीतयोगः ३०. नृबालयोगः ३१. साधारणराजयोगः ३२. शत्रुनाशकयोगः ३३. प्रतापाधिकयोगः ३४. सुखसम्पत्तियुक्तग्रहयोगः ३५. कुबेरतुल्यराजयोगः ३६. कुलोचितराजयोगः ३७. द्रविड–कर्लदेशसम्बद्धराजयोगाः ३८. श्रीछत्रयोगः ३९. चन्द्रकृतराजयोगाः ४०. ह्रदयोगः ४१. फणियोगः ४२. काकयोगः ४३. दरिद्रयोगः ४४. हुताशनयोगः ४५. राजयोगभङ्गः ४६. जातकस्याङ्गे राजयोगजन्यचिह्नविचारः ४७. स्त्रीजातकवैशिष्ट्यम् ४८. स्त्रीणां सौभाग्यादिविचारः ४९. सौभाग्ययोगः ५०. दौर्भाग्ययोगः ५१. वैधव्ययोगः ५२. पतिव्रतायोगः ५३. स्त्रीराजयोगः ५४. लग्नतः सप्तमे सूर्यादिग्रहफलानि ५५. व्यभिचारिस्त्रीयोगाः ५६. वैधव्ययोगाः ५७. बालवैधव्ययोगाः ५८. मात्रा सह व्यभिचारिणीयोगः ५९. ग्रहराश्यनुसारेण त्रिंशांशफलानि ६०. स्त्र्यष्टम–पञ्चमभावविचारः ६१. सपरिहारविषयोगाः ६२. वैधव्यभङ्गोपायाः

**'ग'प्रकरणे**

१. ग्रहाणां शयनादिद्वादशावस्थाविचारः २. ग्रहाणां शयनाद्यवस्थानयनम् ३. ग्रहाणां दृष्ट्यादित्र्यन्तरावस्थानयनम् ४. ग्रहाणां क्षेपकाङ्काः ५. ग्रहाणां जाग्रतादित्र्यवस्थाविचारः ६. ग्रहाणां दीप्तादिनवावस्थाविचारः ७. ग्रहाणां बालादिपञ्चावस्थाविचारः ८. ग्रहाणां प्रवासादिद्वादशावस्थानयनम् ९. ग्रहाणां लज्जितादिषडवस्थाविचारः १०. ग्रहाणामवस्थाविशेषेण भावफलानि ११. भावस्थग्रहाणामवस्थानुसारेण विशेषफलानि १२. शत्रुकृतमृत्युयोगः १३. तीर्थक्षेत्रे मृत्युयोगाः १४. ग्रहाणां शयनादिद्वादशावस्थाफलानि १५. ग्रहाणां बालादिपञ्चावस्थाफलानि १६. ग्रहाणां दीप्ताद्यवस्थाफलानि च

**'घ'प्रकरणे**

१. मारकग्रहविचारः २. योगजायुर्निर्णयः ३. मृत्युकालनिर्णयः ४. केन्द्रेश–त्रिकोणेशसम्बन्धजन्यराजयोगाः ५. धनयोगाः ६. दारिद्र्ययोगाः ७. ऋणग्रस्तयोगाः ८. तन्वादिद्वादशभावविचारः ९. पञ्चमभावाधारेणानपत्यता–काकबन्ध्या–

सुखासुखपुत्रप्राप्तियोगाः १०. दशान्तर्दशानयनम् ११. सूर्यादिग्रहाणां महादशाफलानि १२. स्वोच्च–स्वगृह–मित्रगृह–शत्रुगृहगतग्रहाणां दशाफलानि १३. रोगेशदशाफलम् १४. अष्टमेशदशाफलम् १५. व्ययेशदशाफलम् १६. सप्तमेशदशाफलम् १७. अस्तङ्गतग्रहदशाफलम् १८. दशाफले चन्द्रस्य दशाधिपस्य च विशेषः प्रभावः १९. लग्नादिद्वादशभावेशानां संक्षिप्तफलानि २०. भावेशस्यावस्थानुसारेण फलविशेषः २१. ग्रहाणां गर्वितादिषडवस्थास्तासां फलानि च

**'ङ'प्रकरणे**

१. शुकसूत्रनिर्दिष्टजातकफलस्य वैशिष्ट्यम् २. शुकसूत्रोक्तदिशा शुभाशुभविवेचनपूर्वकतन्वादिद्वादशभावफलानि ३. गृहप्राप्तियोगः ४. वाहननाशयोगः ५. मूकयोगः ६. सन्ततिहीनयोगः ७. सन्ततियोगाः ८. सपरिहारः विलम्बेन सन्ततिकारकयोगः ९. व्रणयोगः १०. गर्भाभावयोगः ११. विविधायुर्दाययोगाः १२. संग्रामे मृत्युयोगः १३. चिन्ताकारकयोगः १४. त्रिकोणस्थानोत्पन्नयोगः १५. मृत्युयोगः १६. योगकथनप्रयोजनम् १७. अनिष्ट–परजात–कुष्ठि–व्रण–पङ्गु–खञ्ज–मूर्ख–बुद्धिमान्–बुद्धिहीनयोगाः १८. कम्पन–हृदय–पित्त–व्रणरोगकारकयोगाः १९. परस्त्रीयोगः २०. परस्त्रीगमनयोगः २१. विविधकुष्ठयोगाः २२. विविधरोगयोगः २३. त्रस्त–साहसिकयोगौ २४. विविधस्वभावयोगाः २५. व्यभिचारियोगः २६. अपकीर्तियोगः २७. हीनवीर्ययोगः २८. कामुकयोगः २९. वाचालयोगः ३०. नेत्रविकलयोगाः ३१. दद्रुरोगयोगाः ३२. कमलपित्तरोगयोगः ३३. विकलाङ्गयोगः ३४. क्लीबकाणयोगः ३५. क्लीबयोगः ३६. मुष्कवृद्धियोगाः ३७. दन्तरोगकारकयोगः ३८. खल्वाटयोगः ३९. शरीरदुर्गन्धयोगः ४०. मुखदुर्गन्धयोगः ४१. त्रिंशद् वर्षाद्यायुर्दाययोगाः ४२. सप्तत्यशीतिशतशताधिकवर्षायुर्योगाः ४३. पूर्णायुर्योगः ४४. सुखियोगः ४५. कुलप्रसिद्धयोगः ४६. षष्ठेशलग्नेशाभ्यामुत्पन्नस्वभावयोगः ४७. राजमान्ययोगः ४८. भाग्यवान् योगः

**५. शिक्षणविधयः शैक्षिकसामग्री च**

फलितज्यौतिषशिक्षणविधौ विषयक्षेत्रगतशिल्पविकासायाध्ययनसहजी–करणप्रक्रिया–परिहार्या मन्यते । अस्मिन् क्रमे छात्रकन्द्रितक्रियाकलापेषु महत्त्वं प्रदातव्यं भवति । प्रक्रियेयं पाठ्यक्रमस्योद्देश्ये विषयवस्तुषु छात्राणां पृष्ठभूमौ चाधृता भवति । अध्ययनस्य सहजीकरणं सामूहिक( वैयक्तिक( चाभ्यास आश्रितो भवति । पाठ्यक्रमस्योद्देश्यानां परिपूर्तयेऽधोलिखिता अध्ययनसहजीकरणप्रक्रिया उपयुक्ता भविष्यन्ति ।

१. शिक्षकण वार्षिकीमर्धवार्षिकीं मासिकीमर्धमासिकीं साप्ताहिकीं दैनिकीञ्च शिक्षणयोजनामेवमेव पाठ्यांश–शिक्षण–योजनां दैनिकीं पाठयोजनां च निर्माय तदनुसारेण शिक्षणकार्यं करणीयम् ।
२. शिक्षणे विशेषरूपेण छात्रकन्द्रिशिक्षणपद्धतिरवलम्बनीया ।

३. छात्राणां विषयवस्तुगतामभिरुचिमुत्प्रेरणाञ्च जागरयितुमुपयुक्तवातावरणं निर्माय विषयशिक्षणं कार्यम्।
४. शिक्षार्थिनां स्तरं वयोभिरुचिं च ज्ञात्वाध्यापनीयम्।
५. जातकपद्धतिसम्बद्धगणितस्य जातकशास्त्रस्य चाध्यापनात्पूर्वं प्रचलित-पञ्चाङ्गानां साहाय्येन ग्रहाणां वक्रमार्गादिज्ञाने, ग्रहावस्थितराशिज्ञाने, ग्रहोदयास्तज्ञाने च विषयाभिमुखीकृताञ्छात्रान् व्याख्यानेन, विश्लेषणेन गणितोदाहरणप्रदर्शनेन च सम्बद्धविषयाः शिक्षणीयाः।
६. जातकशास्त्रस्याध्यापनात् पूर्वमध्यापनीया राशि-राशिस्वामि-लग्न-होरा-द्रेष्काण-नवमांश-द्वादशांश-त्रिंशांश-मूलत्रिकोण-ग्रहमैत्री-ग्रहदृष्टि-नीचोच्चादिजातकसम्बद्धविषया अध्यापनीयाः। जातकसम्बद्धो यो विषयः पाठनीयो भवति, प्रथमं तस्य विश्लेषणं कार्यम्। ऐतिहासिकमहापुरुषाणां कुण्डलीप्रदर्शनेन साकं तेषां जीवने घटितघटनानां पठितशास्त्राधारेण विश्लेषणं विधाय जातकशास्त्रोक्तयोगादिफलं परीक्षणीयम्।
७. प्रथममध्यापकर्त्त प्रचलितपञ्चाङ्गस्थसरणीसाहाय्येन यस्य कस्यापि शिक्षार्थिनो जन्मस्थानस्याक्षांशान्, देशान्तरम्, प्रामाणिकसमयान्तरम्, क्रान्तिमानञ्चरपलानि च समवगत्य स्थानीयसूर्योदयमानं साध्यम्। तस्माच्च स्वेष्टकालं परिज्ञाय तदाधारेण जन्मस्थानीयान् स्पष्टग्रहान् जन्मस्थानीयपञ्चाङ्गसहितससन्धिक-द्वादशभावादिकञ्च समानीय प्रथममेका आदर्शजन्मपत्रिका छात्राणां पुरतो निर्मेया। तत्रस्थग्रहाणां षड्बलं भावबलञ्च संसाध्य तदाधारेण जातकशास्त्रनिर्दिष्टफलं कथनीयम्। ततश्चैतादृशमन्यद् भिन्नं भिन्नं जन्मस्थानं परिकल्प्य भिन्न-भिन्नजन्मपत्रिकानिर्माणे ग्रह-भावबलसाधने तदनुसारेण फलकथने च शिक्षार्थिनः प्रेरयितव्याः।
८. जातकपद्धतिसम्बद्धगणितस्याध्यापनात्प्राग्भगण-राश्यंश-कला-विकलादीनां षट्कर्मविधिः छात्रेभ्यः प्रशिक्षणीयः।
९. ग्रहबलसाधनगणिते प्रयोज्यमानसूत्ररूपपद्यस्याध्यापनात्पूर्वं श्लोकगतविषयस्तस्य महत्त्वं प्रयोज्यमानस्थलं च प्रथमं निर्देष्टव्यम्। ततः पद्यगतविषय उपस्थापनीयस्तदनुरूपं गणितीयसूत्रं दर्शयितव्यम्। सूत्रदर्शनपश्चाच्च गणितप्रक्रियासंदर्शनपूर्वकं शुद्धोत्तरं समानीय छात्रेभ्यो विषयवस्तुज्ञानं कारयितव्यम्।
१०. जन्मकुण्डल्यां दृग्गोचरीभूतयोगादिविषयज्ञापनायादर्शरूपेण कासाञ्चनाकर्षककुण्डलीनां प्रदर्शनं कर्तव्यम्।
११. कर्णावीयजातकपद्धतिनिर्दिष्टविधिना ससन्धिकान् स्पष्टद्वादशभावान् ग्रहदृष्ट्यादिबलञ्च विगणय्यान्यजातक-पद्धतिनिर्दिष्टगणितप्रक्रियाफलसम्बद्धविषयैः सह तुलनात्मकं समीक्षणं कारयितव्यम्।
१२. शिक्षणक्रमे ग्रहाणां छायाचित्राणि, मानचित्रम् (Map..., गोलीयमानचित्रम् (Globe..., नक्षत्रपटमाकाशीयस्थितिबोधकं पटचित्रं वेधशालायाश्चित्रं दूरवीक्षणयन्त्रादिकञ्च प्रयोज्याकाशीयपिण्डानामध्ययने रोचकतोत्पादनीया।

१३. स्वच्छाकाशसमये ग्रहाणां नक्षत्राणां चावलोकनं कारयित्वैतेषामध्ययने छात्राः प्रेरयितव्याः ।

१४. नेपाल-संस्कृत-विश्वविद्यालयस्य वाल्मीकिविद्यापीठस्थवेधशालायां काष्ठमण्डपो-पत्यकाया नगरकोटस्थितवेधशालायामथवान्यत्रस्थवेधशालायां शिक्षार्थिनो नीत्वा तत्र ग्रहनक्षत्रवेधकरणविधिश्च दर्शयितव्यः ।

१५. कक्षाशिक्षणेऽसम्भवे सम्प्रति प्रचलितदूरशिक्षणविधिसम्बद्ध-Zoom, Teams, Modle, GoogleMeet, Radio, Television-प्रभृतिप्रविधिमाध्यमेन सुसांख्य-गणकयन्त्रादीनां साहाय्येन च शिक्षणकार्यं कर्तव्यम् ।

१६. एवमेव किमपि क्रियात्मकमध्ययनं परिकल्प्य शिक्षार्थिभिः प्राप्ताङ्काः सम्बद्धस्थाने परीक्षानियमानुसारेण यथासमय एव प्रेषणीयाः ।

## ६. मूल्याङ्कनविधिः

मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते ।

### (क) निर्माणात्मकमूल्याङ्कनम्

कक्षाकार्य-गृहकार्य-कक्षासहभागिता-प्रकरणपरीक्षा-पाक्षिकपरीक्षा-मासिक-परीक्षामाध्यमेन शिक्षार्थिनां योग्यताभिवृद्धये प्रयासो विधीयते । एवमेव शिक्षणक्रमे शिक्षणदुर्बलशिक्षार्थिनां स्तरोन्नतये शिक्षणकार्यस्य सहजीकरणाय चोपयुक्तवातावरणनिर्माणं क्रियते । तत्क्रमे स्तरानुगतयोग्यताभिवृद्धये सामूहिकविमर्शन-मौखिकपरीक्षा-लिखितपरीक्षा-विशेषयोग्यताप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षणप्रभृतिकार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते । माध्यमेनानेन शिक्षार्थिनां योग्यतावृद्धिर्भवेत् । निर्माणात्मक-मूल्याङ्कनमेवान्तरिकं मूल्याङ्कनमस्य कृते प्रतिशतं विंशत्यङ्का निर्धारिताः । आन्तरमूल्याङ्कनं विद्यापीठस्य विभागेन सम्बद्धशिक्षकस्य सम्मतौ विधेयम् । शिक्षणक्रम औपचारिकरूपेणानौपचारिकरूपेण च शिक्षणोपलब्धिः परिमापणीया । शिक्षणसहजीकरणस्य क्रमे शिक्षार्थिभिरधिगतानां प्रदर्शितानाञ्च यथायथाज्ञानशिल्पप्रयोगदक्षतादीनामाधारेणै-वान्तरमूल्याङ्कनं कर्तव्यम् । तस्य कृतेऽधोनिर्दिष्टतालिकानुसारेणाङ्कसंयोजनं कर्तुं शक्यते ।

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | उपस्थितिः | ३ |
| २. | शिक्षणसहभागिता | ३ |
| ३. | कक्षाकार्यं परियोजनाकार्यं वा | ९ |
| ४. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| योगः | | २५ |

**द्रष्टव्यम्—** आन्तरमूल्याङ्कनस्याधाराणां विस्तृतं विवरणं विभागनिर्मितान्तर-मूल्याङ्कनकार्यविध्यनुसारेणावगन्तव्यम् ।

**(ख) निर्णयात्मकमूल्याङ्कनम्**

पाठ्यक्रमस्योद्देश्यानुरूपं ज्ञानं शिक्षार्थिभिः प्राप्तं नवेति स्पष्टीकरणा–र्थमावधिकरूपेण मूल्याङ्कनं कृत्वा छात्राणां योग्यतानिर्धारणं क्रियते । कक्षोन्नतये शैक्षिकसत्रस्यान्ते निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन विधीयते । निर्णयात्मकमूल्याङ्कनमेव बाह्यमूल्याङ्कनम्। प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां ने.सं.वि. परीक्षा–नियन्त्रणकार्यालयेनानुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनायाङ्कवितरणेन सहैवाधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । सामान्यतया बाह्यपरीक्षा लेखात्मिकैव भवति।

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माणसरणी**

| प्रश्नप्रकाराः | प्रकरणानि | प्रष्टव्य प्रश्नसंख्या | समाधेय प्रश्नसंख्या | अङ्काः |
|---|---|---|---|---|
| विवेचनात्मकाः | क, ख, ग, घ | ३ | २ | २४ |
| संक्षिप्तोत्तरापेक्षिणः | ख, ग, घ, ङ | ९ | ६ | ४२ |
| व्याख्यात्मकाः | ख, ग, घ, ङ | ४ | ३ | २४ |
| वस्तुगताः | क, ख, ग, घ, ङ | १० | १० | १० |
| | | २६ | २१ | १०० |

***द्रष्टव्यम्–*** *प्रश्नपत्रस्य स्वरूपं विशिष्टीकरणतालिकानिर्दिष्टसंरचनाधारेण भविष्यति।*

**७ पाठ्यसूची**

**(क) स्रोतः/पाठ्यग्रन्थाः**

**१ केशवीयजातकपद्धतिः** (केशवदैवज्ञविरचिता)

**२ भावकुतूहलम्** (जीवनाथकृतम्)

**जातकालङ्कारः** (गणेशदैवज्ञकृतः)

**(ख) सहायकग्रन्थाः**

**१ श्रीपतिजातकपद्धतिः** (श्रीपतिविरचिता)

**२ भावप्रकाशः** (जीवनाथमिश्रकृतः)

**३ जातकसारः** (नृसिंहप्रणीतः)

**(ग) सन्दर्भग्रन्थौ**

**१ जातकपारिजातः** (वैद्यनाथकृतः) **२ सारावली** (कल्याणवर्मकृता)

**पाठ्यक्रमनिर्माणप्रसङ्गे विषयवस्तुग्रहणाय मुख्यरूपेणाधीताः ग्रन्थाः**

**केशवीयजातकपद्धतिः** (केशवदैवज्ञः, सम्पादकः, आचार्यश्चन्द्रमा-पाण्डेयः, वि.सं. २०४६), वाराणसी, वाराणसेय-संस्कृत-संस्थानम्।
**केशवीयजातकपद्धतिः** (केशवदैवज्ञः, टीकाकारः, पं. श्री जगदीशप्रसादत्रिपाठी, वि.सं. २०६०), मुम्बई, खेमराजः श्रीकृष्णदासः।
**जातकालङ्कारः** (गणेशदैवज्ञः, सम्पादकः, डा. कपिलेश्वरशास्त्री, वि. सं. २०५५), वाराणसी, चौखम्बा-संस्कृत-संस्थानम्।
**जातकालङ्कारः** (गणेशदैवज्ञः, व्याख्याकारः, डा. सत्येन्द्रमिश्रः, वि. सं. २०६४), वाराणसी, चौखम्बा-सूरभारती-प्रकाशनम्।
**जातकालङ्कारः** (गणेशदैवज्ञः, सम्पा., डा. मोहन उपाध्याय-ढकालः, वि. सं. २०..), नेपालः, श्रीमती उमादेवीढकाल एवं माधवचालिसे।
**भावकुतूहलम्** (जीवनाथः, सम्पादकः, रामोत्साहमिश्रः, वि.सं. २०५४), वाराणसी, ज्योतिषप्रकाशनम्।
**भावकुतूहलम्** (जीवनाथः, व्याख्याकारः, डा. हरिशङ्करपाठकः, वि.सं. २०६१), वाराणसी, चौखम्बा-सूरभारती-प्रकाशनम्।

# विषयः– पूर्वमीमांसा

पाठ्यांशनाम– **धर्मप्रमाण–कर्मभेद–श्रौतपदार्थाः**
स्तरः– शास्त्री
वर्षः– प्रथमः
पत्रम्– प्रथमम्

पाठ्यांशसङ्केतः– पू.मि. ३०१
पूर्णाङ्काः– १००
वार्षिकः पाठ्यभारः– १६० पाठाः
साप्ताहिकः पाठ्यभारः– ६

## १. पाठ्यांशपरिचयः

पूर्वमीमांसाविषयस्य शास्त्रिकक्षायाः प्रथमवर्षस्य प्रथमपत्रेऽस्मिन्मीमांसा– शास्त्राध्यनोत्सुकानां कृते प्रारम्भिकाणां विषयाणां पाठ्यांशाः सन्निविष्टाः सन्ति । अत्र सन्निविष्टेषु पाठ्यांशेषु मीमांसाशास्त्रस्य आधारभूता विषयाः शिक्ष्यन्ते । एतस्य कृते गद्यपद्यशैल्या सरलया भाषया रचिता जैमिनीयन्यायमाला सविस्तरा पाठ्यग्रन्थत्वेन गृहीता व र्तते।

**क प्रकरणे** मीमांसाशास्त्रसम्मतो विधिप्रामाण्यविचारः शिक्ष्यते। धर्मस्य स्वरूपं प्रस्तुत्य धर्मस्य शब्दगम्यत्वं स्पष्टीक्रियते। अर्थवादादीनां विध्येकवाक्यतया प्रामाण्यं भवतीति शिक्ष्यते। **ख प्रकरणे** स्मृत्याचारप्रमाण्यं नामधेयप्रामाण्यं च शिक्षणीयमिति निर्धारितम्। धर्मप्रमाणविचाराय जैमिनी–यन्यायमालायाः प्रथमाध्यायो निर्धारितः। **ग प्रकरणे** यज्ञानुष्ठाना–दपूर्वस्योत्पत्तिर्भवतीति मीमांसासिद्धान्तः शिक्ष्यते । तत्र कर्मभेदस्य प्रमाणानां परिचयश्च दीयते । **घ प्रकरणे** श्रौताग्न्याधानादिसम्बद्धानां शब्दानां शिक्षणं भवति । **ङ प्रकरणे** श्रौतसोमयागादिसम्बद्धानां शब्दानां शिक्षणं भवति।

अस्य पाठ्यांशस्याध्ययनेनच्छात्राः निर्धारितोद्देश्यानुरूपं धर्मप्रमाण– कर्मभेदसम्बद्धविषयविवेचने श्रौतयज्ञसम्बद्धशब्दार्थनिरूपणे च क्षमा भविष्यन्ति।

## २. पाठ्यांशसामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोलिखितविषयेषु प्रावीण्यं प्राप्स्यन्ति–

- मीमांसाशास्त्रस्याऽऽरम्भणीयत्वप्रतिपादने
- धर्मस्वरूपानिरूपणे
- विधिप्रामाण्यसाधने
- अर्थवादविवेचने
- मन्त्रोपयोगनिरूपणे
- स्मृत्याचारप्रामाण्यसाधने
- वेदोक्तकर्मभेदव्याख्याने
- कर्मभेदप्रमाणनिरूपणे

- अग्न्याधानादिश्रौतपदार्थविवेचने च ।

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठाः |
|---|---|---|---|---|
| क | विध्यर्थवादमन्त्रनिरूपणम् | जैमिनीयन्यायमालायाः प्रथमाध्यायस्य प्रथम-द्वितीयपादयोर्निर्धारिता विषयाः | २० | ३२ |
| ख | स्मृतिप्रामाण्य-शिष्टाचारप्रामाण्य-नामधेयप्रामाण्यनिरूपणम् | जैमिनीयन्यायमालायाः प्रथमाध्यायस्य तृतीय-चतुर्थपादयोर्निर्धारिता विषयाः | २० | ३२ |
| ग | अपूर्वसाधन-कर्मभेदप्रमाणनिरूपणादिकम् | जैमिनीयन्यायमालाया द्वितीयाध्यायस्य निर्धारिता विषयाः | ३० | ४८ |
| घ | अग्न्याधानाग्निहोत्र-दर्शपूर्णमासादिश्रौतकर्म-सम्बद्धपदार्थव्याख्यानम् | अग्न्याधानम् इत्यतः आग्रयणम् इतिपर्यन्ता वेदभाषानिघण्टु-ब्रह्मवर्गस्य निर्धारिताः पदार्थाः | १५ | २४ |
| ङ | चातुर्मास्य-पशुबन्ध-सोमयागाग्निचयनादि-श्रौतयज्ञ-सम्बद्धपदार्थविश्लेषणम् | चातुर्मास्यानि इत्यतः सर्ववेदा इन्यन्ता वेदभाषानिघण्टु-ब्रह्मवर्गस्य निर्धारिताः पदार्थाः | १० | २४ |

## ४. पाठ्यवस्तुविवरणम्

**'क'प्रकरणे**

जैमिनीयन्यायमालापरिचयः, मीमांसाशास्त्र-प्रतिपाद्यपरिचयः, अधिकरण-पञ्चाङ्गपरिचयः, मीमांसाशास्त्रस्यारम्भणीयत्वम्, गुरुमतेन मीमांसा-शास्त्रस्याध्येयत्वम्, धर्मलक्षणम्,धर्मलक्षणे गुरुमतम्, धर्मप्रमाणपरीक्षा, धर्मप्रमाणपरीक्षणे गुरुमतम्,धर्मस्य प्रत्यक्षाद्यगम्यत्वम्, चोदनाप्रामाण्यम्, शब्दनित्यत्वम्, वाक्याधिकरणम्, वेदापौरुषेयत्वम्, अर्थवादप्रामाण्यम्, विधिवन्निगदाधिकरणम्, हेतुवन्निगदाधिकरणम्, मन्त्राधिकरणञ्च ( जैमिनीयन्यायमालायाः प्रथमाध्यायस्य १-२ पादौ) ।

**'ख'प्रकरणे**

स्मृतिप्रामाण्यम्, वेदविरुद्धस्मृत्यप्रामाण्यम्, लोभादिमूलकस्मृत्यप्रामाण्यम्, शिष्टाकोपाधिकरणम्, शिष्टाचारप्रामाण्यम्, म्लेच्छप्रसिद्धार्थप्रामाण्यम्, स्मृतिविरुद्धस्य शिष्टाचारस्याप्रामाण्यम्, त्रिवृच्चर्वश्ववालशब्दार्थविचारः, कल्पसूत्रप्रामाण्यम्, होलाकाधिकरणम्, साधुपदप्रयोगनियमविचारः, लौकिकवैदिकपदपदार्थैक्यम्, आकृत्यधिकरणम्, नामधेयप्रामाण्यम्, श्येनशब्दार्थविचारः, वाजपेयशब्दार्थविचारः, बर्हिराज्यपुरोडाश-प्रोक्षणीनिर्मन्थ्यशब्दार्थविचारः, सामर्थ्याधिकरणञ्च ( जैमिनीयन्यायमालायाः प्रथमाध्यायस्य ३-४ पादौ)।

**'ग'प्रकरणे**

प्रथमाध्यायद्वितीयाध्यायसङ्गतिः, प्रतिपदाधिकरणम्, भावार्थाधिकरणम्, अपूर्वसाधनम्, तानिद्वैधाधिकरणम्, सम्मार्गाधिकरणम्, स्तुतशस्त्रा-धिकरणम्, विधिमन्त्राधिकरणम्, मन्त्रब्राह्मणलक्षणम्, ऊह-प्रवर-नाम्नाम् अमन्त्रत्वम्, ऋग्यजुःसामलक्षणम्, एकवाक्यताविचारः, शब्दान्तराभ्या-साभ्यां कर्मभेदः,उपांशुयाजाधिकरणम्, अघाराग्निहोत्राधिकरणम्, पशु-सोमाधिकरणम्, सङ्ख्या-सञ्ज्ञा-गुणैः कर्मभेदः, इन्द्रियकामाधिकरणम्, रथन्तराधिकरणम्, अवेष्ट्यधिकरणम्, आधानाधिकरणम्, दाक्षायणयज्ञः, ईषालम्भाधिकरणम्, वत्सालम्भाधिकरणम्, चरूपधानाधिकरणम्, पत्नी-वताधिकरणम्, अंश्वदाभ्याधिकरणम्, चयनाधिकरणम्, प्रकरणान्त-राधिकरणम्, फलसंस्कार्याधिकरणम्, यावज्जीवाधिकरणम्, शाखान्तरा-धिकरणञ्च ( जैमिनीयन्यायमालाया द्वितीयोऽध्यायः)।

**'घ'प्रकरणे**

अग्न्याधानम्, ऋत्विक्, ब्रह्मा, उद्गाता, होता, अध्वर्युः, आर्त्विजीनः, यजमानः, यज्ञः, यागः, होमः, अरणिः, अधरारणिः, उत्तरारणिः, सम्भाराः, विहारः, अग्निगृहम्, खरः, मेखला, वेदिः, प्रकृतिः, विकृतिः, शुल्बम्, कर्कटकः, यज्ञायुधम्, शूर्पः, स्रुवा, उपभृत्, ध्रुवा, स्फ्यः, प्रस्तरः, वेदः, इध्मः, परिधयः, ब्रह्मौदनः, वरः, गार्हपत्यः, आहवनीयः, दक्षिणाग्निः, वैतानिकाग्नयः, सभ्याग्निः, ग्रामाग्निः, पूर्णाहुतिः, तनूहवींषि, उपसर्जन्यः, पुरोडाशः, दक्षिणा, भूयसी, आहिताग्निः, पर्याधाता, अग्निहोत्रम्, विहरणम्, अवज्योतनम्, प्रवासः, अग्निहोत्री, वीरोज्झः, वीरोपजीवकः, अन्वारम्भणीयेष्टिः, पूर्णमासः, दर्शः, उपवासः, उपवसथः, अवहननम्, निष्पवनम्, परापवनम्, फलीकरणम्, फलीकरणाः, पेषणम्, कपालोपधानम्, स्तम्बयजुः, प्रतिपत्तिः, अन्वाहार्यः, प्रवणम्, प्रचरणम्, अवनेजनम्, उपस्तरणम्, अभिघारणम्, प्रत्यञ्जनम्, अवदानम्, अवत्तम्, पृच्छा, अनुज्ञा, प्रैषः, सामिधेन्यः, धाय्या, आघारः, आश्रावणम्, प्रत्याश्रावणम्, प्रयाजाः, पुरोनुवाक्या, याज्या, वषट्कारः, इडा, अनुयाजाः, सूक्तवाकः, शंयुवाकः, पत्नीसंयाजः,

प्रणीताविमोचनम्, पूर्णपात्रनिनयनम्, विष्णुक्रमाः, कव्यम्, निपरणम्, पिण्डपितृयज्ञः, यवागूः, सान्नाय्यम्, आमिक्षा, वाजिनम्, आग्रयणञ्चेति श्रौतपदानामर्थाः पर्यायवाचिशब्दाश्च (वेदभाषानिघण्टोर्ब्रह्मवर्गस्य २२१-३७२ श्लोकाः) ।

**'ङ'प्रकरणे**

चातुर्मास्यानि, कुशप्रस्वः, करम्भपात्रम्, चात्वालः, शम्या, निष्काषः, समानबर्हिः, पशुबन्धः, यूपः, उपरः, परिवीः, चषालः, तदर्म, स्थाणुः, आव्रश्चनः, यूपव्रस्कः, स्वरुः, प्रहार्यः, शामित्रोऽग्निः, सञ्ज्ञपनम्, उपाकृतः, मैत्रावरुणः, विशसनम्, उपयट्, सौत्रामणी, सतम्, दर्विहोमाः, सोमयागः, एकाहः, अहीनः, सत्रम्, विमितम्, शाला, पत्नीशालम्, सोमः, सोमक्(ारिकाः, पूतिकाः, न्यग्रोधस्तिभयः, ध्रुवगोपः, अप्सुदीक्षा, अमूत्रकृतम्, नीविः, कृष्णविषाणा, कुम्बकुरीरकम्, दीक्षितः, दीक्षा, प्रायणीयम्, सुब्रह्मण्याह्वानम्, राजासन्दी, तानूनप्त्रम्, परीशासौ, प्रवर्ग्यः, घर्मः, रुक्मः, धवित्रम्, औपवसथ्यमहः, अन्तःपात्यः, यूपावट्यः, छदिः, लस्पूजनी, उच्छ्रायी, शालामुखीयः, हविर्धानमण्डपः, उपरवाः, सदः, धिष्ण्याः, औदुम्बरी, मार्जालीयः, वसतीवर्यः, प्रातरनुवाकः, द्रोणकलशः, ग्रहः, ऋतुपात्रम्, सोमांशवः, दशापवित्रम्, चमसाः, एकधनाः, निग्राभ्याः, अभि-षवणम्, प्रातःसवनम्, माध्यन्दिनं सवनम्, तृतीयसवनम्, स्तोत्रोपाकरणम्, स्तोत्रम्, स्तोमः, ज्योतींषि, विष्टुतिः, कुशा, सामानि, सामभेदानां नामानि, साम्नां भक्तयः, पृष्ठानि, पृष्ठ्यः, गायकः, शस्त्रम्, न्यूङ्खाः, प्रतिगरः, दीक्षान्तः, उदयनीयेष्टिः, अग्निष्टोमः, सोमसंस्थाः, उक्थ्यः, षोडशी, अतिरात्रः, अत्यग्निष्टोमः, वाज-पेयः, सोमपीथी, अग्निचित्, अग्निचयनम्, उखासम्भरणम्, प्रवर्जनम्, वनीवाहनम्, इष्टका, इष्टका-भेदाः, श्येनः,सर्वस्वारः, स्थपतिः,वाजपेयः, सम्राट्, राजसूयः, देवनम्, अश्वमेधः, पर्यङ्ग्याःपशवः, ब्रह्मोद्यम्, पृष्ठ्यः, रात्रिसत्राणि, अयनसत्राणि, गवामयनं सत्रम्, विषुवान्, बृसी, यज्ञियम्, इष्टम्, पुरुषमेधः, सर्वमेधः, सर्ववेदाश्चेति श्रौतपदानामर्थाः पर्यायवाचिशब्दाश्च (वेदभाषानिघण्टोर्ब्रह्मवर्गस्य ३७३-५८९ श्लोकाः) ।

**५. शिक्षणविधयः शैक्षिकसामग्री च**

निगमनागमन-प्रश्नोत्तर-प्रवचन-विमर्श-प्रदर्शनात्मकाः शिक्षणविधयोऽत्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैः तदन्येऽन्वेषणपरियोजनादयः प्राक्कल्पना-दयश्चेतिच्छात्रकन्द्रिता विधयोऽप्यत्र प्रयोक्तुं शक्यन्ते। यथासम्भवं शिक्षकैः क(लं मार्गनिर्देशनं कृत्वा स्वयमेवाध्ययने छात्राः प्रेरणीयाः । पाठ्यांशान्तर्गतानां श्लोकानां कण्ठस्थीकरणेऽपि छात्राः प्रेरणीयाः । विषयप्रसङ्गानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्यवस्था सम्बद्धशिक्षकण, विभागेन, विद्यापीठेन च विधेया। साम्प्रतं दूरशिक्षणमपि प्रचलितं

विद्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते । तदर्थं विश्वविद्यालयेन विद्यापीठेन च व्यवस्था विधेया ।

## ६. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति– आन्तरिकम् (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्य–योजनायाम् आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारत्वेन ग्रहीतुं शक्यन्ते । आन्तरिकमूल्याङ्कनस्य कृते प्रतिशतं विंशतिरङ्का ानिर्धारिताः । बाह्यमूल्याङ्कनस्य कृते वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिक–मूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्व–विद्यालय–परीक्षानियन्त्रणकार्यालयेनानुपातपद्धत्या संयोजनं विधीयते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिविशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति ।

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माण–सारणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क,ख,ग,घ | विवेचनात्मकाः | ३ | २ | २ × १२ = २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६ ×७ = ४२ |
| | व्याख्यात्मकाः | ४ | ३ | ३ × ८ = २४ |
| | वस्तुगताः | १० | १० | १० ×१ = १० |
| | | २६ | २१ | १०० |

## ६. पाठ्यसामग्रीसूची

### (क) पाठ्यग्रन्थौ

१. **जैमिनीयन्यायमाला सविस्तरा** ङ्कप्रथम–द्वितीयाध्यायौ), माधवाचार्यः, मुम्बई : विद्यारण्यविद्यापीठम्, सन् १९८३ ।

२. **वेदभाषानिघण्टुः, ब्रह्मवर्गः** ङ्क२२१–५८९ श्लोकाः), शिवराज आचार्यः कौण्डिन्न्यायनः, काष्ठमण्डपनगरम् : स्वाद्ध्यायशाला, २०५० ।

### (ख) सहायकग्रन्थाः

१. **मीमांसानुक्रमणिका,**आचार्यमण्डनमिश्रः, व्याख्याकारः– गङ्गानाथशर्मा झा मैथिलः, वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, वि.सं. १९८७ ।

२. **श्रौतपदार्थनिर्वचनम्,**विश्वनाथशास्त्री, वाराणसी : एच.एन. बागची, सन् १९१९ ।
३. **वैजयन्तीकोषः ङ्क**ब्राह्मणाध्यायः), यादवप्रकाशाचार्यः, वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, सन् १९७१ ।

**(ग) सन्दर्भग्रन्थाः**

१. **जैमिनीयन्यायमालाविस्तरस्याध्ययनम्,** आदरासुपल्लि यज्ञरामलु, हैदराबाद, सन् १९९४ ।
२. **मीमांसापरिभाषा,** कृष्णयज्वा, धर्मशास्त्र, राधाकृष्णाश्रमीनेपाली–टीकासहित, टीकाकार–डा.राधाकृष्ण अधिकारी, काठमाडौँ : पाठ्यक्रमविकासकन्द्र, त्रिभुवन–विश्वविद्यालय, २०५१ ।
३. **मीमांसाशाबरभाष्यम्,** कुमारिलभट्टपादकृततन्त्रवार्त्तिकसहितम्, पुणे : आनन्दाश्रमः, सन् १९७२ ।
४. **भाट्टभाषाप्रकाशः,** नारायणतीर्थः, वाराणसी : चौखम्बापुस्तकालयः, वि.सं. १९५७ ।

# विषयः– पूर्वमीमांसा

पाठ्यांशनाम–**मीमांसादर्शनपरिचयः धर्मपरिभाषाभावनादि च** पाठ्यांशसङ्केतः– पू.मि. ३०२
स्तरः– शास्त्री पूर्णाङ्काः– १००
वर्षः– प्रथमः वार्षिकः पाठ्यभारः– १६० घण्टाः
पत्रम्– द्वितीयम् साप्ताहिकः पाठ्यभारः– ६

**१. पाठ्यांशपरिचयः**

पत्रेऽस्मिन्मीमांसाशास्त्राध्यनोत्सुकानां नयशास्त्रप्रविविक्षूणां च कृते प्रारम्भिकविषयाणां पाठ्यांशाः सन्निविष्टाः सन्ति।

अत्र सन्निविष्टेषु पाठ्यांशेषु क–प्रकरणे दर्शनसामान्यपरिचयः, दर्शनविभागः, मीमांसादर्शनपरिचयः, मीमांसादर्शनाध्ययनपरम्परा, मीमांसायाः प्रमाणानि प्रमेयाश्चेति विषया निर्धारिताः सन्ति । ख–प्रकरणे जैमिनीयधर्ममीमांसाप्रकरणग्रन्थानां स्वरूपशैल्यादीना ंपरिचयात्मकं ज्ञान ंविधाय यागादिविधायकवाक्यगतपदस्य विवेचनं कृत्वा आख्यातत्वलिङ्त्ववाच्याया भावनायाः संक्षेपेण सरलरूपेण परिचयः प्रदत्तः । ग–प्रकरणे वेदस्य विभागं विधाय विधिभागस्य परिचयः प्रकरणग्रन्थशैल्या प्रस्तुतो विद्यते । विधेश्चत्वारो भेदा वर्णिताः सन्ति । **घ**–प्रकरणे यज्ञानुष्ठाने कस्यामधिकारो भवति, यज्ञे च क( क( विषयाः पारिभाषिकाः सन्तीति प्रतिपादित ंविद्यते । ङ–प्रकरणे श्रौताग्न्याधानकालनिरूपणं विधाय अग्न्यागारनिर्माणम्, आधाने ऋत्विग्विचारः, अरणिमन्थन–पुनराधानादीनां विषयाणां विवेचनं कृतं विद्यते।

अस्य पाठ्यांशस्याध्ययनेनच्छात्राः निर्धारितोद्देश्यानुरूपं धर्मप्रमाण–कर्मभेदसम्बद्धविषयविवेचने श्रौतयज्ञसम्बद्धशब्दार्थनिरूपणे च क्षमा भविष्यन्ति।

**२. पाठ्यांशसामान्योद्देश्यानि**

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोलिखितविषयेषु प्रावीण्यमेष्यन्ति–

- दर्शनपरिचयप्रदाने
- मीमांसादर्शनपरिचयप्रदाने
- प्रमाणप्रमेयपरिचयप्रदाने
- सूत्रभाष्यवार्तिककर्तृणामाचार्याणां परिचयप्रदाने
- भावनास्वरूपांशविवेचने
- वेदविभागपरिचायने
- विधिभेदपरिचयप्रदाने

- वैदिकयज्ञाधिकारविवेचने
- वैदिकयज्ञगतपारिभाषिकपदार्थप्रकाशने
- श्रौताग्न्याधानकालादिपरिचयप्रदाने च।

### ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| क | मीमांसादर्शनपरिचयप्रदानम् | पौरस्त्यदर्शनानां सामान्यपरिचयः इत्यतो गुणविचारश्च इति पर्यन्ता निर्धारिता विषयाः। | ३० | ४८ |
| ख | धर्मलक्षणादिनिरूपणम्, विधिभेदव्याख्यानम्, अङ्गत्वबोधकप्रमाण-बलाबलभावविश्लेषणञ्च | धर्मलक्षणम् इत्यतः प्रकृति-विकृतिलक्षणञ्च इति पर्यन्ता निर्धारिता विषयाः। | २० | ३२ |
| ग | प्रकरणनिरूपणप्रभृत्य-धिकारविधिनिरूपणान्तविषय प्रकाशनम्। | प्रकरणनिरूपणम् इत्यतो नित्यकर्माङ्गेषु यथाशक्तिरितिन्यायः इति पर्यन्ता निर्धारिता विषयाः | २० | ३२ |
| घ | श्रौतयाज्ञिकपदार्थपरिभाषानिरूपणम्। | यज्ञाधिकारनिरूपणम् इत्यतो रौद्रादिमन्त्रोच्चारणेऽपामुपस्पर्शः इति पर्यन्ता निर्धारिता विषयाः। | २० | ३२ |
| ङ | श्रौताग्न्याधाननिरूपणम्। | श्रौताधानकालनिरूपणम् इत्यतःपुनराधान-निरूपणम् इत्यन्ता निर्धारिता विषयाः। | १० | १६ |

### ४. पाठ्यवस्तुविवरणम्

**'क'प्रकरणे**

पौरस्त्यदर्शनानां सामान्यपरिचयः, पौरस्त्यर्शनविभागः, आस्तिक-नास्तिक-दर्शनसमान्यपरिचयः, मीमांसादर्शनपरिचयः, महर्षिजैमिनिपरिचयः, भाष्यवार्तिककार-परिचयः, वृत्तिकारपरिचयः, मीमांसाया मतत्रैविध्यम्, कुमारिल-प्रभाकरयोः कृतीनां परिचयः, भट्ट-प्रभाकरयोर्मतभेदः, अध्यायपरिचयः, प्रभाकरमतानुसारेण अध्यायविषयाः,

भाट्टसम्मतप्रमाणानि, सन्निकर्षविचारः, प्रत्यक्षविभागः, शब्दार्थविचारः, प्रमेयविचारः, आत्मवाद, ईश्वरवादः, गुणविचारश्च ।

**'ख'प्रकरणे**

धर्मलक्षणम्, यजेतेत्यत्रविध्यर्थः, अंशत्रयसहितद्विविधभावनानिरूपणम्, वेदापौरुषेयत्वम्, इति कर्तव्यतानिरूपणम्, अर्थवादवाक्यानां प्राशस्त्ये लक्षणा, वेदस्य पञ्चविधत्वम्, विधिवाक्योपयोगः, गुणविधिः, विशिष्टविधिः, सोमपदे मत्वर्थलक्षणाया आवश्यकत्वम्, सोमेन यजेत इत्यत्र गुणविधित्वपूर्वपक्षस्तन्निराकरणं च, गुणविधौ मत्वर्थलक्षणानिरूपणम्, विधेश्चातुर्विध्यम्, यागस्य रूपद्वयविवेचनम्, श्रुति–लिङ्ग–वाक्य–प्रकरण–स्थान–समाख्याप्रमाणनिरूपणम्, तेषां समवाये पारदौर्बल्यस्य निरूपणं च, आकृत्यधिकरणन्यायः, प्रकृति–विकृतिलक्षणञ्च (मीमांसान्यायप्रकाशपूर्वार्धस्य पूर्वभागः)।

**'ग'प्रकरणे**

प्रकरणनिरूपणम्, विश्वजिन्न्याय–रात्रिसत्रन्याय–निरूपणम्, प्रकरणेन क्रियाया एव विनियोगः, प्रकरणद्वैविध्यम्, विकृतौ प्राकृतानामपूर्वाणां चाङ्गानां सम्बन्ध इति निरूपणम्, अदृष्टार्थस्य न प्रतिनिधिः, अवान्तरप्रकरणस्य निरूपणम्, महाप्रकरणादवान्तरप्रकरणस्य बलवत्त्वम्, प्रकरणस्य स्थानादिभ्यः प्राबल्यम्, स्थानप्रमाणलक्षणम्, स्थानस्य समाख्यातः प्राबल्यम्, समाख्या–प्रमाणलक्षणम्, सन्निपत्योपकारका–ऽऽरादुपकारकयोर्निरूपणम्, प्रयोगविधिनिरूपणम्, श्रुत्यर्थ–पाठ–स्थान–मुख्य–प्रवृत्तिप्रमाणानि, मन्त्रपाठब्राह्मण–पाठयोर्विचारः, अधिकारनिरूपणम्, नित्यकर्माङ्गेषु यथाशक्तिरिति न्यायश्च ( मीमांसान्याय–प्रकाशपूर्वार्धस्योत्तरभागः) ।

**'घ'प्रकरणे**

यज्ञाधिकारनिरूपणम्, यागहोमलक्षणनिरूपणम्, आर्तविवज्याधिकार–विचारः, नित्यंकर्म यथाशक्ति काम्यं कर्म साङ्गमनुष्ठेयमिति विचारः, मन्त्रलक्षणविचारः, बर्हिर्यूनेध्म–परिधि–वेद–लक्षणविचारः, यज्ञायुध–काष्ठविचारः, प्रातिनिध्यविचारः, क्रमविचारः, अवत्तस्य हविषो नाशे किं कर्तव्यमिति विचारः, सत्राधिकारविचारः, सहस्रसंवत्सरसत्राधिकारविचारः, तन्त्रविचारः, एकार्थानां गुणानां विकल्पेन ग्रहणम्, मन्त्रस्वरविचारः, अवदानविचारः, प्रैषाणां मन्त्रत्वम्, रौद्रादिमन्त्रोच्चारणेऽपामुपस्पर्शः कार्य इति नियमः ( कात्यायनश्रौतसूत्रस्य प्रथमोऽध्यायः) ।

**'ङ'प्रकरणे**

श्रौताधानकालनिरूपणम्, अग्न्यगारनिर्माणम्, यजमाननियमाः, अरणिकाष्ठविचारः, अजबन्धनविचारः, चातुष्प्राश्यपचनम्, समिदाधानम्, ऋत्विक्सङ्ख्याविचारः, रात्रिजागरणम्, उषसि आधानोपक्रमः, अश्वानयनम्, अरणिमन्थनम्, अग्नित्रयाधानप्रकारः, सभ्याग्नेराधानम्, श्यैतादिसामगानप्रैषविचारः, ऋतुनक्षत्रादिविचारः, पूर्णाहुतिविधानम्,

आधानाङ्गमग्निहोत्रम्, तनूहविषां कालविधानम्, इष्टित्रयविचारः, आधानदक्षिणाविचारः, आहिताग्नेर्नियमाः, पुनराधाननिरूपणञ्च (कात्यायनश्रौतसूत्रस्यचतुर्थाध्यायस्य ७-११ कण्डिकाः) ।

## ५. शिक्षणविधयःशैक्षिकसामग्रीच

निगमनागमन-प्रश्नोत्तर-प्रवचन-विमर्श-प्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधयोऽत्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदन्येऽन्वेषणपरियोजनादयः प्राक्कल्पनादयश्छात्रकन्द्रिता विधयोऽप्यत्र प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः कवलं- मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । विषयप्रसङ्गानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकण, विभागेन, विद्यापीठेन वा विधेया । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते । तदर्थं सङ्गणक-यन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियताऽवलम्बनीया ।

## ६. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति- आन्तरिकं (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकण विभागसमन्वित-कार्ययोजनायाम् आन्तरिक-मूल्याङ्कनं विधीयते । गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारत्वेन गृह्यन्ते । आन्तरिकमूल्याङ्कनस्य कृते प्रतिशतं विंशतिरङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्य-परीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफल-प्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्व-विद्यालयपरीक्षानियन्त्रणकार्यालयेन अनुपात-पद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकाराः निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति ।

**वार्षिक-परीक्षा-प्रश्नपत्रनिर्माण-सारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क,ख,घ | विवेचनात्मकाः | ३ | २ | २×१२=२४ |
| क,ख,ग,,ङ | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६×७=४२ |
| क,ख,ग,घ | व्याख्यात्मकाः | ४ | ३ | ३×८=२४ |
| क,ख,ग,घ,ङ | वस्तुगताः | १० | १० | १०×१=१० |
| | | २६ | २१ | १०० |

## ६. पाठ्यसामग्रीसूची


**(क) पाठ्यग्रन्थाः**

१. **मीमांसान्यायप्रकाशः** (पूर्वार्धः), आपदेवः, वाराणसी : चौखम्बासंस्कृतसंस्थानम्, २०३७ ।

२. **कात्यायनश्रौतसूत्रम्** ङ्कप्रथमोऽध्यायः, चतुर्थाध्यायस्य ७-११ कण्डिकाश्च), वाराणसी : चौखम्बा-संस्कृत-प्रतिष्ठानम्, सन् १९९० ।

**(ख) सहायकग्रन्थाः**

१. **मीमांसाग्रन्थकारेतिहासः,** प्रमोदवर्धनः कौण्डिन्न्यायनः, काठमाण्डु : स्वाद्ध्यायशाला, २०६७ ।

२. **दर्शनामृत,** बुद्धिसागर पराजुली, काठमाडौँ : लेखक स्वयम्, २०२५ ।

३. **मीमांसादर्शन का विवेचनात्मक इतिहास,** गजाननशास्त्री मुसलगाँवकर, वाराणसी : चौखम्बा-विद्याभवन, सन् १९९२ ।

४. **पौरस्त्य दर्शन : एक चिनारी,** प्रा.पद्मप्रसाद भट्टराई, काठमाडौँ : विद्यार्थी पुस्तक भण्डार, २०७४ ।

५. **अर्थसङ्ग्रहः,** लौगाक्षिभास्करः, पञ्चमं संस्करणम्, मुम्बयी : निर्णयसागरमुऽणालयः, सन् १९५० ।

६. **मीमांसान्यायप्रकाशव्याख्या सारविवेचिनी,**वेङ्कटसुब्रह्मण्यापरनामधेयः चिन्नस्वामी शास्त्री, द्वितीयं संस्करणम्, वाराणसी : चौखम्बासंस्कृतसंस्थानम्, २०३७ ।

७. **यज्ञ क(र किन एक परिचय,** प्रा.डा.ऋषिराम पोखरेल, ऋतम्भरा (अङ्क ३,४,६) अनुसन्धानक(द्र : नेपाल-(महेन्द्र-) संस्कृत-विश्वविद्यालय, २०५४-२०५६ ।

**(ग) सन्दर्भग्रन्थाः**

१. **षड्दर्शनीसङ्ग्रहः,** जाषराजः, सम्पादकः- डा. दीर्घराजघिमिरेः, दाङ : नेपाल-(महेन्द्र-)संस्कृतविश्वविद्यालयः, २०४९ ।

२. **वेदप्रकाशः,** सत्यज्ञानानन्दतीर्थः, वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, सन् १९३४ ।

३. **मीमांसादर्शनको परिचय,** प्रमोदवर्धन कौण्डिन्न्यायन, दर्शनावली-६, काठमाडौँ : नेपाल प्रज्ञाप्रतिष्ठान, २०७६ ।

४. **मीमांसान्यायप्रकाशव्याख्या प्रभा,** वासुदेवशास्त्री अभ्यङ्करः, पुणे : भण्डारकरप्राच्यविद्याशोधसंस्थानम्, सन् १९७२ ।

५. **मीमांसाबालप्रकाशः,** शङ्करभट्टः, वाराणसी : विद्याविलासयन्त्रालयः, वि.सं. १९५९ ।

६. **कतिपयवैदिकयज्ञपरिचयः,** प्रमोदवर्धनः कौण्डिन्न्यायनः, काष्ठमण्डपनगरम् : स्वाद्ध्यायशाला, २०६७ ।

७. **मीमांसापरिभाषा** (नेपालीरूपान्तरसहिता), रूपान्तरकारः- प्रा.डा. ऋषिरामपोखरेलः, काष्ठमण्डपनगरम् : जयतु संस्कृतम्, २०७५।

# विषयः —शाङ्करवेदान्तः

पाठ्यांशनाम— **वेदान्तसिद्धान्तः प्रमाणप्रमेयौ च**
स्तरः—शास्त्री
खण्डः— प्रथमः
पत्रम्— प्रथमम्

पाठ्यांशसङ्केतः— शा.वे. ३०१
पूर्णाङ्काः— १००
वार्षिकः पाठ्यभारः— १६० घण्टाः
साप्ताहिकः पाठ्यभारः— ६

## १.पाठ्यांशपरिचयः

शाङ्करवेदान्तविषयमवलम्ब्य शास्त्रिकक्षायां प्रविश्य पिपठिषूणां छात्राणां कृते निर्धारितोऽयं पाठ्यांशः । षट्सु प्रकरणेषु विभक्तेऽस्मिन् पाठ्यक्रमे वेदान्तशास्त्रपरिचायकाः, पारिभाषिकशब्दार्थबोधकाः, वेदान्तशास्त्रे स्वीकृतानां प्रत्यक्षादिप्रमाणानां ज्ञापकाः, मोक्षसाधनस्य प्रतिपादकाः, मोक्षभेदप्रदर्शकाश्च विषयाः निर्धारिताः सन्तिः ।

तत्र प्रतिप्रकरणं विषयसम्योजनंचानया रीत्या विहितम् वर्तते –**कप्रकरणे** वेदान्तदर्शनस्य परिचयप्रदायकाः, तस्य विकासक्रमबोधकाः, तद्सम्बद्धानां प्रमुखग्रन्थानां ग्रन्थकाराणाञ्च परिचायका विषया निर्धारिताः सन्ति । **खप्रकरणे** वेदान्तशास्त्राध्ययने समुपकारकाणां पारिभाषिकशब्दानामर्थस्य ज्ञापका विषया निर्धारिताः सन्ति, **गप्रकरणे** प्रत्यक्षप्रमाणसाधका विषयाः सन्त्युपश्थापिताः । **घप्रकरणे** अनुमानप्रमाण–प्रतिपादका उपमानप्रमाणसाधकाश्च विषयाः पाठ्यत्वेनोस्थापिताःऽसन्ति । **ङप्रकरणे** आगमप्रमाणस्वरूपार्थापत्तिप्रमाण–स्वरूपप्रतिपादका विषया निर्धारिताः । **चप्रकरणे** तु वेदान्तप्रतिपाद्यस्य ब्रह्मणो जीवस्य च स्वरूपादिदर्शकाः, मोक्षस्वरूपप्रतिपादकाश्च विषयाः पाठ्यविषयत्वेन निर्दिष्टाः सन्तीति पाठ्यांशश्यास्य वैशिष्ट्यम् ।

वेदान्तदर्शनस्य प्रारम्भिका महत्त्वाधायका विषयाश्च वेदान्तपरिभाषायां प्रतिपादिताः सन्तीति तदनुसारेणापि मुख्यविषयसङ्कलनं विहितमिति पाठ्यक्रमेणानेन निर्धारितोद्देश्यमधिगतं स्यादिति निश्चित्य पाठ्यक्रमोऽयं प्रकल्पितः ।

## २.पाठ्यांशसामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोलिखितेषु विषयेषु प्रवीणा भविष्यन्ति—

- वेदान्तदर्शनस्य परिचयप्रदाने,
- वेदान्तदर्शनाध्ययनेऽत्यावश्यकानां पारिभाषिकशब्दानां व्युत्पत्तौ,
- वेदान्तदर्शने स्वीकृतानां प्रमाणानां स्वरूपप्रतिपादने,
- वेदान्तदर्शनप्रतिपाद्यविषयप्रस्तुतौ,
- वेदान्तदर्शनस्य प्रयोजनबोधने च ।

## ३.पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठाः |
|---|---|---|---|---|
| क | वेदान्तदर्शनस्य परिचयः, विकासक्रमविश्लेषणम्, प्रमुखग्रन्थानां ग्रन्थकाराणाञ्च परिचयप्रदानम् | दर्शनानामास्तिकनास्तिक भेदेनवर्गीकरणम् इत्यतो भामतीप्रस्थानविवरणप्रस्थानपरिचयश्चेत्यन्ता निर्धारिता विषयाः | १० | १६ |
| ख | वेदान्तदर्शनाध्ययन आवश्यकानां पारिभाषिकशब्दानां विवेचनम् | अतिव्याप्तिः अत्यन्ताभाव इत्यादयो निर्धारिताः पारिभाषिकशब्दाः । | १० | १६ |
| ग | प्रत्यक्षप्रमाणस्वरूपव्याख्यानम्, तद्भेदनिरूपणञ्च | वेदान्तपरिभाषायाः प्रत्यक्षपरिच्छेदः | २५ | ४० |
| घ | अनुमानप्रमाणस्वरूपाव्याख्यानम्,तदवयव विश्लेषणम्, अनुमानभेदनिदर्शनम्,तत्प्रयोजनप्रतिपादनञ च उपमानप्रमाणस्वरूपविवेचनम्, तस्य पृथक्प्रमाणत्वस्थापनम्, तत्प्रयोजननिरूपणञ्चं | वेदान्तपरिभाषायाः अनुमानोपमानपरिच्छेदौ | १५ | २४ |
| ङ | आगमप्रमाणस्वरूपविवेचनम्, तद्भेदनिरूपणं प्रयोजनव्याख्यानञ्च अर्थापत्तिप्रमाणस्वरूपनिर्वचनम्, तद्भेदव्याख्यानम्, प्रयोजनप्रकाशनञ्च अनुपलब्धिप्रमाणस्वरूपनिरूपणम्, तस्य पृथक्प्रमाणत्वसाधनम्, तद्भेदनिदर्शनञ्च | वेदान्तपरिभाषायाः आगमार्थापत्त्यनुपलब्धि-परिच्छेदाः | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| | **वेदान्तसिद्धान्तानुसारेण प्रामाण्यस्य स्वतस्त्वं** परतस्त्वं वेति विवेचनम् | | | |
| च | वेदान्तशास्त्रस्य विषयभूतस्य ब्रह्मणो जीवस्य तदैक्यस्य च स्वरूपविवेचनम, सृष्टिप्रलयादिनिरूपणञ्च वेदान्तशास्त्रस्य प्रयोजनभूतस्य मोक्षस्य साधनं किमिति विवेचनम्, क्रममुक्तिसद्योमुक्तिभेदेन मोक्षद्वैविध्यनिदर्शनञ्च । | वेदान्तपरिभाषायाः विषय–प्रयोजनपरिच्छेदौ | २० | ३२ |

**४. पाठ्यवस्तुविवरणम्**

**'क'प्रकरणे**

दर्शनानामास्तिकनास्तिकभेदेन वर्गीकरणम्, वेदान्तशब्दस्य व्युत्पत्तिः, उपनिषत्परिचयः, उपनिषदो वर्गीकरणम् (मन्त्रोपनिषदः, ब्राह्मणोपनिषदः, उपलभ्यमानवेदशाखान्तर्गता उपनिषदः, निश्चितवेदशाखान्तर्गता उपनिषदः, सम्भाव्यमानवेदशाखान्तर्गता उपनिषदः, वेदबाह्यत्वेनसम्भाव्यमाना उपनिषदः), श्रीमद्‌भगवद्‌गीतापरिचयः, ब्रह्ममीमांसासूत्रपरिचयः, वेदान्तदर्शनस्य व्याख्यायाः प्रमुखाः सम्प्रदायाः(भेदाभेदः, विशिष्टाद्वैतः, द्वैताद्वैतः, द्वैतः, शुद्धाद्वैतश्च, एतेषां सम्प्रदायप्रवर्तकानां मुख्यग्रन्थसहितस्य नाम्नो ज्ञानं च),प्रमुखाणां वेदान्तग्रन्थकाराणां प्रमुखग्रन्थानां ज्ञानम् (व्यासः, भर्तृप्रपञ्चः, मण्डनमिश्रः, शङ्करभगवत्पादः, पद्मपादः, सुरेश्वरः, वाचस्पतिमिश्रः, विमुक्तात्मा, सर्वज्ञात्मा, प्रकाशात्मा, श्रीहर्षः, चित्सुखः, अमलानन्दः, अनुभूतिस्वरूपः, आनन्दगिरिः, भारतीतीर्थः, शङ्करानन्दः, विद्यारण्यः, अप्पयदीक्षितः, सदानन्दः, धर्मराजाध्वरीन्द्रः, मधुसूदनसरस्वती, ब्रह्मानन्दश्चेत्येषां ग्रन्थकाराणां प्रमुखग्रन्थानां ज्ञानम्), भामतीप्रस्थान–विवरणप्रस्थानपरिचयश्च ।

**'ख'प्रकरणे**

अधोलिखितानां पारिभाषिकशब्दानामर्थाः–

अतिव्याप्तिः, अत्यन्ताभावः, अनुयोगी, अनुव्यवसायः, अनैकान्तिकः, अन्योन्याभावः, अन्वयव्यतिरेकी, अन्यथासिद्धः, अपसिद्धान्तः, अप्रयोजकम्, अप्रसिद्धविशेषणम्, अर्थान्तरः, अवच्छिन्नः, अव्याप्तिः, असमवायि कारणम्,असम्भवः, असाधारणः, असिद्धः, आश्रयासिद्धः, उदाहरणम्, उपनयः, उपादानकारणम्, उपाधिः, करणम्,

कालात्ययापदिष्टः, केवलव्यतिरेकी, केवलान्वयी, जातिः, तादात्म्यसम्बन्धः, दृष्टान्तासिद्धः, निगमनम्, निमित्तकारणम्, पक्षः, पक्षधर्मता, प्रतिज्ञा, प्रतियोगी, प्रध्वंसाभावः, प्रागभावः, बाधः, लिङ्गपरामर्शः, विपक्षः, विरुद्धः, व्यक्तिः, व्यभिचारः, व्यापारः, व्याप्तिः, व्याप्यः, व्याप्यत्वासिद्धः, संयोगसम्बन्धः, संयुक्तसम्बन्धः, सन्दिग्धानैकान्तिकः, सपक्षः, सप्रतियोगी, समवायिकारणम्, समवेतत्वम्, सिद्धसाधनम्, सोपाधिकः, स्मृतिः, स्वरूपासिद्धः, हेतुश्च ।

**'ग'प्रकरणे**

प्रमालक्षणम्, प्रत्यक्षप्रमाणस्य सामान्यलक्षणम्, अन्तः करणस्य सावयवत्वम्, मनसोऽनिन्द्रियत्वम्, ज्ञानगत विषयगतयोः प्रत्यक्षत्वयोः प्रयोजकः, त्रिविधं चैतन्यम्, वृत्तिः, ज्ञानगतप्रत्यक्षलक्षणस्य परिष्कारः, विषयगतप्रत्य क्षलक्षणस्य परिष्कारः, वृत्तेश्चातुर्विध्यम्, सविकल्पक - निर्विकल्पकभेदेन प्रत्यक्षद्वैविध्यम्, तत्त्वमस्यादिवाक्यानां निर्विकल्पकत्वमखण्डार्थत्वं च, जीवसाक्षीश्वरसाक्षिभेदेन प्रत्यक्ष-द्वैविध्यम्, मायाया एकत्वम्,परमेश्वरस्यैकत्वेऽपि मायागतगुणभेदेन ब्रह्म( विष्णुमहेश्वरशब्दवाच्यत्वम्, भ्रमज्ञानस्य प्रातिभासिकत्वम्, परिणामो विवर्तश्च, साक्षिण्यध्यस्तत्वेऽपि प्रातिभासिकरजतादीनामहं रजतमिति प्रत्ययाभावः, प्रातिभासिकरजत-व्यावहारिकरजतयोर्भेदः, स्वाप्नवस्तूनां प्रातिभासिकत्वम्, इन्द्रियजन्यतदजन्यभेदेन पुनः प्रत्यक्षद्वैविध्यं च ।

**'घ'प्रकरणे**

अनुमानलक्षणम्, व्याप्तिस्मरणादीनां कारणत्वखण्डनम्, व्याप्तिस्वरूपम्, अनुमानस्यान्वयिरूपत्वमेवेति सिद्धान्तः, व्यतिरेक्यनुमितेरर्थापत्तिप्रमाणविषयत्वम्, स्वार्थपरार्थभेदेनानुमानद्वैविध्यम्, अवयवत्रयेणैवानुमान-सिद्धिः, अनुमानेन ब्रह्म-भिन्ननिखिलप्रपञ्चस्य मिथ्यात्वसिद्धिः, सत्त्वत्रैविध्यं च । उपमानलक्षणम्, उपमानस्य मानान्तरत्वम्, उपमानप्रमाणस्य वेदान्ते उपयोगस्य विचारश्च ।

**'ङ'प्रकरणे**

आगमप्रमाणलक्षणम्, शाब्दबोधे कारणानि, शक्यलक्ष्यभेदेन पदार्थद्वैविध्यम्, शक्तिविचारः,लक्षणाभेदाः, तत्त्वमस्यादिवाक्ये लक्षणाया अभावः, तात्पर्यनिरूपणम्, वेदापौरुषेयत्वम्, पौरुषेयापौरुषेय-भेदेनागमद्वैविध्यम्, वेदान्ते आगमप्रमाणोपयोग-विचारश्च अर्थापत्तिलक्षणम्, अर्थापत्तिभेदाः, अर्थापत्तेर्मा-नान्तरत्वम्, अर्थापत्तेर्वेदान्ते उपयोगप्रकारश्च । अनुपलब्धिलक्षणम्, वृत्तिवैजात्यात् प्रमाणभेदः, अभावचातुर्विध्यम्, सोपाधिकनिरूपाधिकत्वेन भेदद्वैविध्यम्, स्वतः प्रामाण्यवादः, परतोऽप्रामाण्यवादश्च ।

**'च'प्रकरणे**

प्रामाण्यद्वैविध्यम्, लक्षणद्वैविध्यम्, सृष्टिक्रमः, पञ्चीकरणम्, प्रलयभेदाः, प्रलयक्रमः, सृष्टिप्रलयप्रतिपादनस्य तात्पर्यम्, तत्त्वम्पदार्थविचारः, तत्त्वम्पदार्थयोरैक्यम्, सिद्धार्थेऽपि प्रामाण्यस्य सम्भवश्च ।

प्रयोजनलक्षणम्, प्रयोजनद्वैविध्यम्, मोक्षस्वरूपम्, अपरोक्षज्ञानस्य मोक्षहेतुत्वम्, अपरोक्षज्ञाने करणविचारः, आत्मज्ञाने कर्मण उपयोगविचारः, श्रवणादीनां ज्ञानसाधनत्वम्, साधनचतुष्टयविचारः, सगुणोपासनायाः परम्परया मोक्षहेतुत्वम्, मोक्षविचारश्च ।

**५.शिक्षणविधिः**

निगमनागमनविमर्शव्याख्यानप्रश्नोत्तराद्याः पद्धतयो विषयानुसारेणा-वलम्बनीयाः शिक्षणक्रमे छात्रा एव विशेषतो व्यापृताः करणीयाः । सति सम्भवे छात्रा अन्वेषणेऽपि प्रेरणीयाः । यथासम्भवं श्रव्यदृश्यसामग्रीणामपि प्रयोगो विधेयः । आवश्यकत्वे सति शिक्षकएण दूरशिक्षणानुकूलतया पाठयोजना विधेया, प्रविध्युपयोगश्च कर्तव्यः ।

**६.मूल्याङ्कनविधिः**

मूल्याङ्कनं द्विधा विभक्तमस्ति– आन्तरिकम् (निर्माणात्मकम्), बाह्यम् (निर्णयात्मकम्) चेति आन्तरिकमूल्याङ्कनं मुख्यरूपेण कक्षागतमेव भवति। छात्रोपस्थितिम्, कक्षाकार्यम्, गृहकार्यम्, कक्षापरीक्षा चेत्याद्याधारेण विभागसमन्वयेनाऽऽन्तरिकं मूल्याङ्कनं विधीयते । विंशतिप्रतिशदङ्का आन्तरिकमूल्याङ्कनस्य कृते निर्धारिताः। बाह्यपरीक्षा शतपूर्णाङ्कात्मिकैव भवति । परीक्षाफलप्रकाशने आन्तरिकमूल्याङ्कनस्याङ्कानां समायोजनं भवति । बाह्यपरीक्षार्थं प्रश्नपत्रनिर्माणमधोनिर्दिष्टप्रकारेण भवति–

**वार्षिक –परीक्षा–प्रश्नपत्रनिर्माणयोजना**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| ग, घ, ङ, च | विवेचनात्मकाः | ३ | २ | २४ |
| क, ख, ग, घ, ङ, च | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| ग, घ, ङ, च | व्याख्यात्मकाः | ४ | ३ | २४ |
| क, ख, ग, घ, ङ, च | वस्तुगताः | १० | १० | १० |
| योगः | | २६ | २१ | १०० |

**७. पाठ्यसूची**

**क) पाठ्यग्रन्थः**

१.**वेदान्तपरिभाषा**, धर्मराजाध्वरीन्द्रकृता।

**ख) सहायकग्रन्थाः**

१.**ब्रह्ममीमांसासूत्र–कौण्डिन्न्यायनवृत्तिः (भूमिका),** शिवराज आचार्यः कौण्डिन्न्यायनः, चौखम्बाविद्याभवन, वाराणसी, २००२।

२. **पञ्चदशी तत्त्वविवेकप्रकरणात्मिका** विद्यारण्यः (भूमिकाभागः) व्या. सुमोदवर्धन कौण्डिन्न्यायनः, विद्यार्थी पुस्तक भण्डार, काठमाडौं २०७० वै.)
३.कल्याणपत्रिकाया **वेदान्ताङ्कः** गीताप्रेस, गोरखपुर
४. **शांकर-वेदान्त,** हरप्रकाश वेदान्ताचार्य, देहरादून, १९७६क्रै.।
५. **न्यायकोशः,** भीमाचार्यः, पुण्यपत्तनम्, १९७८ क्रै.।
६.**सर्वतन्त्रसिद्धान्तपदार्थलक्षणसंग्रहः,** गौरीशङ्करः, भार्गवभूषण-मुद्रालयः, काशी, २००६ वै.)
७.**शाङ्करवेदान्तकोशः,** डा. मुरलीधरपाण्डेयः, सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, वाराणसी, १९९८ क्रै.।
८. **तर्कसङ्ग्रहः,** अन्नम्भट्ट ।
९. **वेदान्तपरिभाषा,** धर्मराजध्वरीन्द्रकृत, शिवदत्तकृतार्थदीपिका-टीकासनाथा, विद्यानन्दजिज्ञासुकृतेनानुवादेन व्याख्यया च सहिता, ज्ञानपत्रप्रकाशनमन्दिरम्, नर्मदापुरम्, १९६७ क्रै.।
१०.**वेदान्तपरिभाषासार,** शरत्कुमार भट्टराई. रत्नपुस्तक भण्डार, काठमाडौं २०६८ वै.।

**ग.सन्दर्भग्रन्थः**

१. **वेदान्तसारः** सदानन्दकृतः।
२.**षड्दर्शनीसंग्रहः** (जाषराजः, सं. डा.दीर्घराजघिमिरे, म.सं.वि. वि., दाङ २०४९ वै.)।

# विषयः — शाङ्करवेदान्तः

| | |
|---|---|
| पाठ्यांशनाम—**ईशाद्यष्टोपनिषदः वेदान्तसिद्धान्तश्च** | पाठ्यांशसङ्केतः—शा.वे. ३०२ |
| स्तरः—शास्त्री | पूर्णाङ्काः— १०० |
| खण्डः—प्रथमः | वार्षिकः पाठ्यभारः—१६० घण्टाः |
| पत्रम्—द्वितीयम् | साप्ताहिकः पाठ्यभारः—६ |

## १.पाठ्यांशपरिचयः

शास्त्रिकक्षायां प्रविश्य शाङ्करवेदान्तविषयमवलम्ब्य अध्ययेतुकामानां छात्राणां कृते पाठ्यंशोऽयं निर्धारितः । प्रकरणषट्कात्मकऽस्मिन् पाठ्यक्रमेऽध्ययनीयविषयत्वेन ईश–कठ–मुण्ड–प्रश्न–माण्डुक्य–ऐतरेय–तैत्तिरीयोपनिषदां विषयाः, वेदान्तदर्शनस्य प्राम्भिका विषयाश्च पाठ्यांशवेन निर्धारिताः सन्ति ।

तत्र प्रतिप्रकरणं विषयसंयोजनञ्चेत्थं विहितम् । तथा– हि **क प्रकरणे** शोकमोहनिवर्तका विषयाः इन्द्रियमनसां प्रेरकत्वेन ब्रह्मण साधकाश्च विषया, **ख प्रकरणे** अग्निब्रह्मविधयोर्ज्ञापकाः श्रेयोमार्गमहिमबोधकाश्च विषयाः सन्ति निर्दिष्टाः । **ग प्रकरणे** परापरविद्ययोर्वैलक्षण्यज्ञापकाः, **घ प्रकरणे** तु पिप्पलादकृतब्रह्मोपदेशसम्बद्धाः, ओङ्कारः सर्वमित्युद्बोधकाश्च विषया निर्दिष्टाः । एवमेव **ङ प्रकरणे** ब्रह्मनिरूपणप्रकारज्ञापकाः, सृष्टिक्रमप्रकाशकाः, आत्मज्ञानप्रकारप्रदर्शका विषयाः, च प्रकरणे तु वेदान्तशास्त्र–स्यानुबन्धचतुष्टयपरिचायकाः, अध्यारोपापवादप्रतिपादकाः, आत्मज्ञानोपायादि–बोधकाश्च विषयाः स्थापिताः सन्ति । यद्यपि मुख्यतया कतिपयोपनिषदां विषयाः पाठ्यक्रमेऽस्मिन् निर्धारिताः, तथापि वेदान्तशास्त्रस्यानुबन्धचतुष्टयादिका विषया अपि सङ्कलय्य स्थापिता इति पाठ्यांशोऽयं विषयबोधनायोपकारकं सेत्स्यतीनि विश्वसितुं शक्यमेव । पाठ्यक्रमेऽस्मिन् सामान्योद्देश्यनिर्धारणं विशिष्टोद्देश्यक–निदर्शनं शिक्षणविधिः, मूल्याङ्कनप्रकाराणाञ्चोल्लेखो विहित इति सर्वाङ्ग–पूर्णत्वमस्यति कथयितुं शक्यते ।

## २.पाठ्यांशसामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोलिखितेषु विषयेषु प्रवीणा भविष्यन्ति—

- उपनिषदां सामान्यपरिचयप्रस्तुतौ,
- उपनिषदामर्थव्याख्याने,
- उपनिषत्प्रतिपाद्यविषयबोधने,
- वेदान्तदर्शनसिद्धान्तप्रतिपादने च ।

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठाः |
|---|---|---|---|---|
| क | शोकमोहनिवृत्तिहेतुनिरूपणम् | ईशावास्योपनिषद् | १५ | २४ |

| | | | | |
|---|---|---|---|---|
| | इन्द्रियमनसां प्रेरकरूपेण ब्रह्मणो व्याख्यानञ्च । | कठोपनिषच्च | | |
| ख | अग्निब्रह्मविद्ययोर्निरूपणं,श्रेयोमार्ग महिमादिबोधनञ्च । | कठोपनिषद् | १५ | २४ |
| ग | परापरविद्ययोर्वैलक्षण्यप्रतिपादनम् | मुण्डकोपनिषद् | १५ | २४ |
| घ | पिप्पलादकृतब्रह्मोपदेशप्रस्तुतिः, ओङ्कारःसर्वमिति प्रतिपादनञ्च । | प्रश्नोपनिषद् माण्डूक्योपनिष-च्च | १५ | २४ |
| ङ | ब्रह्मनिरूपणप्रकारप्रस्तुतिः सृष्टिक्रमनिरूपणम्, आत्मज्ञानप्रकारप्रकाशनञ्च | तैत्तिरीयोपनिषद् ऐतरेयोपनिषच्च | २० | ३२ |
| च | वेदान्तशास्त्रस्यानुबन्धचतुष्टयविवेचनम् अध्यारोपापवादव्याख्यानम्, आत्मज्ञानोपायावबोधनम्,, मोक्षक्रमस्वरूपादिप्रतिपादनञ्च । | वेदान्तसारः | २० | ३२ |

**४.पाठ्यवस्तुविवरणम्**

**'क'प्रकरणे**

आत्मनो याथात्म्यप्रकाशः, निष्कामकर्मसु प्रवर्तनम्, आत्मस्वरूपविचारः, आत्मस्वरूपविदः शोकमोहनिवृत्तिः, विद्याविद्ययोर्व्यस्तोपासननिन्दा समस्तोपासनविधानं च, उपासकस्य सुपथा ब्रह्मलोकप्राप्तिरनावृत्तिश्च ।

इन्द्रियमनसां प्रेरकरूपेण ब्रह्मणः प्रतिपादनम्, ब्रह्मणो दुर्विज्ञेयत्वोक्तिः, अमृतत्वप्राप्त्यर्थं ब्रह्मणोऽवश्यज्ञेयत्वम्, आख्यायिकामाध्यमेन ब्रह्मस्वरूपप्रतिपादनं च ।

**'ख'प्रकरणे**

यमद्वारा नचिकेतसे अग्निविद्योपदेशः, नचिकेतसो ब्रह्मविद्याधिकारित्वपरीक्षा, श्रेयः प्रेयोमार्गविवेचनम्, ब्रह्मविद्याया महत्त्वप्रतिपादनम्, ब्रह्मण ओङ्काररूपेणो-पदेशः, बुद्ध्याद्युपाधिकृतमात्मनो भोक्तृत्वम्, आत्म-शरीरेन्द्रियादीनां रथिरथादिकल्पनम्, आत्मसाक्षात्कारोपायः, बाह्यविषय-व्यावृत्तस्यैवाऽऽत्म-साक्षात्कारः, भेददर्शिनो निन्दा, अग्न्यादिदृष्टान्तद्वारा ब्रह्मणः प्रतिपादनम्, ब्रह्मणः सर्वनियन्तृत्वोक्तिश्च ।

**'ग'प्रकरणे**

शौनकस्याङ्गिरसं प्रत्युपसत्तिः, कस्मिन् विज्ञाते सर्वं विज्ञातं भवतीति प्रश्नः, परापरविद्ययोरुपदेशः, अपरविद्यायाः फलवर्णनम्, अपरविद्याफलस्य

निःश्रेयोहेतुत्वाभावोक्त्या परविद्यास्तुतिः, अक्षरब्रह्मणः प्राणादिसृष्टिः, अक्षरब्रह्मणः सर्वात्मत्वम्, अक्षरब्रह्मज्ञानोपायः, अक्षरब्रह्मज्ञानेन हृदयग्रन्थिच्छेदः, समानवृक्षाश्रयिणोर्जीवेश्वरयोः स्वरूपवर्णनम्, अज्ञानेन जीवस्य शोकयुक्तत्वं ज्ञाने सति शोकविमुक्तिः, ज्ञानोपायाः, ब्रह्मविदो ब्रह्मरूपत्वं च ।

**'घ'प्रकरणे**

विद्याप्राप्तये सुकशादीनां पिप्पलादं प्रत्युपसत्तिः, कबन्धिनः प्रजोत्पत्तिविषयकः प्रश्नः तत्समाधानं च, भार्गवस्य प्रजाधारणादिविषयकः प्रश्नः तत्समाधानं च, आश्वलायनस्य प्राणोत्पत्यादिविषयकः प्रश्नः तत्समाधानं च, सौर्यायणेर्जीवात्मविषयकः प्रश्नः तत्समाधानं च, सत्यकामस्य ओङ्कारध्यानफलविषयकः प्रश्नः तत्समाधानं च, सुकशसः षोडशकलपुरुषविषयकः प्रश्नः तत्समाधानं च ।ओङ्कारस्य त्रिकालान्तर्गतत्वं तदतीतत्वं च, आत्मनो जागरितस्थानादिचतुष्पादत्वम्, आत्मवाचकनोङ्कारेण सहाऽऽत्मन एकत्वप्रतिपादनं च ।

**'ङ'प्रकरणे**

वेदाङ्गरूपायाः शिक्षायाः स्वरूपोक्तिः, प्राग्ब्रह्मज्ञानाच्छ्रौतस्मार्तकर्मानुष्ठान-मावश्यकमिति तत्प्रतिपादनम्, ब्रह्मोपलब्धिस्थानरूपेण हृदयाकाशवर्णनम्, ओङ्कारोपासनप्रतिपादनम्, स्वाध्यायप्रवचनमाहात्म्यप्रदर्शनम्,सत्यवदनाद्युपदेशः, ब्रह्मणः स्वरूपलक्षणप्रतिपादनम्, ब्रह्मणस्तटस्थलक्षणप्रतिपादनाय सृष्टिक्रमवर्णनम्, अन्नमयादिपञ्चकोशविवेकः, अव्याकृताद् ब्रह्मणो नामरूपात्मकस्य जगत उत्पत्तिः, आनन्दमीमांसा, ब्रह्मज्ञानाय भृगोः वरुणं प्रत्युपसत्तिः, अन्नादिषु ब्रह्मदृष्ट्युपदेशश्च ।

अव्याकृतात्मनो निरूपणम्, आत्मनो लोकादीनां सृष्टिः,वैराग्यमुत्पादयितुं मनुष्यशरीरोत्पत्तिवर्णनम्, कोऽयमात्मेति प्रश्नस्तस्योत्तररूपेण प्रज्ञानं ब्रह्मेति प्रतिपादनं च ।

**'च'प्रकरणे**

वेदान्तशब्दार्थः, अनुबन्धचतुष्टयविचारः, अध्यारोपापवादस्वरूपविचारः, अज्ञान-विवेचनम्, अज्ञानस्याऽऽवरणविक्षेपशक्तिद्वयम्, प्रपञ्चसृष्टिक्रमः, सूक्ष्मशरीर-स्थूलशरीरोत्पत्तिः, पञ्चीकरणम्, महावाक्यार्थविचारः, ब्रह्मसाक्षात्कार- साधनानि श्रवण-मनन-निदिध्यासनानि, जीवन्मुक्तलक्षणं च ।

**५.शिक्षणविधिः**

निगमनागमनविमर्शव्याख्यानप्रश्नोत्तराद्याः पद्धतयो विषयानुसारेणा-वलम्बनीयाः शिक्षणक्रमे छात्रा एव विशेषतो व्यापृताः करणीयाः । सति सम्भवे छात्रा अन्वेषणेऽपि प्रेरणीयाः । यथासम्भवं श्रव्यदृश्यसामग्रीणामपि प्रयोगो विधेयः । आवश्यकत्वे सति शिक्षकैण दूरशिक्षणानुकूलतया पाठयोजना विधेया, प्रविध्युपयोगश्च कर्तव्यः ।

**६.मूल्याङ्कनविधिः**

मूल्याङ्कनं द्विधा विभक्तामस्ति– आन्तरिकम् (निर्माणात्मकम्), बाह्यम् (निर्णयात्मकम्) चेति आन्तरिकमूल्याङ्कनं मुख्यरूपेण कक्षागतमेव भवति । छात्रोपस्थितिम्, कक्षाकार्यम्, गृहकार्यम्, कक्षापरीक्षा चेत्याद्याधारेण विभागसमन्वयेनाऽऽन्तरिकं मूल्याङ्कनं विधीयते। विंशतिप्रतिशदङ्का आन्तरिकमूल्याङ्कनस्य कृते निर्धारिताः। बाह्यपरीक्षा शतपूर्णाङ्कात्मिकैव भवति। परीक्षाफलप्रकाशने आन्तरिकमूल्याङ्कनस्याङ्कानां समायोजनं भवति । बाह्यपरीक्षार्थं प्रश्नपत्रनिर्माणमधोनिर्दिष्टप्रकारेण भवति–

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माणयोजना**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क, ख, ग, घ, ङ, च | विवेचनात्मकाः | ३ | २ | २४ |
| क, ख, ग, घ, ङ, च | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| क, ख, ग, घ, ङ, च | व्याख्यात्मकाः | ४ | ३ | २४ |
| क, ख, ग, घ, ङ, च | वस्तुगताः | १० | १० | १० |
| योगः | | २६ | २१ | १०० |

**७. पाठ्यसूची**

**क) पाठ्यग्रन्थौ**

१.**ईशाद्यष्टोपनिषदः**(ईश–कठ–कठ–मुण्ड–प्रश्न–माण्डूक्य–ऐतरेयतैत्तिरीयोपनिषदः, अद्वैत–सिद्धान्तानुसार्यर्थसहिताः)

२.**वेदान्तसारः** , सदानन्दविरचितः ।

**ख) सहायकग्रन्थौ**

१.**ईशादि नौ उपनिषद्** शाङ्करभाष्यार्थ, गीताप्रेस, गोरखपुर, सप्तम पुनर्मुद्रण,२०६६ वै.।

२. **ईशावास्याद्युपनिषदः**, शङ्करानन्दकृतव्याख्यासमन्विताः।

३.**ईशादि नौ उपनिषद्** भाषानुवाद, माधवप्रसाद–देवकोटा, ने.रा.प्र.प्र., काठमाडौं २०३० वै.)।

४.**ईशादि दश उपनिषद** (डा.स्वामीरामानन्दगिरिकृतभाषानुवादतथा व्याख्या युक्तः, देवघाट, तनहुँ, २०७३ वै.)।

५.**वेदान्तसारः** सदानन्दविरचितः, रामतीर्थकृत–विद्वमनोरञ्जन व्याख्यया युक्तः, भाषाव्याख्यया विस्तृतभूमिकया च'सहितः, भारतीय–विद्या– प्रकाशनम्, वाराणसी, दिल्ली, द्वि.सं. १९९९ क्रै.।

**ग) सन्दर्भग्रन्थाः**

१. कल्याणपत्रिकाया **उपनिषद्विशेषाङ्कः** (गीताप्रेस, गोरखपुर, २००५ वै.)

२. कल्याणपत्रिकाया **वेदान्ताङ्कः** (गीताप्रेस, गोरखपुर १९९३ वै.)।

# विषयः - धर्मशास्त्रम्

पाठ्यांशनाम– **संस्कारव्यवहारादि**
स्तरः– शास्त्री
वर्षः– प्रथमः
पत्रम्– प्रथमम्

पाठ्यांशसङ्केतः– ध.शा. ३०१
वार्षिकः पाठ्यभारः–१६० घण्टाः
पूर्णाङ्काः– १००
साप्ताहिकः पाठ्यभारः– ६

**१. पाठ्यांशपरिचयः**

"धर्मशास्त्रं तु वै स्मृतिः" इत्युक्तेः मन्वत्रिविष्णुयाज्ञवल्क्यादीनां स्मृतयः धर्मशास्त्रनाम्ना प्रसिद्धाः सन्ति । तासु मनुस्मृतिः सर्वश्रेष्ठा सर्वज्येष्ठा च मन्यते । मनुस्मृतौ आचारव्यवहारप्रायश्चित्तसम्बद्धाः सर्वे विषयाः सरलया गिरा अतिविस्तरेण निरूपिताः सन्ति । शास्त्रिप्रथमवर्षे धर्मशास्त्रविषयमवलम्ब्य पिपठिषूणां छात्राणां कृते मन्वर्थमुक्तावलीसहितायाः मनुस्मृतेः १–९ अध्यायान्तर्गताः जगदुत्पत्तिमारभ्य व्यवहारधर्मपर्यन्ता विषयाः समाविष्टाः सन्ति। पाठ्यांशोऽयं पञ्चभिः प्रकरणैः समन्वितः । तेषु प्रथमे **कप्रकरणे** प्रथमद्वितीयाध्यायान्तर्गता विषयाः, द्वितीये **खप्रकरणे** तृतीयचतुर्थाध्यायान्तर्गता विषयाः, तृतीये **गप्रकरणे** पञ्चम-षष्ठ-सप्तमाध्यायान्तर्गता विषया, चतुर्थे **घप्रकरणे** अष्टमाध्यायान्तर्गता विषयास्तथैव पञ्चमे **ङप्रकरणे** नवमाध्यायान्तर्गता विषया निर्धारिताः सन्ति।

**क**प्रकरणे जगदुत्पत्तिसम्बद्धा विविधा विषया विशेषेण समाविष्टाः सन्ति । तथैव महाप्रलयस्वरूपम्, जीवस्य देहान्तरग्रहणम्, मन्वन्तरादिकालप्रमाणम्, युगधर्माः, श्रुतिस्मृतिप्रमाणम्, धर्मशास्त्राध्ययनप्रयोजनम्, धर्मस्य वेदमूलत्वम्, वर्णधर्माः, संस्काराणां लक्षणम्, जातकर्मादितः उपनयनान्ताः संस्कारास्तथैव ब्रह्मचारिणो जीवनवृत्तिसम्बद्धा विविधा विषयाश्चात्र **क**प्रकरणे शिक्ष्यन्ते । द्वितीये **ख**प्रकरणे समावर्तनसंस्कारः, विवाहभेदास्तेषां स्वरूपम्, वरवध्वोर्गुणवैशिष्ट्यम्, गृहस्थानां जीवनचर्या, तेषां कर्त्तव्याकर्त्तव्यानि च पाठ्यविषयत्वेन सम्बद्धानि सन्ति । तथैव गृहस्थनिर्दिष्टानां जीविकानां लक्षणानि, स्नातकब्रह्मचारिणां नियमाश्च अस्मिन् प्रकरण एव पाठ्यविषयत्वेन समाविष्टाः सन्ति। तृतीये **ग**प्रकरणे विशेषतः भक्ष्याभक्ष्यसम्बद्धो विषयः, जननमरणाशौचम्, द्रव्यशुद्धिः, स्त्रीधर्मसम्बद्धा विषयाः, वानप्रस्थसंन्यासिनो जीवनधारणविधयश्च समाविष्टाः सन्ति। तथैवास्मिन् प्रकरण एव राजधर्मः, राज्यस्य सप्ताङ्गानि, षाड्गुण्यम्, सामादिचत्वारोपायाः, राज्ञः कर्त्तव्याकर्त्तव्यानि च पाठ्यविषयत्वेन समाविष्टानि सन्ति। चतुर्थे **घ**प्रकरणे व्यवहारस्वरूपम्, तद्भेदाः, व्यवहारपदानां नामानि, न्यायसम्पादनविधिः, लेख-भोग-साक्षिव्यवस्था, अपराधानां प्रकृतिः, दण्डविधिश्चेति विषयाः शिक्ष्यन्ते । पञ्चमे **ङ**प्रकरणे स्त्रीपुरुषधर्माः, सम्पत्तिविभाजनम्, ऋणादान-चौर्य-पारुष्यादिव्यवहारपदवाचकाः पृथक् पृथक् विषयाः पाठ्यविषयत्वेन समाविष्टाः सन्ति।

एवमस्मिन् पाठ्यांशे मनुस्मृतिग्रन्थस्य १-९ अध्यायान्ताः संस्कार-व्यवहारसम्बद्धाः सर्वे विषयाः प्रथमपत्रे समाविष्टाः सन्ति।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोलिखितविषयेषु प्रावीण्यमेष्यन्ति –

- जगदुत्पत्तेः संस्कारविधेश्च विवेचने।
- विवाह–श्राद्ध–स्नातकव्रतादिविषयाणां निरूपणे।
- भक्ष्याभक्ष्यादितः राजधर्मान्तविषयाणामुपस्थापने।
- साक्षिव्यवहारादिविषयाणां विश्लेषणे।
- दायविभागकण्टकशोधनादिविषयाणां व्याख्याने च।

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्य–विषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्कः | पाठघण्टाः |
|---|---|---|---|---|
| क | मनुस्मृतेः प्रथम–द्वितीयाध्यायान्तगर्तानां सृष्ट्यादीनां धर्मलक्षणादीनां च स्वरूपोपस्थापनम् । | मनुस्मृतेः प्रथम–द्वितीयाध्यायान्तर्गता निर्धारिता विषयाः। | १५ | २० |
| ख | मनुस्मृतेः तृतीय–चतुर्थाध्यायान्तर्गतानां विवाहादितः पितृकर्मान्त–विषयाणाम्, जीवन–वृत्यादितो ब्रह्मचिन्तनान्त–विषयाणां च प्रकाशनम् | मनुस्मृतेः तृतीय–चतुर्थाध्यायान्तर्गता निर्धारिता विषयाः। | २५ | ४४ |
| ग | मनुस्मृतेः पञ्चमााध्यायान्तर्गतानां भक्ष्याभक्ष्यादिविषयाणाम्, षष्ठाध्यायान्तर्गतानां वानप्रस्थ–परिव्राजकधर्माणाम्, सप्तमाध्यायान्तर्गतानां राजधर्माणां च स्वरूपमीमांसनम् | मनुस्मृतेः पञ्च–माध्यायतः सप्त–माध्यायापर्यन्ता निर्धारिता विषयाः | २५ | ४४ |
| **घ** | मनुस्मृतेः अष्टमाध्यायान्तर्गतानां व्यवहार–साक्षि–भुक्त्यादि–विषयाणामुपस्थापनम् | मनुस्मृतेः अष्ट–माध्यायान्तर्गता निर्धारिता विषयाः | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| ङ | मनुस्मृतेः नवमाध्या-यान्तर्गतानां स्त्रीपुंधर्मस्य, दायभागस्य, वैश्यशूद्रसम्बद्धधर्माणां च विशेषेणोपस्थापनम् | मनुस्मृतेः नवमाध्यायान्तर्गता निर्धारिता विषयाः | १५ | २० |

**४. पाठ्यवस्तुविवरणम्**

**'क' प्रकरणे**

मुनीनां धर्मजिज्ञासा, जगदुत्पत्तिः, महदादीनामुत्पत्तिः, सूक्ष्मस्थूलाद्युत्पत्तिः, वर्णोत्पत्तिः, स्त्रीपुरुषसृष्टिः, मन्वादीनामुत्पत्तिः, यक्षगन्धर्वमेघादिसृष्टिः, जरायुजाण्डजस्वेदजानाम् उत्पत्तिः, महाप्रलयस्वरूपम्, जीवस्योत्क्रमणं देहान्तरग्रहणञ्च, मन्वन्तरादिकालप्रमाणम्, युगधर्मः, ब्राह्मणादिकर्म, धर्मलक्षणम्, धर्मप्रमाणानि, आर्यावर्त-ब्रह्मावर्तादिलक्षणम्, यज्ञीयदेशाः, आचारमहिमा, धर्मशास्त्राध्ययनफलम्, श्रुतिस्मृत्योः परिचयः, श्रुतिस्मृत्योर्विरोधे बलाबलनिर्णयः, वर्णधर्मः, गर्भाधान-जातकर्मादिसंस्काराः, व्रात्यलक्षणम्, उपनीतानां धर्मविशेषाः, उपनीतानां वर्णानुसारिणः पृथक् पृथक् धर्माः, वेदाध्ययनादिविषयाः, अभिवादन-प्रत्यभिवादनादिविधयः, आचमनादिविषयः, ब्रह्मचारिणो नियमविशेषाः, गुरुकुलवासादि प्रथमद्वितीयाध्यायसम्बद्धाः सर्वे विषयाः ॥

**'ख' प्रकरणे**

गृहस्थाश्रमवासकालः, विवाहे वरकन्ययोर्गुण-वैशिष्ट्यम्, विवाहभेदः, विवाहविधिः, निन्द्यानिन्द्यविवाहाः, गर्भिण्यादीनां भोजनम्, पञ्चमहा-यज्ञसम्बद्धा विषयाः, श्राद्धकल्पः, पार्वणैकोद्दिष्टश्राद्धसम्बद्धा विविधा विषयाः,श्राद्धे ग्राह्याग्राह्यब्राह्मणादिनिर्णयः, रात्रौ श्राद्धविचारः, तर्पणपितृप्रशंसादयो विषयाः । तथैव आपद्यनापदि च जीवनवृत्तेरुपायाः, स्नातकव्रतानि, वेदोदितकर्मविधानम्, अग्निजलादौ विण्मुत्रादिप्रक्षेपणनिषेधः, अतिभोजना-ञ्जलिजलपानाक्षक्रीडादिनिषेधः, तामिस्राद्येकविंशतिनरकाः, प्रातःकृत्यादयः, अनध्यायाः, अमावस्यादौ स्त्रीगमननिषेधः, गुर्वादीनां छायालङ्घनादिनिषेधः, सदाचारदुराचारयोः फलम्, श्रुतिस्मृत्युनुकूलाचाराणां परिपालनम्, नास्तिक्यभाव-परताडनादिकर्मनिषेधः, कुलमार्गाश्रयणम्, बैडालव्रतिकविषयः, यमनियमस्वरूपम्, रजस्वला-गणिका-स्तेनाद्यन्न-निषेधः, दानफलम्, फलमूलादिग्रहणे नियमः, अनृतादिफलम्, धर्मप्रशंसा, असत्यकथनम्, ब्रह्मचिन्तनसम्बद्धाश्च तृतीय-चतुर्थाध्यायसम्बद्धा सर्वे विषयाः ।

**'ग' प्रकरणे**

मनुष्याणां मृत्युकारणम्, भक्ष्याभक्ष्यविचारः, वृथामांसभक्षणनिषेधः, भक्ष्याभक्ष्यमांसानां विवेकः, मांसवर्जनफलम्, जननमरणाशौचम्, आशौचसम्बद्धा विविधा नियमाः, शुद्धेः साधनानि, अर्थशौचस्य वैशिष्ट्यम्, आचमनविधिः, पातिव्रत्यफलम्, गृहस्थस्य कालावध्यादिविषयाः । एवमेव वानप्रस्थविषयका विविधा धर्माः, वानप्रस्थस्य

फलमूलादिभक्षणम्, मधुमांसादिवर्जनम्, वृक्षमूल-भूशय्यादयो धर्माः, परिव्राजकानां विविधा धर्माः, परिव्रजनकालः, ऋणमशोध्य संन्यासाश्रमग्रहणनिषेधः, परिव्राजकाचारः, इन्द्रियनिग्रहः, मोक्षमार्गाश्रयणा-दयो धर्माः । राजधर्माः, राज्ञः प्रजारक्षणविधानम्, राज्ञो महत्वम्, दण्डप्रणयनादिविधयः, मन्त्रि-पुरोहित-सेनापति-राजदूत-गुप्तचरादीनां नियुक्तिः, कामक्रोधादिदुर्गुणत्यागः, करग्रहणम्, उत्कोचग्राहकषु दण्डः, राजरक्षणम्, दस्युनिग्रहः, प्रजापालनादयः पञ्चम-षष्ठ-सप्तमाध्यायसम्बद्धाः सर्वे विषया ।

**'घ' प्रकरणे**

व्यवहारदर्शननियमाः, अष्टादशविवादविषयाणां निरूपणम्, न्यायसम्पादने धर्ममार्गाश्रयणम्, सभाप्रशंसा, सभ्यानां महत्त्वम्, सत्यादिना व्यवहारा-वलोकनम्, साक्षिस्वरूपम्, ग्राह्याग्राह्यसाक्षिणः, साक्षिप्रश्नविधिः, असत्य-कथने दोषाः, साक्षिद्वैधे निर्णयव्यवस्था, शपथग्रहणम्, प्रथममध्यमो-त्तमसाहसोक्ताः दण्डाः, अष्टादशव्यवहाराणां स्वरूपम्, कुलपुरोहित-मात्रादित्यागनिषेधः, कुलपुरोहितादिभिरन्यथाकरणे दण्डव्यवस्था, वैश्यशूद्रादीनां कर्त्तव्याणि, व्यवहारदर्शनफलञ्चेत्यादयः अष्टमाध्याय-सम्बद्धाः सर्वे विषयाः ।

**'ङ' प्रकरणे**

स्त्रीपुरुषसम्बद्धा धर्मा, नियोगस्य विधिनिषेधौ, प्रोषिभर्तृकानियमाः, स्वयंवरविधानम्, वाग्दानविषयः, वरकन्ययोर्विवाहकालः, दायविभाग-सम्बद्धा नियमाः, विभागकालः, समविषमविभागादिविषयाः, स्त्रीधन-ग्रहणादिनियमाः, औरसादिद्वादशपुत्राणां लक्षणं तद्विभागनियमाश्च, पुत्रदौहित्रयोर्वैशिष्ट्यम्, पुत्रशब्दार्थविवेकः, विभाज्याविभाज्यधनम्, मातृधनविभागनियमाः, विभागविसङ्गतौ निर्णयः, ब्राह्मणादीनां दण्डव्यवस्था, कण्टकशोधनम्, वैश्यशूद्रयोर्धर्मादिनवमाध्यायसम्बद्धाः सर्वे विषयाः: ।

## ५. शिक्षणविधयः शैक्षिकसामग्री च

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकन्द्रिता अन्ये विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः कवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । विषयप्रकत्यनुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकण विभागेन विद्यापीठेन वा विधेया । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्था अपि कार्या । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया ।

**६. मूल्याङ्कनविधिः**

मूल्याङ्कनं द्विधा विभक्तमस्ति – **आन्तरिकम्** (निर्माणात्मकम्), **बाह्यम्** ( निर्णयात्मकम्) च । आन्तरं मूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनादिकं विलोक्य सम्बद्धशिक्षकण विभागसमन्वितकार्ययोजनायाम् आन्तरं मूल्याङ्कनं विधीयते । गृहकार्यं कक्षापरीक्षा, परियोजनकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरमूल्याङ्कनस्य कृते प्रतिशतं पञ्चविंशत्यङ्काः निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानाम् आन्तरमूल्याङ्कनस्याङ्कानां ने.सं.वि.परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति ।

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माण–सारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसङ्ख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क, ख, ग, घ, ङ | विवेचनात्मकाः | ३ | २ | २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ४२ |
| | व्याख्यात्मकाः | ४ | ३ | २४ |
| | वस्तुगताः | १० | १० | १० |
| योगः | | २६ | २१ | १०० |

**७ पाठ्यसूची**

**क) पाठ्यग्रन्थः**

१.मनुः , ***मनुस्मृतिः*** (मन्वर्थमुक्तावलीसहिता), दिल्ली : मोतीलाल बनारसी दास पब्लिसस, सन् १९८३ ।

**ख)सहायकग्रन्थः**

१.अधिकारी, राधाकृष्ण (अनु.), ***धर्मशास्त्र*** (राधाकृष्णाश्रमी–टीकासहिता), काठमाडौं : पाठ्यक्रम विकाश केन्द्र, त्रि.वि., कीर्तिपुर ।

**ग)सन्दर्भग्रन्थः**

१.महर्षिः ***स्मृति–सन्दर्भः*** (दशस्मृत्यात्मकः), दिल्ली : नाग प्रकाशन, जवाहर नगर सन् १९८८

# विषयः धर्मशास्त्रम्

पाठ्यांशनाम – **वर्णाश्रमादिधर्मस्वरूपम्** पाठ्यांशसङ्केतः– ध.शा. ३०२
स्तरः– शास्त्री पूर्णाङ्काः– १००
खण्डः– प्रथमः वार्षिकःपाठ्यभारः–१६० घण्टाः
पत्रम्– द्वितीयम् साप्ताहिकः पाठ्यभारः– ६

## १. पाठ्यांशपरिचयः

धरति लोकान्, ध्रियते पुण्यात्मभिरिति विग्रहे धृधातोः औणादिकमन्प्रत्यये धर्मशब्दो निष्पद्यते । न्यायः स्वभावः आचारः ऋतु इत्यादयोऽ स्य पर्यायाः कोशादौ दृश्यन्ते । तत्र अलौकिकश्रेयःसाधनत्वेन च विहितक्रियात्वं विहितत्वं वा धर्मत्वमिति स्फुटं प्रतीयते । अथवा वर्णधर्म आश्रमधर्मो वर्णाश्रमधर्मो गुणधर्मो निमित्तधर्मः साधारणधर्मश्चेति षड्विधस्मार्तधर्मविषयो धर्म इति । एतद्गुणविशिष्टधर्मप्रतिपादकं शास्त्रमेव धर्मशास्त्रम् ।

आचारव्यवहारप्रायश्चित्तरूपस्तम्भत्रयविवेचनरहितधर्मों दुर्ज्ञेय इति विचार्य सर्वमानवप्राण्युद्दिधीर्षया स्मृतयः काले काले स्मृतिकारैः प्रणीताः । तत्र तासु स्मृतिषु मिथिलाभिजनेन महर्षिणा याज्ञवल्क्येन प्रणीता याज्ञवल्क्यस्मृतिः चिरं
प्रख्याता वर्तत एव । ग्रन्थेऽस्मिन् आचार–व्यवहार–प्रायश्चित्तभेदेन त्रयोऽध्यायाः विद्यन्ते । तत्र आचारः परमो धर्मः इति मनूक्तत्वात् विषयस्यास्य कृते शास्त्रिकक्षाया द्वितीयपत्रे याज्ञवल्क्यस्मृतेः समिताक्षराचाराध्यायः मनुस्मृतेरध्यायत्रयञ्च निर्धारितानि सन्ति । तत्र आचाराध्याये चोपोद्घातप्रकरणसहित–ब्रह्मचारि–विवाह–वर्णजातिविवेक–गृहस्थ–स्नातक भक्ष्याभक्ष्य–द्रव्यशुद्धि–दान–श्राद्ध–गणपतिकल्प–ग्रहशान्ति–राजधर्मप्रकरणञ्चेति त्रयोदश प्रकरणानि विद्यन्ते ।

मनुस्मृतेश्च तत्र दशमाध्यायतो द्वादशाध्यायपर्यन्तं अध्यायत्रयं पाठ्यांशेऽस्मिन् निर्धारितं वर्तते । तत्र वर्णधर्मादिनिरूपणप्रसङ्के त्रैवर्णिकस्य प्रधानो धर्मः अध्ययनम्, ब्राह्मणादित्रयो वर्णा द्विजातयः, महापातकोपपातकादीनां परिचयः प्रायश्चित्तव्यवस्था, कायिकवाचिकमानसिक–त्रिविधगतिप्रकाराः, वेदज्ञप्रशंसा, आत्मस्वरूपज्ञानपूर्वकमोक्ष - प्राप्त्युपायादिविषया निर्धारिताः सन्ति ।

## २. पाठ्यांशस्य सामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोलिखितविषयेषु प्रावीण्यमेष्यन्ति–

- विद्यानां धर्मस्य च चतुर्दशस्थानानि विज्ञाय पर्षद्माध्यमेन धर्मनिर्णये ।
- सवर्णाश्रमधर्मं गृहस्थाश्रमे पालनीयानां धर्माणां व्याख्याने ।
- स्वर्णरजतयज्ञादिपात्राणां शुद्धिप्रकाशने, गोदानश्राद्धविषयप्रकटने च ।
- गणपतिग्रहयज्ञनिरूपणपूर्वकं राज्यव्यवस्थादिविश्लेषणे

- मानवजातीनां स्ववृत्तिज्ञानपूर्वकं महापातोपपातकप्रायश्चित्तादि विषयाणां विश्लेषणे, वेदस्य तपसश्च समस्यानां व्याख्याने।

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्याः |
|---|---|---|---|---|
| क | वर्णधर्मनिदर्शनम् | उपोद्घातप्रकरणाद् वर्णजातिविवेकप्रकरणान्ता निर्धारिता विषयाः | २० | ३२ |
| ख | आश्रमधर्माणां भक्ष्याभक्ष्यपदार्थानाञ्च विवेचनम् | गृहस्थधर्मप्रकरणाद् भक्ष्याभक्ष्यप्रकरणान्ता निर्धारिता विषयाः | २० | ३२ |
| ग | ाविविधपात्रशुद्धिविषयज्ञान-निदर्शनपूर्वकं श्राद्धानां श्राद्धसम्बन्धिकृत्यानाञ्च समस्यासमाधाननिर्णय-सम्पादनम् | द्रव्यशुद्धिप्रकरणाच्छ्राद्धप्रकरणान्ता विषयाः | २० | ३२ |
| घ | सगणपतिग्रहयज्ञसम्बन्धी-निर्णयसम्पादनम्, स्मृतिकालिकराज्यव्यवस्थायाः प्रभावविश्लेषणक्षमता प्रदर्शनम्। | गणपतिकल्पप्रकरणादाचाराध्याय-समाप्त्यन्ता विषयाः | २० | ३२ |
| ङ | वर्णानां कर्तव्याकर्तव्यविश्लेषणम्, महापातकोपपातकादिप्रायश्चित्त-विधिकथनम्, वेदस्यात्मतत्त्वस्य च व्याख्यानसमार्थ्योत्पादनम् | वर्णधर्मादिनिरूपणान्ता विषयाः। | २० | ३२ |

## ४. पाठ्यवस्तुविवरणम्

### ‘क प्रकरणे

मुनीनां प्रश्नः, योगीश्वरस्योत्तरम्, विद्यानां धर्मस्य च चतुर्दशस्थानानि, धर्मशास्त्रप्रयोजकाः, धर्मलक्षणम्, पर्षत्स्वरूपम्, ब्राह्मणादिवर्णाः, वर्णानां संस्कारकालाः,

गुरोर्धर्मः, शौचाचाराः, प्राजापत्यादितीर्थानि, आचमनप्रकारः, सूर्योपस्थापनम्, प्राणयामविचारः, सावित्रीजपप्रकारः, अध्याप्याः, दण्डादिधारणम्, भैक्ष्यचर्याविचारः, भोजनप्रकारः, मधुमांसादिनिषेधः गुर्वादिलक्षणम्, वेदग्रहणार्थं ब्रह्मचर्यविधिः, उपनयनकालस्य परमावधिः, वर्णत्रयस्य द्विजत्वनिरूपणम्, वेदाध्ययनफलम्, काम्यव्रतादि, विवाहार्थं स्नानम्, स्नानान्तरकर्तव्यम्, प्रशस्ता कन्या, प्रशस्तो वरः, अष्टौ विवाहाः, कन्यादातृक्रमः, कन्याहरणे दण्डः, भार्यान्तरकालः, स्त्रीधर्माः, शास्त्रीयदारसंग्रहफलम्, ऋतुकालादि, वर्णजातिविवेकः

**'ख' प्रकरणे**

**काम्यककर्माणि**— गृहस्थस्य विवाहाग्नौ स्मार्तकर्म, आहवनीयाग्नौ स्मार्तकर्मविचारः, गृहस्थधर्माः, पञ्च महायज्ञाः, स्नातकानां प्रतिसंवत्सरमर्घ्यत्वम्, ब्राह्मणादिवर्णानां कर्माणि, साधारणधर्माश्च । **श्रौतकर्माणि**—नित्यानि नैमित्तिकानि । कुशूलधान्यादिसञ्चयोपायाः, स्नातकधर्मा, अध्ययनधर्माः, उत्सर्जनकालः, अनध्यायाः स्नातकव्रतानि, अनर्चितमांसभक्षणशुष्कपर्युषितभोजनादिकस्य वर्जनीयता, पलाण्डुविड्वराहादिभोजननिषेधः, भक्ष्यमत्स्याः, मांसभक्षणे दोषाभावः, मांसभक्षणनिन्दा, मांसवर्जनफलम् ।

**'ग' प्रकरणे**

सौवर्णराजतादीनां पात्राणां शुद्धिः, यज्ञपात्रादीनां शुद्धिः, निर्लेपानां सलेपानाञ्च पात्राणां शुद्धिः, भूशुद्धेरुपायाः, त्रपुसीसकताम्रकांस्यलोहानां शुद्धिः,, महीगतजलादीनां शुद्धिः, ब्राह्मणप्रशंसा ,सत्पात्रब्राह्मणः, सत्पात्रे गवां दानमत्युत्तमम्, गोदानफलम्,उभयतोमुखीदानफलम्, गोदानसमाप्तिः, श्राद्धस्वरूपम्, श्राद्धकालाः, श्राद्धे प्रशस्ता ब्राह्मणाः, श्राद्धे वर्ज्या ब्राह्मणाः, ब्राह्मणनिमन्त्रणविधिः, अन्नदानम्, विकरदानम्, पिण्डदानञ्च, अक्षय्योदकदानम्, ब्राह्मणप्रार्थना, वृद्धिश्राद्धम्, एकोदिष्टश्राद्धम् सपिण्डीकरणश्राद्धञ्च, भोज्यविशेषेण फलविशेषः, तिथिनक्षत्रविशेषेण फलविशेषः, श्राद्धदेवताश्च ।

**'घ' प्रकरणे**

गणपतिकल्पान्तर्गता विषयाः, ग्रहयज्ञस्य महत्त्वम् , नवग्रहाः, ग्रहाणां प्रतिमाः, ग्रहपूजाविधिः, ग्रहाणां मन्त्राः, समिधः, ग्रहाणां भोजनानि, ग्रहाणां दक्षिणा, पुरोहितलक्षणम्, श्रौतस्मार्तयज्ञानुष्ठानम्, विप्रेभ्यो द्रव्यादिदानम्, लेख्यनिर्माणम्, स्मृतिकालिक -राज्यव्यवस्था च ।

**'ङ' प्रकरणे**

त्रैवर्णिकस्य प्रधानो धर्माध्ययनम्, ब्राह्मणादयस्त्रयो वर्णा द्विजातयः, वर्णानां ब्राह्मणः प्रभुः, पितृजातिसदृशा वर्णाः, वर्णसङ्करा व्रात्याः, जातादिसङ्कीर्णा, वर्णसङ्कराणां कर्माणि, साधारणधर्माः, षट्कर्माणि, क्षत्रियवैश्यकर्माणि, ब्राह्मणस्य आपदि कर्तव्यम्, वैश्यशूद्रयोरापदि धर्मः, सप्त वित्तागमाः, दश जीवनहेतवः, पञ्च महापातकानि, पञ्च

महापातकसमानि कर्माणि, उपपातकानि, जातिभ्रंशादिपातकानि, महापातकानामुपपातकानाञ्च प्रायश्चित्तम्, रहस्यप्रायश्चित्तम्, शुभाशुभकर्मणां फलम्, मानसादिकर्माणि, त्रिदण्डिपरिचयः, क्षेत्रज्ञादीनांपरिचयः, त्रिविधगुणकथनम्, त्रिविधगतिप्रकाराः, वेदोपवेदकर्मणां श्रेष्ठत्वम्, वेदप्रशंसा, वेदज्ञप्रशंसादि, आत्मस्वरूपम्, वेदपाठफलञ्च ।

**५. शिक्षणविधयः शैक्षिकसामग्री च**

अस्य पाठ्यांशस्य शिक्षणे प्रश्नोत्तरप्रवचनविमर्शप्रदर्शनादयः शिक्षणपद्धतयो–ऽवलम्ब्यन्ते । यथासम्भवं शिक्षकैस्तद्भिन्ना अन्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकन्द्रिता अन्ये विधयोऽपि प्रयोक्तुं शक्यन्ते । अत्र कतिपयसमतामूलकस्थलेषु स्मृत्यन्तरप्रतिपादितसम्बद्धविषयैः सह तुलनात्मकविधेरपि प्रयोगो भवितुं शक्नोति । शिक्षणक्रमे यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः समुद्बोधनीयाः । साम्प्रतं दूरशिक्षणमपि प्रचलति । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन विभागेन च सम्भूय व्यवस्था विधेया ।

**६. मूल्याङ्कनविधिः**

**क) आन्तरिकम् (निर्माणात्मकम्)**

आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । अस्य पाठ्यक्रमस्य भूमिकायामुल्लिखित– निर्देशानुसारेण कक्षायां पठनपाठनोपस्थित्यादिकं निरीक्ष्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायां आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यं कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशदङ्का निर्धारिताः ।

**ख) बाह्यपरीक्षा (निर्णयात्मकम्)—**

बाह्यमूल्याङ्कनन्तु वर्षान्ते भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नें सं.वि. परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराः निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिध्यति ।

**वार्षिक– परीक्षा–प्रश्नपत्र–निर्माण–सारिणी**

| प्रकरणानि क,ख,ग,घ,ङ | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २४ |

| | | | | |
|---|---|---|---|---|
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ५४ |
| | व्याख्यात्मकाः | ४ | ३ | २४ |
| | वस्तुगताः | १० | १० | १० |
| | | २६ | २१ | १०० |

## ७. पाठ्यसूची

### क.पाठ्यग्रन्थौ

१.याज्ञवल्क्य ***याज्ञवल्क्यस्मृति,*** विज्ञानेश्वर मिताक्षरा टीका, निर्णयसागर बम्बै, ई.सं १९४९, निर्णयसागर, प्रेस बम्बै ।

**वा**

याज्ञवल्क्यः, **याज्ञवल्क्यस्मृतिः** (आचाराध्यायः) विज्ञानेश्वर मिताक्षरा टीका, वि.सं. २०७६, नेपाली अनुवाद सहित लीलावती व्याख्याकः डा. वासुदेव खनाल, रत्न पुस्तक भण्डार, काठमाडौँ, नेपाल ।

२.मनु ***मनुस्मृतिः,*** कुल्लुकभट्टः मन्वर्थमुक्तावलीटीका, द्वितीय संस्करण, मोतीलाल वाराणसीदास, दिल्ली, ई.सं. १९९० ।

### ख.सहायक ग्रन्थ

१.सं.पण्डित नीरचन्द ***अष्टादशस्मृतिः*** (कात्यायन स्मृतिः पाराशरस्मृतिः) ई.सं. १९९०, नाग प्रकाश, डिल्ली ।

२. नारदः, वासुदेव (डा.) स्मृतिवाङ्मय (धर्मशास्त्र) वि.सं.२०७६, विद्यार्थी पुस्तक भण्डार, भोटाहिटी, काठमाडौँ ।

३. श्रीधराचार्यः, स्मृत्यर्थसारः, सन् १९१२, आन्दाश्रममुद्रणालय, पूना ।

# विषयः प्राचीनन्यायवैशेषिकम्

पाठ्यांशनाम – **न्यायवैशेषिकाभिमतपदपदार्थाः**
स्तरः– शास्त्री
खण्डः– प्रथमः
पत्रम्– प्रथमम्

पाठ्यांशसङ्केतः– प्रा.न्या. ३०१
पूर्णाङ्काः– १००
वार्षिकःपाठ्यभारः–१६० घण्टाः
साप्ताहिकः पाठ्यभारः– ६

**१. पाठ्यांशपरिचयः**

पाठ्यांशोऽयम् उत्तरमध्यमां कक्षाम्, द्वादशीं कक्षां नेपालसंस्कृतविश्वविद्यालयीयां प्राक्शास्त्रिकक्षां वा समुत्तीर्य शास्त्रीकक्षां प्रविश्य प्राचीनन्यायविषयमध्येतुकामानां छात्राणांकृते शास्त्रिप्रथमवर्षस्य प्रथमपत्रत्वेन निर्धारितो वर्तते । अयं पाठ्यांशः परिचयात्मको विश्लेषणात्मकश्च वर्तते। प्राचीनन्यायवैशेषिकमध्येतुकामानामपि छात्राणां न्यायदर्शने प्रयुक्ताया भाषाशैल्यास्तत्परिष्कारप्रणाल्याश्च सामान्यतो बोधो भवत्विति धिया न्यायवैशेषिकशास्त्रयोर्बहुधा प्रयुज्यमानाः कतिचन पारिभाषिकशब्दा विशेषतो केशवमिश्रप्रणीते तर्कभाषानामक( ग्रन्थे प्रयुक्ताः तादृशशब्दाः पाठ्यांशस्यास्य कप्रकरणे सन्निविष्टाः सन्ति । षड्विधास्तिकदर्शनेषु न्यायवैशेषिकदर्शनयोः प्रमाणप्रमेयनिरूपणे मतसाम्यादुभयोर्दर्शनयोः प्रथितेऽपि समानतन्त्रत्वे कतिपयसिद्धान्तनिर्धारणे उभयोर्दर्शनयोर्मतवैषम्यस्यापि बहुत्र दृग्गोचरीभूतत्वाद् न्यायवैशेषिकदर्शनमधीयानानां छात्राणां दर्शनयोरनयोर्मतसाम्यवैषम्यबोधायोभाभ्यां दर्शनाभ्यां स्वीकृतानां पदार्थानामवबोधस्यापरिहार्यत्वान्न्याय–दर्शनस्वीकृतानां प्रमाणप्रमेयादीनां षोडशपदार्थानां वैशेषिकदर्शनस्वीकृतानां द्रव्यगुणादीनां सप्तपदार्थानाञ्च ज्ञानाय केशवमिश्रप्रणीते तर्कभाषाग्रन्थे प्रतिपादिता विषयाः पाठ्यांशस्य **ख–ग–घ–ङप्रकरणेषु** यथाक्रमं विभज्य निर्धारिताः सन्ति । तस्मिन् क्रमे **खप्रकरणे** न्यायदर्शनाभिमताः षोडशपदार्थाः, प्रमाणसामान्यस्वरूपम्, सभेदं सोदाहरणञ्च कारण्, प्रत्यक्षप्रमालक्षणञ्चैतावन्तो विषयाः सन्निविष्टाः वर्तन्ते । **गप्रकरणे** सभेदमनुमानप्रमाणम्, सभेदाः हेत्वाभासाः, उपमानप्रमाणम्, कारणसहितशाब्दबोधप्रक्रिया चेति विषयाः समाविष्टाः वर्तन्ते । **घप्रकरणे** न्यायदर्शनप्रतिपादितानि अर्थान्तप्रमेयाणि, वैशेषिकदर्शनप्रतिपादिताः सप्तपदार्थाश्च समाविष्टा वर्तन्ते । **ङप्रकरणे** बुद्ध्याद्यपवर्गान्तप्रमेयस्वरूपम्, संशयादयश्चतुर्दशपदार्थाश्चेति विषया यथायथं निर्धारिताः सन्ति । पाठ्यांशेऽस्मिन् सामान्यविशिष्टोद्देश्यप्रकरणविभागशिक्षणविधिमूल्याङ्कनविधि–प्रश्नपत्र–निर्माणप्रक्रियापाठ्यग्रन्थसन्दर्भग्रन्थाश्चेति पाठ्यक्रमस्य बीजत्वेनाभिमतानि तत्त्वानि समाविष्टानि सन्तीति।

**२. पाठ्यांशस्य सामान्योद्देश्यानि**

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधो निर्दिष्टविषयेषु सामान्यतः समर्था भविष्यन्ति

- न्यायवैशेषिकशास्त्रयोः सङ्क्षिप्तेतिहासवर्णने, अथ चैतच्छास्त्रयोर्बहुधा प्रयुज्यमानानां निर्दिष्टपारिभाषिकपदानामवबोधपूर्वकं तेषासोदाहरण-प्रयोगे,
- न्यायदर्शनाभिमतषोडशपदार्थविवेचने,
- न्यायदर्शनाभिमतप्रमाणानामौचित्यप्रदर्शने,
- वैशेषिकदर्शनप्रतिपाद्यसप्तपदार्थनिर्वचने,
- न्यायवैशेषिकदर्शनाभिमतपदार्थानां सामान्यतः साम्यवैषम्यवर्णने च।

### ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| क | न्यायवैशेषिकशास्त्रयोः सङ्क्षिप्तेतिहासवर्णन-पूर्वकं पाठ्यग्रन्थान्तर्गत-निर्दिष्टप्रकरणेषु प्रयुक्तानां पारिभाषिक-पदानां वर्णने प्रयोगे च सामर्थ्यसम्पादनम्। | न्यायवैशेषिकशास्त्रयोः प्रथिताः पारिभाषिकशब्दाः (विशेषतो तर्कभाषायां प्रयुक्ता तादृशाः शब्दाः)। | १० | १६ |
| ख | उद्देशलक्षणपरीक्षावबोध-पूर्वकं न्यायाभिमत-पदार्थानामुद्देशे प्रमाणेन सह प्रमासामान्य-लक्षणनिरूपणे च सामर्थ्यसम्पादनम्, करणसहितकारणलक्षण-निरूपणे सामर्थ्यसम्पादनम्, प्रत्यक्षप्रमानिरूपणे नैपुण्य—सम्पादनञ्च। | तर्कभाषाग्रन्थस्यारम्भतः प्रत्यक्षप्रमानिरूपणान्तप्रकरण—प्रतिपाद्या विषयाः। | २० | ३२ |
| ग | सभेदानुमानस्वरूपप्रतिपादने सामर्थ्यसम्पादनम्, सभेदहेत्वाभासस्वरूपविवेचने दक्षत्वार्जनम्, उपमानप्रमाणस्वरूपवर्णने दक्षत्वसम्पादनम्, | तर्कभाषाग्रन्थस्यानुमाननिरूपणादारभ्य प्रमायाः परतस्त्वव्यवस्थापनान्तप्रकरण—प्रतिपाद्या विषयाः। | ३० | ४८ |

| | | | | |
|---|---|---|---|---|
| | सकारणशाब्दबोधस्वरूप निरूपणे सामर्थ्यसम्पादनम्, अर्थापत्त्यादीनां प्रमाणान्तरत्वखण्डनपुरस्सरं प्रामाण्यस्य परतस्त्वसाधने सामर्थ्यसम्पादनञ्च | | | |
| घ | अर्थान्तप्रमेयाणां स्वरूपकथने सामार्थ्यसम्पादनम्, वैशेषिकदर्शनाभिमतसप्तपदार्थानां स्वरूपनिर्धारणे नैपुण्यसम्पादनञ्च । | न्यायाभिमता अर्थान्ताः प्रमेयाः, वैशेषिकदर्शनाभिमतसप्तपदार्थाश्च । | २० | ३२ |
| ङ | बुद्ध्याद्यपवर्गान्त–प्रमेयस्वरूपविवेचने सामर्थ्यसम्पादनम्, संशयादिच–तुर्दशपदार्थवर्णने नैपुण्यार्जनञ्च । | बुद्ध्यन्ताः प्रमेयपदार्थाः, संशयाद- यश्चतुर्दशपदार्थाश्च । | २० | ३२ |

## ४. पाठ्यवस्तुविवरणम्

### 'क' प्रकरणे

उद्देशः, लक्षणम्, परीक्षा, प्रमाणम्, प्रमा, प्रामाण्यम्, करणम्, कारणम्, अयुतसिद्धिः, अन्यथासिद्धिः, अन्वयः, व्यतिरेकः, अन्वयव्याप्तिः, व्यतिरेकव्याप्तिः, अन्वयव्यभिचारः, व्यतिरेकव्यभिचारः, अयुतसिद्धिः, निर्विकल्पकम्, सविकल्पकम्, सहचारदर्शनम्, व्याप्तिज्ञानम्, पक्षधर्मताज्ञानम्, परामर्शः, लिङ्गम्, प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनम्, केवलान्वय्यनुमानम्, केवलव्यतिरेक्यनुमानम्, अन्वयव्यतिरेक्यनुमानम्, पक्षः, सपक्षः, विपक्षः, हेत्वाभासः, उपाधिः, व्याप्यत्वम्, व्यापकत्वम्, परिशेषः, अपेक्षाबुद्धिः, प्रतियोगिता, अनुयोगिता, विसंवादी, अविसंवादी ।

### 'ख' प्रकरणे

मङ्गलाचरणम्, न्यायदर्शनाभिमतषोडशपदार्थोद्देशः, प्रमाणसामान्य–लक्षणम्, सपदकृत्यं प्रमासामान्यलक्षणम्, करणलक्षणम्, कारणलक्षणम्, कारणभेदाः, अयुतसिद्धयः, सम्बन्धस्वरूपम्, मतान्तराभिमतप्रमालक्षणं तत्खण्डनञ्च, प्रमाणचतुष्टयोद्देशः,

प्रत्यक्षप्रमाणलक्षणम्, प्रत्यक्षप्रमालक्षणम्, प्रत्यक्षप्रमाविभजनम्, प्रत्यक्षप्रमाजनकसन्निकर्षाः ।

**'ग' प्रकरणे**

परामर्शस्यानुमानत्वम्, द्विविधमनुमानम्, त्रिविधहेतुप्रदर्शनम्, अन्वयव्यतिरेकिणः पञ्चरूपोपपन्नस्यैव गमकत्वविचारः, केवलान्वयिकेवलव्यतिरेकिणोस्तु चतूरूपोपपन्नयोरपि गमकत्वसाधनम्, भेदोपभेदसहितहेत्वाभासाः, प्रमाणान्तरत्वव्यवस्थापनेन सहोपमानप्रमाणम्, शब्दप्रमाणम्, वाक्यलक्षणम्, आकाङ्क्षादीनां ज्ञानानां शाब्दबोधहेतुत्वव्यवस्थापनम्, आकाङ्क्षायाः पदनिष्ठत्वनिर्धारणम्, वैदिकावैदिकभेदेन द्विविधं शब्दप्रमाणम्, अर्थापत्तेः प्रमाणान्तरत्वखण्डनम्, अभावस्य पृथक्प्रमाणत्वखण्डनम्, प्रमात्वस्य स्वतो ग्राह्यत्ववादिनां मतोपस्थापनं तन्मतेऽरुचिप्रदर्शनपूर्वकं परतस्त्वव्यवस्थापनञ्च ।

**'घ' प्रकरणे**

द्वादशविधप्रमेयोद्देशः, आत्मा, आत्मनो द्वैविध्यम्, आत्मप्रत्यक्षविचारः, शरीरलक्षणम्, शरीरभेदाः, इन्द्रियलक्षणम्, इन्द्रियभेदाः, इन्द्रियाणा-मतीन्द्रियत्वम्, अर्थाः, अर्थान्तर्गततया वैशेषिकदर्शनाभिमतषट्पदार्थाः, प्रमाणादीनां पृथक्तया निरूपणप्रयोजनम्, द्रव्यसामान्यलक्षणम्, द्रव्याणि, प्रत्येकद्रव्यलक्षणम्, प्रत्येकद्रव्यवृत्तयो गुणाः, कार्यद्रव्याणामुत्पत्तिविनाशौ, परमाणुसाधनप्रकारः, वाय्वाकाशकालदिशामनुमानसाध्यत्वम्, मनसो-ऽणुत्वम्, गुणः, कर्म, सामान्यम्, विशेषः, समवायः, अभावश्च ।

**'ङ' प्रकरणे**

बुद्धेर्लक्षणम्, बुद्धिभेदाः, यथार्थानुभवस्य चातुर्विध्यम्, यथार्था-यथार्थानुभवलक्षणे, मनः प्रवृत्तिदोषप्रेत्यभावफलदुःखानां स्वरूपाणि, अपवर्गः, संशयलक्षणम्, प्रयोजनम्, दृष्टान्तः, सिद्धान्तः तद्भेदाश्च, पञ्चावयवाः, तर्कः, तस्यानुमानग्राहकत्वसाधनम्, निर्णयः, वादः, सभेदं हेत्वाभासस्वरूपम्, जल्पः, वितण्डा, छलम्, जातिः, निग्रहस्थानञ्च ।

## ५. शिक्षणविधयः शैक्षिकसामग्री च

अस्य पाठ्यांशस्य शिक्षणे प्रश्नोत्तरप्रवचनविमर्शप्रदर्शनादयः शिक्षणपद्धतयोऽवलम्ब्यन्ते । यथासम्भवं शिक्षकैस्तद्भिन्ना अन्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकेन्द्रिता विधयोऽपि प्रयोक्तुं शक्यन्ते । अत्र कतिपय-समतामूलकस्थलेषु स्मृत्यन्तरप्रतिपादितसम्बद्धविषयैः सह तुलनात्मकविधेरपि प्रयोगो भवितुं शक्नोति । शिक्षणक्रमे यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः समुद्बोधनीयाः । साम्प्रतं दूरशिक्षणमपि प्रचलति । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन विभागेन च सम्भूय व्यवस्था विधेया ।

## ६. मूल्याङ्कनविधिः

आन्तरिक (निर्माणात्मक) बाह्य (निर्णयात्मक) भेदेन मूल्याङ्कनं द्विधा विभज्यते । आन्तरिकमूल्याङ्कनं मूलतः कक्षागतमेव भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकण विभागसमन्वित-कार्ययोजनायामान्तरिकमूल्याङ्कनं विधेयम् । गृहकार्यकक्षापरीक्षापरियोजना-कार्यादीन्यपि तन्मूल्याङ्कनस्याधारभूतानि भवितुमर्हन्ति । आन्तरिक-मूल्याङ्कनस्य कृते विंशतिप्रतिशदङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः कृते पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्वविद्यालयपरीक्षा-नियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु यथापरिस्थिति सा परीक्षापि अन्तर्वार्तादिनापि सम्पादयितुं शक्यते । वार्षिकपरीक्षायाः कृते सति सम्भवे विवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगतानाञ्च प्रश्नानां कृते प्रकरणनिदर्शनं विधाय प्रश्ननिर्माणसारिणी परिकल्पनीया । तदर्थमधोनिर्दिष्टप्रकारेण प्रश्नपत्रनिर्माणं विधेयम् –

**वार्षिकपरीक्षाप्रश्नपत्रनिर्माणसारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | अङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| ख,ग,घ,ङ | विवेचनात्मकाः | ३ | २ | १२ | २४ |
| क,ख,ग,घ,ङ | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ | ४२ |
| ख,ग,घ,ङ | व्याख्यात्मकाः | ४ | ३ | ८ | २४ |
| क,ख,ग,घ,ङ | वस्तुगताः ( बहुवैकल्पिकाः) | १० | १० | १ | १० |
| | योगः | २६ | २१ | | १०० |

## ७. पाठ्यसामग्रीसूची

(क) **पाठ्यग्रन्थः** –

१. कर्शवमिश्रः, **तर्कभाषा** बदरीनाथशुक्लकृतहिन्दीव्याख्यासहिता, षष्ठं संस्करणम्, मोतिलाल बनारसीदास वाराणसी, सन् २०१४ ।

**(ख) सन्दर्भग्रन्थाः –**

१. अन्नम्भट्टः, **तर्कसङ्ग्रहः,** दीपिकाकिरणावलीन्यायबोधिनीपद-कृत्यटिप्पण्यादिसहितः, चौखम्भा विद्याभवन वाराणसी, सन् २००३ ।

२. केशवशरण अर्याल, **न्यायसूत्र र वैशेषिकसूत्रको तुलनात्मक पर्यालोचन**, नेपाल प्रज्ञा–प्रतिष्ठान कमलादी, काठमाडौँ, वि.सं.२०७५ ।
३. जगदीशभट्टाचार्यः, **तर्कामृतम्,** नेपालीभाषानुवादविशेषटिप्पणीसहितम् (अनुवादकः टिप्पणीकर्ता च जगत्प्रसाद उपाध्याय), विष्णुप्रभा उपाध्याय, काठमाडौँ, वि.सं. २०६७ ।
४. पद्मप्रसाद भट्टराई,, **पौरस्त्य दर्शन : एक चिनारी,** विद्यार्थी पुस्तक भण्डार, भोटाहिटी, काठमाडौँ, वि. सं. २०७४।
५. विश्वनाथपञ्चाननभट्टाचार्यः, **न्यायसिद्धान्तमुक्तावली**, किरणावली–व्याख्या–सहिता,पञ्चमं संस्करणम्, चौखम्भा संस्कृत संस्थान वाराणसी, वि.सं.२०५२ ।

# विषय : ऐच्छिकनव्यन्यायः

पाठ्यांशनाम–**न्यायवैशेषिकाभिमतपदपदार्थाध्ययनम्**

स्तरः – शास्त्री
वर्षः – प्रथमः
पत्रम्– प्रथमम्

पाठ्यांशसङ्केतः–न.न्या. ३०१
पूर्णाङ्काः – १००
वार्षिकःपाठ्यभारः - १६०
साप्ताहिकःपाठ्यभारः – ६

**१. पाठ्यांशपरिचयः–**

पाठ्यांशोऽयम् उत्तरमध्यमां कक्षाम्, द्वादशीं कक्षां नेपालसंस्कृतविश्वविद्यालयीयांप्राक्शास्त्रिकक्षां वा समुत्तीर्य शास्त्रीकक्षां प्रविश्य प्राचीनन्यायविषयमध्येतुकामानां छात्राणांकृते शास्त्रिप्रथमवर्षस्य प्रथमपत्रत्वेन निर्धारितो वर्तते । अयं पाठ्यांशः परिचयात्मको विश्लेषणात्मकश्च वर्तते । प्राचीनन्यायवैशेषिकमध्येतुकामानामपि छात्राणां न्यायदर्शने प्रयुक्ताया भाषाशैल्यास्तत्परिष्कारप्रणाल्याश्च सामान्यतो बोधो भवत्विति धिया न्यायवैशेषिकशास्त्रयोर्बहुधा प्रयुज्यमानाः कतिपयपारिभाषिकशब्दाविशेषतो केशवमिश्रप्रणीते तर्कभाषानामके ग्रन्थे प्रयुक्ताः तादृशशब्दाः पाठ्यांशस्यास्य कप्रकरणे सन्निविष्टाः सन्ति । षड्विधास्तिकदर्शनेषु न्यायवैशेषिकदर्शनयोः प्रमाणप्रमेयनिरूपणे मतसाम्यादुभयोर्दशनयोः प्रथितेऽपि समानतन्त्रत्वे कतिपयसिद्धान्तनिर्धारणे उभयोर्दशनयोर्मतवैषम्यस्यापि बहुत्र दृग्गोचरीभूतत्वाद् न्यायवैशेषिदर्शनमधीयानानां छात्राणां दर्शनयोरनयोर्मतसाम्यवैषम्य–बोधायोभाभ्यां दर्शनाभ्यां स्वीकृतानां पदार्थानामवबोधस्यापरिहार्य–त्वान्न्यायदर्शनस्वीकृतानां प्रमाणप्रमेयादीनां षोडशपदार्थानां वैशेषिकदर्शन–स्वीकृतानां द्रव्यगुणादीनां सप्तपदार्थानाञ्चज्ञानाय केशवमिश्रप्रणीते तर्कभाषाग्रन्थे प्रतिपादिता विषयाःपाठ्यांशस्यख–**ग–घ–ङप्रकरणेषु** यथाक्रमं विभज्य निर्धारिताः सन्ति । तस्मिन् क्रमे **खप्रकरणे** न्यायदर्शनाभिमताः षोडशपदार्थाः, प्रमाणसामान्यस्वरूपम्, सभेदं सोदाहरणञ्च कारण्, प्रत्यक्षप्रमालक्षणञ्चैतावन्तो विषयाः सन्निविष्टाः वर्तन्ते । **गप्रकरणे** सभेदमनुमानप्रमाणम्, सभेदाः हेत्वाभासाः, उपमानप्रमाणम्, कारणसहितशाब्दबोधप्रक्रियाचेति विषयाः समाविष्टाः वर्तन्ते । **घप्रकरणे** न्यायदर्शनप्रतिपादितानिअर्थान्तप्रमेयाणि, वैशेषिकदर्शनप्रतिपादिताः सप्तपदार्थाश्च समाविष्टा वर्तन्ते । **ङप्रकरणे** बुद्ध्याद्यपवर्गान्तप्रमेयस्वरूपम्, संशयादयश्–चतुर्दशपदार्थाश्चेति विषया यथायथं निर्धारिताः सन्ति । तदनु सामान्य–विशिष्टोद्देश्यप्रकरणविभागशिक्षणविधिमूल्याङ्कनविधिप्रश्नपत्रनिर्माण–प्रक्रिया–पाठ्यग्रन्थसन्दर्भग्रन्थाश्चेति पाठ्यक्रमस्य बीजत्वेनाभिमतानि तत्वानि समाविष्टानि सन्तीति ।

**२. पाठ्यांशस्य सामान्योद्देश्यानि**

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधो निर्दिष्टविषयेषुसामान्यतो व्युत्पन्ना भविष्यन्ति

- न्यायवैशेषिकशास्त्रयोः सङ्क्षिप्तेतिहासवर्णने, अथ चैतच्छास्त्रयोर्बहुधा प्रयुज्यमानानां निर्दिष्टपारिभाषिकपदानामवबोधपूर्वकं तेषां सोदाहरणप्रयोगे,
- न्यायदर्शनाभिमतषोडशपदार्थविवेचने,
- न्यायदर्शनाभिमतप्रमाणानामौचित्यप्रदर्शने,
- वैशेषिकदर्शनप्रतिपाद्यसप्तपदार्थनिर्वचने,
- न्यायवैशेषिकदर्शनाभिमतपदार्थानां सामान्यतः साम्यवैषम्यवर्णने च ।

### ३. प्रकरणगतविशिष्टोद्देश्य–पाठ्यविषयज्ञापनपूर्वकमङ्कानां पाठघण्टानाञ्च निर्देशनम्

| प्रकरणम् | प्रकरणगत– विशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| (क) | न्यायवैशेषिकशास्त्रयोः सङ्क्षिप्तेतिहासवर्णनपूर्वकं पाठ्यग्रन्थान्तर्गतनिर्दिष्टप्रकरणेषु प्रयुक्तानां पारिभाषिकपदानां वर्णने प्रयोगे च साम–र्थ्यसम्पादनम् । | न्यायवैशेषिकशास्त्रयोः प्रथिताः पारिभाषिकशब्दाः ( विशेषतो तर्कभाषायां प्रयुक्ता तादृशाः शब्दाः) । | १५ | २४ |
| (ख) | उद्देशलक्षणपरीक्षावबोधपूर्वकं न्यायाभिमतपदार्थानामुद्देशे प्रमाणेन सह प्रमासामान्यलक्षणनिरूपणे च सामर्थ्यसम्पादनम्, करणसहितकारणलक्षणनिरूपणेसामर्थ्यसम्पादनम्, प्रत्यक्षप्रमानिरूपणे नैपुण्य–सम्पादनञ्च । | तर्कभाषाग्रन्थस्यारम्भतः प्रत्यक्षप्रमानिरूपणान्तप्रकर ण–प्रतिपाद्या विषयाः । | २० | ३२ |
| (ग) | सभेदानुमानस्वरूपप्रतिपादने सामर्थ्यसम्पादनम्, सभेदहेत्वाभासस्वरूपविवेचने दक्षत्वार्जनम्, उपमानप्रमाणस्वरूपवर्णने दक्षत्वसम्पादनम्, सकारणशाब्दबोधस्वरूपनि | तर्कभाषाग्रन्थस्यानुमानिनरूपणादारभ्य प्रमायाः परतस्त्वव्यवस्थापनान्त प्रकर ण–प्रतिपाद्या विषयाः । | २५ | ४० |

| | | | | |
|---|---|---|---|---|
| | रूपणे सामर्थ्यसम्पादनम्, अर्थापत्त्यादीनां प्रमाणान्तरत्वखण्डनपुरस्सरं प्रामाण्यस्य परतस्त्वसाधने सामर्थ्यसम्पादनञ्च । | | | |
| (घ) | अर्थान्तप्रमेयाणां स्वरूपकथने सामार्थ्यसम्पादनम्, वैशेषिकदर्शनाभिमतसप्तप दार्थानां स्वरूपनिर्धारणे नैपुण्यसम्पादनञ्च । | न्यायाभिमता अर्थान्ताः प्रमेयाः, वैशेषिकदर्शनाभिमतसप्त पदा–र्थाश्च । | २० | ३२ |
| (ङ) | बुद्ध्याद्यपवर्गान्त–प्रमेयस्वरूपविवेचने सामर्थ्यसम्पादनम्, संशयादिच–तुर्दशपदार्थवर्णने नैपुण्यार्जनञ्च । | बुद्ध्यन्ताः प्रमेयपदार्थाः, संशयाद यश्चतुर्दशपदार्थाश्च । | २० | ३२ |
| | | | १०० | १६० |

## ४.पाठ्यवस्तुविवरणम्

**'क'प्रकरणे**

उद्देशः, लक्षणम्, परीक्षा, प्रमाणम्, प्रमा, प्रामाण्यम्, करणम्, कारणम्, अयुतसिद्धिः, अन्यथासिद्धिः, अन्वयः, व्यतिरेकः, अन्वयव्याप्तिः, व्यतिरेकव्याप्तिः, अन्वयव्यभिचारः, व्यतिरेकव्यभिचारः, अयुतसिद्धिः, निर्विकल्पकम्, सविकल्पकम्, सहचारदर्शनम्, व्याप्तिज्ञानम्, पक्षधर्मताज्ञानम्, परामर्शः, लिङ्गम्, प्रतिज्ञा, हेतुः, उदाहरणम्, उपनयः, निगमनम्, केवलान्वय्यनुमानम्, केवलव्यतिरेक्यनुमानम्, अन्वयव्यतिरेक्यनुमानम्, पक्षः, सपक्षः, विपक्षः, हेत्वाभासः, उपाधिः, व्याप्यत्वम्, व्यापकत्वम्, परिशेषः, अपेक्षाबुद्धिः, प्रतियोगिता, अनुयोगिता, विसंवादी, अविसंवादी ।

**'ख'प्रकरणे**

मङ्गलाचरणम्, न्यायदर्शनाभिमतषोडशपदार्थोद्देशः, प्रमाणसामान्य–लक्षणम्, सपदकृत्यं प्रमासामान्यलक्षणम्, करणलक्षणम्, कारणलक्षणम्, कारणभेदाः, अयुतसिद्धयः,सम्बन्धस्वरूपम्, मतान्तराभिमतप्रमालक्षणं तत्खण्डनञ्च,

प्रमाणचतुष्टयोद्देशः, प्रत्यक्षप्रमाणलक्षणम्, प्रत्यक्षप्रमालक्षणम्, प्रत्यक्षप्रमाविभजनम्, प्रत्यक्षप्रमाजनकसन्निकर्षाः ।

**'ग'प्रकरणे**

परामर्शस्यानुमानत्वम्, द्विविधमनुमानम्, त्रिविधहेतुप्रदर्शनम्, अन्वयव्यतिरेकिणः पञ्चरूपोपपन्नस्यैव गमकत्वविचारः, केवलान्वयिकेवलव्यतिरेकिणोस्तु चतूरूपोपपन्नयोरपि गमकत्वसाधनम्, भेदोपभेदसहितहेत्वाभासाः, प्रमाणान्तरत्वव्यवस्थापनेन सहोपमानप्रमाणम्, शब्दप्रमाणम्, वाक्यलक्षणम्, आकाङ्क्षादीनां ज्ञानानां शाब्दबोधहेतुत्वव्यवस्थापनम्, आकाङ्क्षायाः पदनिष्ठत्वनिर्धारणम्, वैदिकावैदिकभेदेन द्विविधं शब्दप्रमाणम्, अर्थापत्तेः प्रमाणान्तरत्वखण्डनम्, अभावस्य पृथक्प्रमाणत्वखण्डनम्, प्रमात्वस्य स्वतोग्राह्यत्ववादिनां मतोपस्थापनं तन्मतेऽरुचिप्रदर्शनपूर्वकं परतस्त्वव्यवस्थापनञ्च ।

**'घ'प्रकरणे**

द्वादशविधप्रमेयोद्देशः, आत्मा, आत्मनो द्वैविध्यम्, आत्मप्रत्यक्षविचारः, शरीरलक्षणम्, शरीरभेदाः, इन्द्रियलक्षणम्, इन्द्रियभेदाः, इन्द्रियाणामतीन्द्रियत्वम्, अर्थाः, अर्थान्तर्गततया वैशेषिकदर्शनाभिमतषट्पदार्थाः, प्रमाणादीनां पृथक्तया निरूपणप्रयोजनम्, द्रव्यसामान्यलक्षणम्, द्रव्याणि, प्रत्येकद्रव्यलक्षणम्, प्रत्येकद्रव्यवृत्तयो गुणाः, कार्यद्रव्याणामुत्पत्तिविनाशौ, परमाणुसाधनप्रकारः, वायवाकाशकालदिशामनुमानसाध्यत्वम्, मनसोऽणुत्वम्, गुणः, कर्म, सामान्यम्, विशेषः, समवायः, अभावश्च ।

**'ङ'प्रकरणे**

बुद्धेर्लक्षणम्, बुद्धिभेदाः, यथार्थानुभवस्य चातुर्विध्यम्, यथार्थायथार्थानुभवलक्षणे, मनः प्रवृत्तिदोषप्रेत्यभावफलदुःखानां स्वरूपाणि, अपवर्गः, संशयलक्षणम्, प्रयोजनम्, दृष्टान्तः, सिद्धान्तः तद्भेदाश्च, पञ्चावयवाः, तर्कः, तस्यानुमानग्राहकत्वसाधनम्, निर्णयः, वादः, सभेदं हेत्वाभासस्वरूपम्, जल्पः, वितण्डा, छलम्, जातिः, निग्रहस्थानञ्च ।

**६. मूल्याङ्कनविधिः**

आन्तरिक (निर्माणात्मक) बाह्य (निर्णयात्मक) भेदेन मूल्याङ्कनं द्विधा विभज्यते । आन्तरिकमूल्याङ्कनं मूलतः कक्षागतमेव भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्यसम्बद्धशिक्षकेण विभागसमन्वितकार्य-योजनायामान्तरिकमूल्याङ्कनं विधेयम् । गृहकार्य-कक्षापरीक्षा-परियोजनाकार्यादीन्यपि तन्मूल्याङ्कनस्याधारभूतानि भवितुमर्हन्ति । आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशदङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः कृते पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वं सम्बद्धविद्यापीठेनप्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृत-

विश्वविद्यालयपरीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्यासंयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु यथापरिस्थितिसा परीक्षापि अन्तर्वार्तादिनापि सम्पादयितुं शक्यते । वार्षिकपरीक्षायाः कृते सतिसम्भवेविवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगतानाञ्च प्रश्नानांकृते प्रकरणनिदर्शनं विधाय प्रश्ननिर्माणसारिणी परिकल्पनीया । तदर्थमधोनिर्दिष्टप्रकारेण प्रश्नपत्रनिर्माणं विधेयम् –

**वार्षिकपरीक्षार्थंप्रश्नपत्रनिर्माणप्रकारविवरणम्**

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | अङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| ख,ग,घ,ङ | विवेचनात्मकाः | ३ | २ | १२ | २४ |
| क,ख,ग,घ,ङ | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ | ४२ |
| ख,ग,घ,ङ | व्याख्यात्मकाः | ४ | ३ | ८ | २४ |
| क,ख,ग,घ,ङ | वस्तुगताः ( बहुवैकल्पिकाः) | १० | १० | १ | १० |
| | योगः | २६ | २१ | | १०० |

## ७. पाठ्यसामग्रीसूची

(क) **पाठ्यग्रन्थः**–

१.कशवमिश्रः,**तर्कभाषा**बदरीनाथशुक्लकृतहिन्दीव्याख्यासहिता,षष्ठं संस्करणम्, मोतिलाल बनारसीदास वाराणसी, सन् २०१४ ।

(ख) **सन्दर्भग्रन्थाः**–

१.अन्नम्भट्टः, **तर्कसङ्ग्रहः,** दीपिकाकिरणावलीन्यायबोधिनीपद–कृत्यटिप्पण्यादिसहितः, चौखम्भा विद्याभवन वाराणसी, सन् २००३ ।

२.कशवशरण अर्याल, **न्यायसूत्र र वैशेषिकसूत्रको तुलनात्मक पर्यालोचन**, नेपाल प्रज्ञा प्रतिष्ठान कमलादी, काठमाडौँ, वि.सं.२०७५ ।

३.जगदीशभट्टाचार्यः, **तर्कामृतम्,** नेपालीभाषानुवादविशेषटिप्पणीसहितम्, अनुवादकः टिप्पणीकर्ता च जगत्प्रसाद उपाध्याय, विष्णुप्रभा उपाध्याय, काठमाडौँ, वि.सं. २०६७ ।

४. पद्मप्रसाद भट्टराई,**, पौरस्त्य दर्शन : एक चिनारी,** विद्यार्थी पुस्तक भण्डार भोटाहिटी, काठमाडौँ, वि. सं. २०७४ ।

५.विश्वनाथपञ्चाननभट्टाचार्यः, **न्यायसिद्धान्तमुक्तावली**, किरणावली–व्याख्यासहिता, पञ्चमं संस्करणम्, चौखम्भा संस्कृत संस्थान वाराणसी, वि.सं.२०५२ ।

# विषयः — प्राचीनन्यायवैशेषिकम्

पाठ्यांशनाम —**न्यायवैशेषिक-तरपौरस्त्यदर्शनाध्ययनम्** पाठ्यांशसङ्केतः— प्रा.न्या. ३०२
स्तरः— शास्त्री पूर्णाङ्काः— १००
खण्डः— प्रथमः वार्षिकःपाठ्यभारः—१६० घण्टाः
पत्रम्— द्वितीयम् साप्ताहिकः पाठ्यभारः— ६

**१. पाठ्यांशपरिचयः**

पाठ्यांशोऽयम् उत्तरमध्यमां कक्षाम्, द्वादशीं कक्षां नेपालसंस्कृतविश्वविद्यालयीयां प्राक्शास्त्रिकक्षां वा समुत्तीर्य शास्त्रीकक्षां प्रविश्य प्राचीनन्यायविषयमध्येतुकामानां छात्राणांकृते शास्त्रिप्रथमवर्षस्य द्वितीयपत्रत्वेन निर्धारितो वर्तते।

अत्र पाठ्यांशे दर्शनपदार्थः, दर्शनप्रवृत्तिकारणम्, पौरस्त्यदर्शनविभजनम्, पौरस्त्यदर्शनसंज्ञा, पौरस्त्यदर्शनस्य सङ्क्षिप्तेतिहासः, चार्वाक-जैन-बौद्ध-साङ्ख्य-योग-पूर्वमीमांसोत्तरमीमांसादर्शनप्रतिपादितमूलभूतविषयाः पाठ्यत्वेन समाविष्टाः सन्ति।

पञ्चसु खलु प्रकरणेषु विभक्तेऽस्मिन् पाठ्यांशे वैदिकावैदिकभेदेन प्रथितेषु दर्शनेषु न्यायवैशेषिकतरेषां दर्शनानां सामान्यपरिचयप्रदानधिया तत्तद्दर्शनाभिमतमुख्यसिद्धान्ता निर्दिष्टाः सन्ति । तत्र प्रथमप्रकरणे दर्शनस्य सामान्यपरिचयपूर्वकं दर्शनप्रवृत्तिकारणम्, पौरस्त्यदर्शनभेदोपभेदः, पौरस्त्यदर्शनस्य सङ्क्षिप्तेतिहासश्चैतावन्तो विषया निर्धारिता वर्तन्ते । द्वितीये च प्रकरणे चार्वाकदर्शनपरिचयपूर्वकं तद्दर्शनस्य सङ्क्षिप्तेतिहासं संयोज्य तदभिमतमूलभूतसिद्धान्ता निर्धारिताः सन्ति । तदनु जैनबौद्धदर्शनयोः सामान्यपरिचयपूर्वकं तद्द्वयोरपि दर्शनयोः सङ्क्षिप्तेतिहासं सन्निवेश्य तत्तद्दर्शनप्रतिपादितेषु नैकविधेषु विषयेषु प्रामुख्यं भजमानाः कतिपये विषयाः पाठ्यत्वेन निर्दिष्टाः वर्तन्ते। एवं रीत्या तुरीये पञ्चमे च प्रकरणे साङ्ख्य-योग-पूर्वोत्तरमीमांसाप्रतिपाद्यविषयपरिचयाय तत्तदर्शनस्य सङ्क्षिप्तेतिहासं तत्तद्दर्शनसम्बद्धानि कानिचिन्महत्त्वपूर्णप्रकरणानि चात्र पाठ्यांशे समावेश्य तदुपयोगिनः पाठ्यविषया निर्धारिताः सन्ति । अत्र तावत् सामान्यविशिष्टोद्देश्यप्रकरणविभागशिक्षणविधिमूल्याङ्कनविधिप्रश्नपत्रनिर्माणप्रक्रियापाठ्यग्रन्थसन्दर्भग्रन्थाश्चेति पाठ्यक्रमस्य बीजत्वेनाभिमतानि तत्त्वानि समाविष्टानि सन्तीति।

**२. पाठ्यांशस्य सामान्योद्देश्यानि**

अस्य पाठ्यांशस्याध्ययनेनच्छात्राः सामान्यतयाधोनिर्दिष्टविषयेषु समर्था भविष्यन्ति

- दर्शनपदार्थावबोधपूर्वकपौरस्त्यदर्शनविभजने, सङ्क्षिप्तेतिहासवर्णने च,
- चार्वाकदर्शनगतमुख्यसिद्धान्तव्याख्याने,
- जैनबौद्धदर्शनाभिमतमूलसिद्धान्तवर्णने,
- साङ्ख्ययोगदर्शनगतमूलभूतविषयपरिज्ञानपूर्वकमुभयदर्शनस्य सिद्धान्तपरिशीलने,
- पूर्वमीमांसोत्तरमीमांसादर्शनगतमुख्यविषयाणां विवेचने च।

### ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| (क) | दर्शनपदार्थस्यावबोधपूर्वकं पौरस्त्यदर्शनपरम्परालोडन-विभजन-प्रवृत्तिपर्यालोचनम् । | दर्शनपदार्थः, तत्प्रवृत्तिकारणम्, पौरस्त्यदर्शनस्य सङ्क्षिप्तपरम्परा, भौतिकाध्यात्मिकदृष्ट्या अथ च वैदिकावैदिकदृष्ट्या पौरस्त्यदर्शनविभजनं तत्परिगणनञ्च । | १० | १६ |
| (ख) | चार्वाकदर्शनस्य सङ्क्षिप्तेतिहासकथनपूर्वकमेतद्दर्शनाभिमतमूलसिद्धान्तेषु वर्णनम् । | सर्वदर्शनसङ्ग्रहस्य चार्वाकदर्शने प्रतिपादिता विषयाः । | १० | १६ |
| (ग) | बौद्धजैनदर्शनयोः सङ्क्षिप्तेतिहासवर्णनपूर्वकं द्वयोर्दर्शनाभिमतमुख्यसिद्धान्तानां सामान्यतो विवेचने सामर्थ्यम् । तत्र बुद्धस्य परिचयज्ञानपूर्वकं बौद्धदर्शनाभिमतचतुरार्यसत्य-क्षणिकत्व-प्रतीत्यसमुत्पाद-अनात्मवाद-अनीश्वरवाद-अभौतिकवाद-दार्शनिकसम्प्रदायानां सामान्यतो वर्णने सामर्थ्यार्जनम् । तथा च जैनशब्दार्थपरिचयपूर्वकं जैनदर्शनाभिमतसप्तपदा | काशिकानन्दगिरिविरचितद्वादशदर्शनसङ्ग्रह, इत्याख्ये ग्रन्थे उपनिबद्धबौद्धसामान्यदर्शने विवृता विषयाः। वादिदेवसूरिविरचिते प्रमाणनय-तत्त्वालोक, इत्याख्ये ग्रन्थे प्रतिपादितेषु विषयेषु निर्दिष्टा विषयास्तथा च काशिकानन्दगिरिविरचितद्वादशदर्शनसङ्ग्रह, इत्याख्ये ग्रन्थे उपनिबद्धजैनदर्शने विवृतेषु निर्दिष्टा विषयाः । | ३० | ४८ |

| | | | | |
|---|---|---|---|---|
| | र्थप्रमाणनय- स्याद्वाद-जीव-अजीव-आस्रव-बन्ध-संवर-निर्जर-मोक्षस्वरूपाणां विश्लेषणम्। | | | |
| (घ) | साङ्ख्यदर्शनगतसाङ्ख्य पदार्थविवेचने तद्दर्शनस्य सङ्क्षिप्तेतिहासवर्णने साङ्ख्यदर्शनाभिमतचतुर्विंशति-तत्त्वानां परिचयप्रदानम् । योगदर्शनघटकयोगपदार्थ विवचनम् । तद्दर्शनस्य सङ्क्षिप्तेतिहासवर्णनम्। योगदर्शनाभिमतानां प्रामुख्यं भजमानानां निर्दिष्टविषयाणां परिचयप्रदानम्। | साङ्ख्यकारिकागता -भिः १-३, ९-२७, ६८तमाभिः कारिकाभिः प्रतिपादितविषयाः। योगसूत्रगतैः समाधिपादस्य १-११, २४-२७ तमैः सूत्रैः, साधनपादस्य १-९, १५-२५तमैः सूत्रैः, विभूतिपादस्य १-८ तमैः सूत्रैः, कैवल्यपादस्य ३४ तमेन च सूत्रेण प्रतिपादिता विषयाः। | २० | ३२ |
| (ङ) | मीमांसादर्शनगतमीमांसा पदार्थ-विवेचने तद्दर्शनस्य सङ्क्षिप्तेतिहासवर्णने भाट्टगुरुसम्मतानां प्रमाणानां द्रव्यादिपदार्थानाञ्च सामान्यविवेचनम् । विधि-मन्त्र-नामधेय-निषेधार्थवादानां नित्य-नैमित्तिक-काम्यनिषिद्ध-प्रायश्चित्तस्वरूपाणां कर्म्मणाञ्च विश्लेषणम् | काशिकानन्दगिरिविरचितद्वादश-दर्शनसङ्ग्रह, इत्याख्ये ग्रन्थे उपनिबद्धमीमांसादर्शनस्य १-३२, ७१-१०९तमाभिः कारिकाभिर्विवृता विषयाः। वेदान्तसारस्य आरम्भतोऽपवादप्रकरणं यावन्निरूपितेषु विषयेषु निर्दिष्टा विषयाः। | ३० | ४८ |

| | | | | |
|---|---|---|---|---|
| | । वेदान्तदर्शनघटकवेदान्त पदार्थविवेचने तद्दर्शनस्य सङ्क्षिप्तेतिहासवर्णनम् । वेदान्तविद्यायाः प्रभेदानां सामान्यज्ञानपूर्वकमद्वैतवेदान्तप्रतिपादिताधिकारित्वाध्यारोपसृष्टिक्रम-पञ्चीकरणप्रकार-अपवाद-विवर्तवाद-जीवेश्वर-ब्रह्म-त्रिविधसत्ताख्यविषयाणां परिचयप्रदानम् । | | | |

### ४. पाठ्यवस्तुविवरणम्

**'क' प्रकरणे**

विद्यास्थानानि, विद्यानां दर्शनसंज्ञा, दर्शनशब्दस्य व्युत्पत्तिरर्थश्च, दर्शनभेदस्य कारणप्रतिपादनम्, वैदिकावैदिकभेदेन अथ च भौतिकाध्यात्मिकभेदेन पौरस्त्यदर्शनानां वैविध्यप्रतिपादनम्, पौरस्त्यदर्शनानां सङ्ख्याविचारः, पौरस्त्यदर्शनानां परम्परा प्रवृत्तयश्च ।

**'ख' प्रकरणे**

चार्वाकशब्दार्थः, चार्वाकदर्शनस्य सङ्क्षिप्तेतिहासः, चार्वाकसम्मतानि चत्वारि तत्त्वानि, देहात्मवादः, चैतन्यम्, पुरुषार्थविमर्शः, वेदानामप्रामाण्यविचारः, नरकः, ईश्वरः, मोक्षः, प्रमाणम् ।

**'ग' प्रकरणे**

बौद्धशब्दार्थः, बौद्धदर्शनस्य सङ्क्षिप्तेतिहासः, चत्वारि आर्यसत्यानि (दुःखम्, दुःखसमुदयः, दुःखनिरोधः, दुःखनिरोधमार्गः), निरोधगामिनी प्रतिपद् (तत्र ज्ञानशीलसमाधिषु अन्तर्भूताः सम्यग्दृष्टि-सम्यक्सङ्कल्प-सम्यग्वचन-सम्यक्कर्म-सम्यगाजीविका-सम्यक्प्रयत्न-सम्यक्स्मृति-सम्यक्समाधयः), क्षणिकत्वम्, प्रतीत्यसमुत्पादः, अनात्मवादः, पञ्चस्कन्धाः (रूपस्कन्धः, वेदनास्कन्धः, संज्ञास्कन्धः, संस्कारस्कन्धः, विज्ञानस्कन्धः), अनीश्वरवादः, अभौतिकवादः, बौद्धदर्शनस्य वैभाषिक-सौत्रान्तिक-योगाचार-माध्यमिकसम्प्रदायास्तेषां वैशिष्ट्यञ्च ।

जैनशब्दार्थः, जैनदर्शनस्य सङ्क्षिप्तेतिहासः, जैनदर्शनसम्मतसप्तपदार्थाः, प्रमाणनयौ, स्याद्वादः, जीवस्वरूपम्, भावाः, अजीवस्वरूपम्, आस्रवस्वरूपम्, बन्धस्वरूपम, संवरः, निर्जरः, मोक्षस्वरूपम् ।

**'घ' प्रकरणे**

साङ्ख्यशब्दार्थः, साङ्ख्यदर्शनस्य सङ्क्षिप्तेतिहासः, साङ्ख्यदर्शनाभिमतचतुर्विंशतिस्तत्त्वानि - मूलप्रकृतिः, त्रिगुणम्, महत्, अहङ्कारः, मनः, पञ्च कर्मेन्द्रियाणि, पञ्च ज्ञानेन्द्रियाणि, शब्दस्पर्शरूपरसगन्धाख्याः पञ्च तन्मात्राः, आकाश-वायु-तेजो-जल-पृथिव्यादीनि पञ्चमहाभूतानि, पुरुषः (आत्मा), सत्कार्यवादः, साङ्ख्यसम्मतप्रमाणानि, मोक्षस्वरूपं तत्प्राप्त्युपायश्च । योगशब्दार्थः, योगदर्शनस्य सङ्क्षिप्तेतिहासः, योगदर्शनाभिमतप्रमाणानि, चित्तवृत्तयः, ईश्वरः, क्रियायोगः, क्लेशाः, यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयो=ष्टावङ्गानि, कैवल्यस्वरूपं तत्प्राप्त्युपायश्च ।

**'ङ' प्रकरणे**

मीमांसाशब्दार्थः, मीमांसादर्शनस्य सङ्क्षिप्तेतिहासः, धर्मलक्षणम्, भाट्टगुरुसम्मता द्रव्यादयः पदार्थाः, भाट्टगुरुसम्मतानि प्रमाणानि । विधि-मन्त्र-नामधेय-निषेधार्थवादाः । नित्य-नैमित्तिक-काम्य-निषिद्ध-प्रायश्चित्तस्वरूपाणि वेदविहितकर्माणि, नित्ये यथाशक्ति काम्ये च सर्वाङ्गसङ्ग्रहेणानुष्ठानमिति नियमः । वेदान्तशब्दार्थः, वेदान्तदर्शनस्य सङ्क्षिप्तेतिहासः, वेदान्तदर्शनप्रभेदाः (निर्विशेषाद्वैतम्, विशिष्टाद्वैतम्, द्वैताद्वैतम्, द्वैतम्, शुद्धाद्वैतम्), निर्विशेषाद्वैतानुसारेण वेदान्ताधिकारी, अध्यारोपः, सृष्टिक्रमः, पञ्चीकरणप्रकारः, अपवादः, विवर्तवादः, जीवस्वरूपम्, ईश्वरस्वरूपम, ब्रह्मस्वरूपम्, त्रिविधसत्ता ।

## ५. शिक्षणविधिः शैक्षणिकसामग्री च

पाठ्यांशस्यास्य शिक्षणे व्याख्यानप्रश्नोत्तरविश्लेषण-निगमनागमनप्रदर्शनशिक्षणाद्यः विधयो प्रकरणानुसारेण प्रतिपाद्यविषयानुरूपेण चात्र प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः कवेलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः समुत्प्रेरणीयाः । समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रतिपाद्यविषया-नुरूपाणां प्रयोगोऽपेक्षितः । अत्यावश्यक( स्थितिविशेषे अन्तर्जालादि-माध्यमेन दूरशिक्षणमपि कर्तुं शक्यते । तदर्थं सङ्गणकयन्त्रादीनि प्रयुज्यानि । तद्व्यवस्थापनं सम्बद्धशिक्षकण विभागेन विद्यापीठेन वा विधेयम् । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्थापि कार्या । यथाकालं शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्ष्यते । तद्व्यवस्थापनं विभागेन कार्यम् । तदर्थं विद्यापीठेन विश्वविद्यालयेन वा साहाय्यं विधेयम् ।

## ६. मूल्याङ्कनविधिः

आन्तरिक (निर्माणात्मक) बाह्य (निर्णयात्मक) भेदेन मूल्याङ्कनं द्विधा विभज्यते । आन्तरिकमूल्याङ्कनं मूलतः कक्षागतमेव भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकण विभागसमन्वितकार्य-योजनायामान्तरिकमूल्याङ्कनं विधेयम् । गृहकार्य-

कक्षापरीक्षापरियोजना–कार्यादीन्यपि तन्मूल्याङ्कनस्याधारभूतानि भवितुमर्हन्ति । आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशदङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः कृते पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्वविद्यालयपरीक्षा–नियन्त्रणकार्यालयेन अनुपातपद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । बाह्यपरीक्षा लेखात्मिकैव भवति । । वार्षिकपरीक्षायाः कृते सति सम्भवे विवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगतानाञ्च प्रश्नानां कृते प्रकरणनिदर्शनं विधाय प्रश्ननिर्माणसारिणी परिकल्पनीया । तदर्थमधोनिर्दिष्टप्रकारेण प्रश्नपत्रनिर्माणं विधेयम् –

**वार्षिकपरीक्षाप्रश्नपत्रनिर्माणसारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | अङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| ख,ग,घ,ङ | विवेचनात्मकाः | ३ | २ | १२ | २४ |
| क,ख,ग,घ,ङ | सङ्क्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ | ४२ |
| ख,ग,घ,ङ | व्याख्यात्मकाः | ४ | ३ | ८ | २४ |
| क,ख,ग,घ,ङ | वस्तुगताः बहुवैकल्पिकाः) | १० | १० | १ | १० |
| | योगः | २६ | २१ | | १०० |

## ७. पाठ्यसामग्रीसूची

**(क) पाठ्यग्रन्थाः**

१.ईश्वरकृष्णः, **साङ्ख्यकारिका**, पदवाक्यप्रमाणपारावारीणसर्वतन्त्रस्वतन्त्र–श्रीवाचस्पतिमिश्रविरचितया तत्त्वकौमुद्या, पं.श्रीशिवनारायणशास्त्रि–विरचितया सारबोधिनीव्याख्यया तत्कृतटिप्पण्या च समलङ्कृता, चौखम्बा विद्याभवन, , वाराणसी, सन् २००१ ।

२. काशिकानन्दगिरिः, **द्वादशदर्शनसङ्ग्रहः**, श्री स्वामी काशिकानन्दगिरिजी ट्रस्ट, मुम्बई, सन् १९८८ ।

३. पतञ्जलिः, **पातञ्जलदर्शनम्**, व्यासभाष्यसहितम्, पुनर्मुद्रण, चौखम्बा संस्कृत भवन, वाराणसी, वि.सं.२०६४ ।

४. माधवाचार्यः, **सर्वदर्शनसङ्ग्रहः**, सपरिशिष्टः प्रकाशहिन्दीभाष्योपेतः, व्याख्याता उमाशङ्करः शर्मा ऋषिः, चौखम्बा विद्याभवन, वाराणसी, सन् २०१४ ।

५.वादिदेवसूरिः, **प्रमाणनयतत्त्वालोकः**, रामगोपालाचार्यकृतसंस्कृत– व्याख्यायुतः, गीतार्थगङ्गा, अहमदाबाद, सन् ? ।

६.सदानन्दः, **वेदान्तसारः**, भावबोधिनी संस्कृतहिन्दीव्याख्योपेतः, व्याख्याकारः श्री रामशरणत्रिपाठी शास्त्री, चौखम्बा विद्याभवन, वाराणसी, सन् १९९३ ।

**(ख) सन्दर्भग्रन्थाः**


१. चन्द्रधर शर्मा, **भारतीय दर्शन : आलोचना और अनुशीलन,** पुनर्मुद्रण, मोतीलाल वनारसीदास, दिल्ली सन् १९९८ ।

२. जगत् उपाध्याय प्रेक्षितङ्, **पौरस्त्य दर्शनको सैद्धान्तिक रूपरेखा, ..,**काठमाडौँ, वि.सं. २०७७।

**३.**नारायण भट्टः नारायणपण्डितश्च **मानमेयोदयः** (स्वामियोगीन्द्रानन्दकृतया हिन्दीव्याख्यया समलङ्कृतः), द्वितीय संस्करण, चौखम्बा, विद्याभवन, वाराणसी, सन् १९९६ ।

४. पद्मप्रसाद भट्टराई पौरस्त्य दर्शन : एक चिनारी, विद्यार्थी पुस्तक भण्डार, काठमाडौँ, वि.सं.२०७४ ।

५.प्रमोदवर्धनः कौण्डिन्यायनः, **मीमांसाग्रन्थकारेतिहासः**, स्वाध्यायशालाकुटुम्बम्, काष्ठमण्डपस्थम्, वि.सं.२०६७ ।

६. बलदेव उपाध्याय **बौद्धदर्शनमीमांसा**, पञ्चम संस्करण, शारदा मन्दिर, वाराणसी, सन् १९९९ ।

७. बलदेव उपाध्याय (प्रधानसम्पादक) **संस्कृत-वाङ्मयका बृहत् इतिहास** (९, १०, १२ खण्ड), लखनऊ : उत्तर प्रदेश संस्कृत संस्थान, वि.सं.२०५६ ।

८.बादरायणः, **ब्रह्मसूत्रम्,** कौण्डिन्यायनवृत्तियुतम्, वृत्तिकारः शिवराज कौण्डिन्यायनः, भूमिकाभागः, चौखम्बा विद्याभवन, वाराणसी, सन् २००२ ।

९. मल्लिषेणः, **स्याद्वादमञ्जरी** (नेपालीभाषायामनुवादसहिता) (अनुवादक काशीनाथ न्यौपाने), नेपाल प्रज्ञा-प्रतिष्ठान, काठमाडौँ, वि.सं. २०७१ ।

१०. मोहन वैद्य किरणः, **हिमाली दर्शन,** साझा प्रकाशन, ललितपुर, वि.सं.२०७४ ।

११. राहुल साङ्कृत्यायन **दर्शन दिग्दर्शन**, द्वितीय संस्करण, किताब महल, इलाहाबाद, सन् २००३

१२. लौगाक्षिभास्करः, **अर्थसङ्ग्रहः**, अर्थबोधिनीव्याख्यायुतः (व्याख्याता डा.दयाशङ्कर शास्त्री), चौखम्बा विद्याभवन,वाराणसी, सन् २००३ ।

१३. विद्यारण्यः, **पञ्चदशी** (तत्त्वविवेकप्रकरणात्मिका) संस्कृतनेपाली भाषोभयटीकायुता (टीकाकारः सुमोदवर्द्धनकौण्डिन्यायनः), भूमिकाभागः, विद्यार्थी पुस्तक भण्डार, काठमाडौँ, वि.सं.२०७० ।

१४. श्रीपादशास्त्री हसूरकरः, **द्वादशदर्शनसोपानावलिः**, गुड कम्पेनियन्स, बडोदरा, सन् १९९३ ।

१५.हरिभद्रसूरिः, **षड्दर्शनसमुच्चयः** (नेपालीभाषानुवादसहितः) (अनुवादक गोपीरमण उपाध्याय),नेपाल प्रज्ञा-प्रतिष्ठान,काठमाडौँ, वि.सं.२०७३ ।

## विषय : **ऐच्छिकनव्यन्यायः**

पाठ्यांशनाम – **अनुमानखण्डतः शब्दखण्डान्तदिनकर्य्यध्ययनम्**

स्तरः – शास्त्री
वर्षः – प्रथमः
पत्रम्– द्वितीयम्

पाठ्यांशसङ्केतः–न.न्या. ३०२
पूर्णाङ्काः – १००
वार्षिकःपाठ्यभारः - १६०
साप्ताहिकः पाठ्यभारः – ६

### १. पाठ्यांशपरिचयः–

पञ्चसु प्रकरणेषु विभक्तोऽयं पाठ्यक्रमोन्यायविषयमवलम्ब्योत्तरमध्यमां कक्षाम्, न्यायविषय–मवलम्ब्य द्वादशीं कक्षां नव्यन्यायविषयमवलम्ब्य नेपालसंस्कृतविश्वविद्यालयीयांप्राक्शास्त्रिकक्षां वा समुत्तीर्यनव्यन्यायविषय–मवलम्ब्यशास्त्रिकक्षामध्येतुकामानां छात्राणांकृते शास्त्रिप्रथमवर्षस्य द्वितीयपत्रत्वेन निर्धारितो वर्तते।

न्यायदर्शने विशेषतो नव्यन्यायदर्शने प्रयुक्ताया भाषा–शैल्यास्तत्परिष्कारप्रणाल्याश्च ज्ञानार्थं नव्यन्यायसम्बद्धानां कश्चिञ्चन व्युत्पत्तिसम्पादकानां पारिभाषिकपदानां परिचयप्रदानेन सह तेषां सप्रयोगं सोदाहरणं तद्विषयकविवेचनसामर्थ्यं छात्राः प्राप्नुयुरिति धिया कतिचन प्रमुखा विशेषतो न्यायसिद्धान्तमुक्तावल्या अनुमानखण्डतः शब्दखण्डपर्यन्त–दिनकरीव्याख्यायां प्रयुक्ताः पारिभाषिकशब्दाः पाठ्यक्रमेऽत्र कप्रकरणान्तर्गततया सन्निविष्टाः सन्ति।

षड्विधास्तिकदर्शनेष्वन्यतमन्यायदर्शनस्य प्रमाणप्रधानतया प्रमाणेष्वन्यतमस्या–नुमानप्रमाणस्योपमानशब्दयोश्च विशेषज्ञानाय न्यायसिद्धान्त–मुक्तावल्या अनुमानखण्डतः शब्दखण्डपर्यन्तभागस्य दिनकरीव्याख्यान्तर्गता विषयाश्चात्र पाठ्यक्रमे ख–ग–घ–ङप्रकरणेषु यथाक्रमं निर्धारिताः सन्ति । तेषु खप्रकरणे अनुमितिस्वरूपम्, परामर्शस्वरूपम्, अनुमितिपरामर्शयोः कार्यकारणभावः, परामर्शस्यानुमित्यकारणत्ववादिनां मतनिराकरणे प्रयुक्त–युक्तीनामनुशीलनम्, पूर्वपक्षाभिमतव्याप्तिस्वरूपानुशीलनमित्यादयो विषयाः समाविष्टाः सन्ति। गप्रकरणे सिद्धान्तव्याप्त्यनुशीलनप्रयोजनप्रदर्शनम्, सिद्धान्तव्याप्तेः स्वरूपप्रदर्शनम्, सिद्धान्तव्याप्तिघटकानां पदानामर्थनिर्धारणम्, तेषां पदानां प्रयोजनप्रदर्शनञ्च यथाविषयं निर्धारितं वर्तते । घप्रकरणे पक्षतास्वरूपनिर्वचनम्,हेत्वाभासलक्षणनिर्वचनं हेत्वाभासभेदप्रदर्शनम्, हेत्वाभास–पदव्युत्पत्तिप्रदर्शनपूर्वकहेत्वाभासलक्षणकथनम्, प्रत्येकस्य हेत्वाभासस्य सोदाहरणं लक्षणनिर्वचनञ्च निर्धारितं वर्तते । ङप्रकरणे च सकारणमुपमानस्वरूपपरिचयः, शाब्दबोधस्वरूपपरिचयः, शाब्दबोधकारणानां परिचयश्च समाविष्टो वर्तते।

### २. पाठ्यांशसामान्योद्देश्यम् –

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोनिर्दिष्टविषयेषु प्राविण्यमेष्यन्ति

- शास्त्रीयविषयगतसमस्यामाकलय्य तत्समाधाने नव्यन्यायशैल्या तत्सम्बद्धपारिभाषिकपदप्रयोगे
- न्यायदर्शनाभिमतानुमानाङ्गविश्लेषणे तत्प्रयोगे च
- हेत्वाभाससामान्यं परिचीय स्वस्य कृतौ तत्परिवर्जने
- साङ्गमुपमानप्रमाणविवेचने
- कारणस्वरूपनिर्देशपूर्वकशाब्दबोधविषये च

**३. प्रकरणगतविशिष्टोद्देश्यं पाठ्यविषयसंयोजनञ्च**

| **प्रकरणम्** | **प्रकरणगतविशिष्टोद्देश्यम्** | **पाठ्यविषयाः** | **अङ्काः** | **पाठघण्ट्यः** |
|---|---|---|---|---|
| क. | पाठ्यग्रन्थे निदिष्टप्रकरणेषु प्रयुक्तानां व्युत्पत्तिसम्पदकानां पारिभाषिकपदानां सोदाहरणमर्थस्फुटीकरणं तेषां प्रयोगप्रदर्शन–प्राविण्य–सम्पादनञ्च | कश्चाञ्चन पारिभाषिकशब्दानामर्थपरिचयस्तेषां सोदाहरणं प्रयोग विधिश्च | २० | ३२ |
| ख. | अनुमितिस्वरूपज्ञानम्, परामर्शस्वरूपबोधः, परामर्शस्यानुमित्यकारणतवादिनां मतनिराकरणे प्रयुक्तयुक्तीनामनुशीलने दक्षत्वसम्पादनम्, पूर्वपक्षव्याप्तिस्वरूपानुशीलनञ्च | न्यायसिद्धान्त–मुक्तावल्या अनुमानखण्ड–स्यारम्भतः पूर्वपक्षव्याप्तिनि–रूपणान्तभागस्य मूले दिनकरी–व्याख्या–याञ्च प्रतिपादिता विषयाः। | २० | ३२ |
| ग. | सिद्धान्तव्याप्तेः स्वरूपज्ञानम्, सिद्धान्तव्याप्तिघटकपदानामर्थ—ज्ञानं तेषां पदानां प्रयोजनप्रदर्शनञ्च | न्यायसिद्धान्तमुक्तावल्या अनुमानखण्डे प्रतिपादितसिद्धान्त–व्याप्तेर्लक्षणम्, तल्लक्षणघटकपदानामर्थास्तत्पदानां प्रयोजनञ्च। | २० | ३२ |

| | | | | |
|---|---|---|---|---|
| घ. | अनुमानाङ्गपक्षतास्वरूपनिर्वचनम्, हेत्वाभास-भेदप्रदर्शनम्, हेत्वाभास-पदव्युत्पत्तिपूर्वकहेत्वाभासस्वरूपज्ञानञ्च, | न्यायसिद्धान्त-मुक्तावल्या अनुमानखण्डे प्रतिपादितपक्षतास्वरूपम्, हेत्वाभास-स्वरूपं तद्भेदाश्च। | २० | ३२ |
| ङ. | सकारणमुपमानस्वरूपपरिज्ञानम्, शाब्दबोध-स्वरूपज्ञानम्, शाब्दबोधकारणानां परिचयश्च | सकारणमुपमान-स्वरूपम्, कारणसहितशाब्दबोधस्वरूपञ्च | २० | ३२ |

**४. पाठ्यवस्तुविवरणम्**

**'क'प्रकरणम्**

करणम्, व्यापारः, कारणम्, कार्यम्, पक्षः, साध्यः, हेतुः, दृष्टान्तः, पञ्चावयववाक्यानि, अवच्छेदकत्वम्, अवच्छेद्यत्वम्, प्रतियोगित्वम्, सम्बन्धः, प्रतियोगितावच्छेदकधर्मसम्बन्धौ, साध्यतावच्छेदकधर्मसम्बन्धौ, साध्यता-वच्छेदकतावच्छेदकधर्मसम्बन्धौ, हेतुतावच्छेदकधर्मसम्बन्धौ, हेतुतावच्छेद-कतावच्छेदकधर्मसम्बन्धौ, धर्मितावच्छेदकधर्मः, धर्मितावच्छेदकता-वच्छेदकधर्मसम्बन्धौ, अव्याप्यवृत्तित्वम्, पक्षता, सिद्धिः, सिषाधयिषा, प्रतिबन्धकत्वम्, उत्तेजकत्वम्, हेत्वाभासाश्चेत्यादयः ख-ग-घ-ङप्रकरणेष्वागतास्तत्तच्छब्दाः।

**'ख'प्रकरणम्**

अनुमितिस्वरूपनिर्वचनम्, अनुमितिपरामर्शयोः कार्यकारणभाव-व्यवस्थापनम्, दिनकर्यनुसारेण परामर्शस्यानुमितिव्यापारत्वसम्पादनम्, अनुमितौ ज्ञायमानलिङ्गकरणत्ववादिनां मतोपस्थापनं तत्खण्डनञ्च, तत्र दिनकरमतपर्यालोचनम्, परामर्शस्य स्वरूपनिर्वचनम्, परामर्शविषये मीमांसकमतोपस्थापनम्, मीमांसकमतखण्डनपूर्वकस्वमतोपस्थापनम्, पूर्वपक्ष-व्याप्तिस्वरूपोपस्थापनम्, पूर्वपक्षव्याप्तिघटकपदानां प्रयोजनकथनम्, पूर्वपक्षव्याप्तेः त्यागवीजोद्भावनञ्च।

**'ग'प्रकरणम्**

सिद्धान्तव्याप्तेरावश्यकत्वप्रदर्शनम्, सिद्धान्तव्याप्तेः स्वरूपप्रदर्शनम्, सिद्धान्तव्याप्तेः लक्ष्ये समन्वयप्रदर्शनम्, मौलोक्तलक्षणे चालनीयन्यायेना-भावमादाय सद्धेतावव्याप्ति-प्रदर्शनम्, तद्वारणायावच्छेदकत्वानुसरण-बीजोद्भावनम्, तत्रापि विशिष्टसाध्यता-वच्छेदककस्थलेऽव्याप्तिकथनम्, तद्वारणोपायनिरूपणम्, हेत्वधिकरणपद-

प्रयोजनकथनम्, हेत्वधिकरण-मित्यस्यार्थकरणम्, लक्षणेऽत्र प्रतियोगिवैय्यधिकरण्य-पदप्रवेशप्रयोजनकथनम्, तस्यार्थनिर्वचनम्, स्थलविशेषे प्रतियोगिवैय्यधिकरण्या-प्रसिद्ध्या तत्र लक्षणे दोषमुद्भाव्य तद्वारणाय कृतस्य प्रतियोगिताधर्मिको-भयाभावघटितलक्षणस्य स्वरूपप्रदर्शनम्, तस्य लक्षणस्य लक्ष्ये समन्वयपूर्वकं तल्लक्षणघटक-पदप्रयोजनकथनञ्च।

**'घ'प्रकरणम्**

सैद्धान्तिकपक्षतास्वरूपप्रदर्शनम्, सिषाधयिषायाः पक्षतात्वखण्डनम्, साध्यसन्देहस्य पक्षतात्वखण्डनम्, सिषाधयिषाविरहविशिष्टस्य सिद्धिविशेषणस्य सार्थक्यप्रदर्शनम्, उत्तेजकीभूतायाः सिषाधयिषाया निर्धारणम्, सिद्धिविशेष-स्यानुमितिविशेषं प्रत्येव प्रतिबन्धकत्वव्यवस्थापनम्, दिनकरोद्भावित-मुपाध्यायानुमतं पक्षतालक्षणम्, स्वतन्त्रप्रतिबध्यप्रतिबन्धकभावनिरूपणम्, हेत्वाभासभेदकथनम्, हेत्वाभासनिरूपणे सङ्गतिप्रदर्शनम्, हेत्वाभासपद-व्युत्पत्तिप्रदर्शनम्, हेत्वाभाससामान्यलक्षणप्रदर्शनम्, तस्य लक्षणस्य लक्ष्ये समन्वयप्रदर्शनम्, हेत्वाभाससामान्यलक्षण-घटकतृतीयार्थनिश्चयनम्, दोषविषयक-विशिष्टज्ञानस्यानुमितिप्रतिबन्धकत्वे सत्प्रतिपक्षे कथं दुष्टत्वव्यवहार इति जिज्ञासायां तत्समाधानम्, हेत्वाभासलक्षण-घटकान्यपदप्रयोजनप्रदर्शनम्, तल्लक्षणघटकपदानामर्थनिर्धारणम्, सोदाहरणं प्रत्येकस्य हेत्वाभासस्य स्वरूपमुल्लिख्य हेत्वाभासविशेषेषु हेत्वाभासलक्षणसमन्वयप्रदर्शनम्, प्रतिबध्यप्रतिबन्धकभावव्यवस्थापनम्, प्रत्येकस्य हेत्वाभासस्य लक्षणोदाहरण-प्रदर्शनञ्च।

**'ङ'प्रकरणम्**

उपमानस्यातिरिक्तप्रमाणत्वव्यवस्थापनम्, उपमितेः स्वरूपनिरूपणम्, उपमानप्रमाणस्य स्वरूपनिरूपणम्, दिनकर्यनुसारेणोपमितेः करणव्यापार-योर्व्यवस्थापनम्, शाब्दबोधस्य करणव्यापारादीनां प्रतिपादनम्, शक्तेः स्वरूपनिरूपणम्, शक्तिग्राहकनिरूपणम्, शक्त्याश्रयविषये वैय्याकरणादीनां मतमुपस्थाप्य तत्खण्डनम्, जातिशक्तिवादिनामतमुपस्थाप्य तन्मतनिराकरणम्, सोदाहरणं शक्तपदानां चातुर्विध्यवर्णनम्, लक्षणानिरूपणम्, सोदाहरणं लक्षणाभेदनिरूपणम्, वाक्यलक्षणावादिनां मतोपस्थमपनं तन्मतनिरसनञ्च, आसत्ति-योग्यता—आकाङ्क्षा—तात्पर्यज्ञानादिशाब्दबोधनिमित्तकारणनिरूपणञ्च।

**५. शिक्षणविधयः शैक्षिकसामग्री च**

व्याख्यानप्रश्नोत्तरविश्लेषणनिगमनागमनप्रदर्शनशिक्षणाद्याः शिक्षणविधय एवात्रप्रयुज्यन्ते। यथासम्भवं शिक्षकैः क(वलं मार्गं निर्दिश्य स्वयमेवशिक्षणाय छात्राः प्रेरणीयाः। समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणांप्रयोगो विधेयः। अत्यावश्यक(दशाविशेषे दूरशिक्षणमपि अन्तर्जालादिमाध्यमेन कर्तुं शक्यते। तदर्थं सङ्गणकयन्त्राणि प्रयुज्यानि। तद्व्यवस्था सम्बद्धशिक्षकण विभागेन विद्यापीठेन वा विधेया। आवश्यकतानुसारेण प्रयोगात्मककक्षाया

व्यवस्था अपि कार्या। शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते। तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया।

## ५. मूल्याङ्कनविधिः

मूल्याङ्कनं द्विधा विभक्तमस्ति– आन्तरिकं (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थ्यादिकं विलोक्यसम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायां आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यं कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुंशक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशदङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति। प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेनप्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेपालसंस्कृतविश्व- विद्यालय-परीक्षानियन्त्रणकार्यालयेन अनुपातपद्धत्यासंयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकाराः निर्धारिताः सन्ति। साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तुपरिस्थितिवशाद् दशाविशेषे सापि परीक्षा अन्तर्वार्तादिनापि साधयितुं शक्यते । सतिसम्भवेविवेचनात्मकानां सङ्क्षिप्तोत्तरापेक्षिणां व्याख्यात्मकानां वस्तुगतानाञ्च प्रश्नानांकृते प्रकरणनिदर्शनं विधाय प्रश्ननिर्माणसारिण्याः परिकल्पना विधेया।

**वार्षिकप्रश्नपत्रनिर्माणसारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रष्टव्याः प्रश्नसङ्ख्याः | समाधेयाः प्रश्नसङ्ख्याः | अङ्काः | पूर्णाङ्काः |
|---|---|---|---|---|---|
| ख,ग,घ,ङ | विवेचनात्मकाः | ३ | २ | १२ | २४ |
| क,ख,ग, घ,ङ | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७ | ४२ |
| ख,ग,घ,ङ | व्याख्यात्मकाः | ४ | ३ | ८ | २४ |
| क,ख,ग, घ,ङ | वस्तुगताः | १० | १० | १ | १० |
| | योगः | २६ | २१ | | १०० |

## ७. पाठ्यग्रन्थसूची

क) **पाठ्यग्रन्थः—**

१.**न्यायसिद्धान्तमुक्तावल्या अनुमानखण्डतः शब्दखण्डपर्यन्तदिनकरी-व्याख्या**, दिनकरभट्टाचार्यः, संवत् २०४५ पञ्चमं संस्करणम्, चौखम्भा संस्कृत संस्थान वाराणसी ।

ख) **सहायकग्रन्थाः**

१.**न्यायसिद्धान्तमुक्तावली** किरणावलीव्याख्यासहिता, विश्वनाथ पञ्चानन भट्टाचार्यः, संवत् २०५२पञ्चमं संस्करणम्, चौखम्भा संस्कृत संस्थान वाराणसी

२.**तर्कसङ्ग्रहः,** दीपिकाकिरणावलीन्यायबोधिनीपदकृत्यटिप्पण्यादि –सहितः,अन्नंभट्टः, व्यासप्रकाशन  वाराणसी

३.**तर्कामृतम्,** नेपालीभाषानुवादविशेषटिप्पणीसहितम्, जगदीशभट्टाचार्यः, अनुवादकः जगत्प्रसाद उपाध्याय, संवत् २०६७, विष्णुप्रभा उपाध्याय काठमाडौं।

ग) **सन्दर्भग्रन्थाः**

१.**व्याप्तिपञ्चकम्**वामाचरणभट्टाचार्यकृतविवृतिव्याख्यासहितम्, मथुरानाथस्तर्कवागीशः, संवत्  २०४५, मास्टर खेलाडीलाल संकटाप्रसाद संस्कृत पुस्तकालय वाराणसी

२.**सद्धान्तलक्षणम्** वामाचरणभट्टाचार्यकृतविवृतिव्याख्यासहितम्, जगदीश भट्टाचार्यः, संवत्  २०४१ द्वितीयं संस्करणम्, वाणी विलास प्रकाशन राजघाट वाराणसी

३.**शब्दशक्तिप्रकाशिका,**जगदीश भट्टाचार्यः, संवत् २०५९ तृतीयसंस्करणम्, चौखम्भा संस्कृत  संस्थान वाराणसी

**४.व्याप्तिपञ्चकम्,** कशवशरण अर्याल, संवत् २०७७, नेपाल प्रज्ञाप्रतिष्ठान कमलादीकाठमाडौं

५. **न्यायदर्शनम्,** संस्कृतव्याख्यासहितम्, प्रा.पद्मप्रसाद भट्टराई, संवत्...., जनकशिक्षा सामग्री कन्द्र सानोठिमी भक्तपुर

# विषयः- साहित्यम्

पाठ्यांशनाम- **साहित्यशास्त्राध्ययनं काव्याध्ययनञ्च** पाठ्यांशसङ्केतः- सा. ३०१
स्तरः- शास्त्री पूर्णाङ्काः- १००
वर्षः- प्रथमः वार्षिकः पाठ्यभारः- १६०
पत्रम्– प्रथमम् साप्ताहिकः पाठ्यभारः
– ६

**१. पाठ्यांशपरिचयः**

साहित्यविषये शास्त्रिस्तरस्य सर्वेष्वपिवर्षेषु सर्वेष्वपि पत्रेषु लक्ष्यलक्षण-सम्बद्धानां श्रव्यदृश्यकाव्यानामलङ्कारशास्त्राणाञ्चाध्ययनाध्यापनं भवितुमर्हतीत्ये-तत्तु सुसिद्धमेव। साम्प्रतं यावत् परम्परितरूपेण ये ये विषयाः पाठ्यांशत्वेन स्थापितास्तत्र किञ्चित् परिमार्जनेन विषयव्यवस्थापनाय यतनीयमिति समग्रस्यापि शास्त्रिस्तरस्य स्तरीयतासम्पादनोद्देश्येन पाठ्यांशनिर्धारणं कर्तव्यमित्यत्र सावधानता वर्तते निर्व्यूढा। तदनुसृत्यैव प्रथमे खण्डे प्रथमे वर्षे प्रथमे च पत्रे साहित्यशास्त्रस्यकाव्यस्य चाध्ययनं छात्रैः कर्तव्यमिरित धिया लक्ष्यलक्षण-सम्बद्धसाहित्यद्वयसंवलितः साहित्यशास्त्रं काव्यञ्च, इति नामधेयः पाठ्यांशो निर्धारितोऽस्ति।

प्रकरणाष्टकयुते पाठ्यांशेऽस्मिन् खण्डद्वयं वर्तते- (क) साहित्य-शास्त्राध्ययनखण्डः (ख) काव्याध्ययनखण्डः। तत्रप्रथमे क-खण्डे साहित्य-शास्त्राध्ययनान्तर्गतत्वेन विश्वनाथविरचितस्य साहित्यदर्पणनामकग्रन्थस्य १-५ परिच्छेदेषु प्रतिपादिता विषयाः पाठ्यांशरूपेण निर्धारिताः सन्ति। ख-खण्डे काव्याध्ययनं निर्धारितमस्ति।

तत्र क-खण्डे क-प्रकरणे, काव्यप्रयोजनं पूर्ववर्तिशास्त्रकारनिरूपित-काव्यलक्षणपरीक्षणेन विश्वनाथाभिमतकाव्यलक्षणनिरूपणं वाक्यमहावाक्य-पदलक्षणवाच्यवाचकप्रकाराः सङ्केतग्रहभेदाश्चेति विषयाः सन्ति समाविष्टाः। ख-प्रकरणे, अभिधादिवृत्तित्रयस्य सलक्षणं सोदाहरणञ्च भेदनिरूपणं शाब्दीव्यञ्जनाया लक्षणोदाहरणप्रस्तुतिक्रमे नानार्थस्थलीयैकार्थतानियामकतत्त्वानां सोदाहरणं प्रकाशनं लक्षणामूलव्यञ्जनाप्रकाशनं वक्तृबोद्धव्यादीनामार्थीव्यञ्जनोद्भावकानां निरूपणं शब्दार्थयोस्त्रैविध्यप्रकाशनं तात्पर्याख्यवृत्तेश्च प्रदर्शनञ्चेति विषयाः सन्ति। ग-प्रकरणे,रसस्वरूपतदास्वादनप्रकारादिना साकं रसास्वादवैलक्ष्यण्यतदुद्बोध-हेतुतदलौकिकत्वसिद्धिसम्बद्धा विश्वनाथस्यावधारणा, रसस्वरूपविवेचनं रसा-स्वादनप्रकारः स्थायिभावसहितानां विभावादीनां विवेचनं नायकादिविमर्शश्चेति पाठ्यविषयाः सन्ति। घ-प्रकरणे, सस्वरूपं सोदाहरणसङ्गमनञ्च रसभेदविमर्शो भावरसाभासभावाभासादि- विवेचनञ्च निहितमस्ति। ङ-प्रकरणे, काव्यभेद-निरूपणमष्टादशविधध्वनिभेदविमर्शः सङ्करसंसृष्ट्यादिसहित-सकलध्वनिभेद-ज्ञानपुरस्सरं गुणीभूतव्यङ्ग्यावबोधश्च स्थापितो वर्तते। च-प्रकरणे, विश्वनाथप्रतिपादिताः सकलध्वनिभेदा यथासम्भवमुदाहरणानि सलक्षणं

गुणीभूतव्यङ्ग्यप्रकारा ध्वनिविरोधीनां मतानि निरस्य व्यञ्जनास्थापनं व्यञ्जनावृत्तेर्महत्त्वप्रकाशनञ्चेति ध्वनिसम्बद्धविषयाः समाविष्टा वर्तन्ते । एवञ्चात्र क-खण्डे काव्यस्वरूपप्रतिपादनतो ध्वनिप्रपञ्चप्रकाशनपर्यन्तं साहित्यदर्पणग्रन्थस्य १-५ परिच्छेदान्तर्गताविषया छात्रैरध्ययनीयाः । एतदर्थम् ८० अङ्काः सन्ति निर्धारिताः ।

ख-खण्डे, काव्याध्ययनाय महाकविकालिदासविरचितं मेघदूतनामकं खण्डकाव्यं ( सम्पूर्णं) पाठ्यांशत्वेन गृहीतं विद्यते । साहित्यशास्त्रनिरूपित-लक्षणानुसारेण खण्डकाव्यस्य स्वरूपबोधपूर्वकं मेघदूतखण्डकाव्यस्य समग्रतयाध्ययनमत्र छात्रैर्विधातव्यं भवति । अत्र छ-प्रकरणे, कालिदासपरिचयेन साकं तत्कृतिवैशिष्ट्यविमर्शः मेघदूतकाव्यव्याख्यानञ्च निर्धारितं विद्यते । ज-प्रकरणे, मेघदूतस्य विधागतस्वरूपविवेचनेन प्रकृतिचित्रणसूक्तितात्पर्य-प्रकाशनरसभावादिविवेचनसहितं मेघदूतकाव्यस्य समीक्षणम्, इति पाठ्यांशो निहितोऽस्ति । अत्र विशेषतया मेघदूतस्थपद्यानां सान्वयपर्यायकोशव्याकरणा-लङ्कारभावार्थादिबोधसहितं व्याख्यानं कर्तव्यम् । मेघदूताधारेण वियोगशृङ्गारस्य प्रकृतिचित्रणसौन्दर्यस्य प्रकृतेर्मानवीकरणस्य सूक्तिप्रयोगस्य लोकलोकान्तर-व्यवहारादेर्वर्णनस्याप्यनुसन्धानेन विवेचनञ्च पाठ्यांशान्तर्गतं विज्ञेयम् ।

**२. पाठ्यांशसामान्योद्देश्ये**

साहित्यशास्त्रीयतत्त्वविशेषाणां काव्यसम्बद्धसौन्दर्यस्य च बोधाय निर्धारितस्यास्य पाठ्यांशस्य सामान्योमुद्देश्ये निम्नानुसारिणी वर्तेते-

- साहित्यशास्त्रस्य विशिष्टाधाररूपेण गृहीतानां काव्यलक्षणवाक्यवृत्ति-रसतदवयवध्वनिगुणीभूत-व्यङ्ग्यानां सोदाहरणं स्वरूपविश्लेषणम् ।
- खण्डकाकाव्यस्वरूपनिरूपणपूर्वकं मेघदूतकाव्यस्य समष्टिगतसौन्दर्य-प्रकाशनम् ।

**३. प्रतिप्रकरणमुद्देश्यम्**

साहित्यशास्त्रकाव्याध्ययनात्मकस्यास्य पाठ्यांशस्याध्ययनेन छात्रा निम्नाङ्कितविषयावबोधाय समर्था भविष्यन्ति-

**क) खण्डे**

१. विश्वनाथप्रतिपादितकाव्यप्रयोजनावगमे तत्पूर्ववर्तिसाहित्यशास्त्रकारप्रतिपादितकाव्यस्वरूप-समालोचनपूर्वकं विश्वनाथकृतकाव्यस्वरूपनिरूपणे च,

२.काव्यरूपत्वेन गृहीतस्य वाक्यस्य स्वरूपविमर्शने वाच्यवाचकादिलक्षणज्ञाने सोदाहरणम-भिधादिशक्तित्रयस्वरूपावबोधे शाब्द्यार्थीव्यञ्जनयोः परिचयेन साकं लक्ष्यलक्षणसङ्गमने च,

३.रसस्वरूपविवेचने तदलौकितासाधनपुरस्सरं रससामग्रीणां विभावादीनां सस्वरूपं परिचयप्रस्तुतौ शृङ्गारहास्यादीनां रसभेदानां प्रत्येकं विभावादिपरिज्ञानेन

लक्ष्यलक्षणसमन्वयीकरणे रसादिनाम्ना गृहीतानां रस–भावतदाभासभावशान्त्यादीनां सोदाहरणं स्वरूपावगमने च,
४.ध्वनिस्वरूपावबोधेनाभिधालक्षणामूलान्तर्गततया निरूपितध्वनिभेदानां स्वरूपसाक्षात्कृति–पूर्वकमविवक्षितवाच्यविवक्षितान्यपरवाच्यध्वनिस्वरूपावगमे तदुत्तरवर्त्यष्टादशप्रकारक–ध्वनिभेदानां सस्वरूपं सोदाहरणञ्च लक्ष्यलक्षणसमन्वये च,
५.सस्वरूपमेकपञ्चाशद्विधध्वनिनिरूपणे ध्वनेरनन्तविधत्वज्ञाने गुणीभूतव्यङ्ग्यस्वरूपनिरूपणे यथाभेदं तेषां लक्ष्यलक्षणसङ्गमे च ,
६.विरोधिमतखण्डनपुरस्सरं व्यञ्जनाया अपरिहार्यत्वसिद्धौ ध्वन्यमानरसाद्यर्थावबोधनिमित्तभूताया व्यञ्जनाया विलक्षणतापरिज्ञाने रसस्त्वलङ्काररूपव्यङ्ग्यभेदानां बोधार्थमनुमानादीनामक्षम–त्वप्रकाशनेन व्यञ्जनायास्तत्प्रत्यायकतासाधने च।

**ख) खण्डे**

१.महाकवेः कालिदासस्य देशकालकृतिवैशिष्ट्यादिविशिष्टपरिचयप्रदाने मेघदूतखण्ड–काव्यस्थपद्यानां प्रसङ्गान्वयविग्रहपर्यायभावार्थादिप्रकाशनपुरस्सरं सम्यग् व्याख्याने,
२. खण्डकाव्यस्वरूपाधारेण मेघदूतखण्डकाव्यस्य समीक्षणे वैशिष्ट्यविवेचने मेघदूतकाव्यस्य रसभावादिसमीक्षणाङ्गत्वेन तद्वैशिष्ट्यंप्रतिपादने तत्र वर्णितविषयाधारेण प्रकृतिचित्रणतन्मानवीकरणवियोगशृङ्गारविषयतादिनिरूपणे शास्त्रलोकमर्यादाधर्मसंस्कृत्या–देर्व्युत्पत्तिप्रकाशने लोकलोकान्तरव्यवहारादिवर्णने कालिदासस्य पाटवप्रकाशने मेघदूतकाव्यस्य समष्टिगतसौन्दर्यविवेचने च।

**४. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च**

| प्रतिप्रकरणं विशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|
| **'क' प्रकरणम्** विश्वनाथाभिमतकाव्य–प्रयोजनकाव्यस्वरूपयो–र्निरूपणं तत्पूर्ववर्तिग्रन्थकारकाव्य लक्षणसमीक्षणं पदवाक्यमहावाक्यस्वरूप विमर्शनञ्च | विश्वनाथकृतं मङ्गलाचरणम्, काव्यप्रयोजनम्, मम्मटकृतकाव्य–लक्षणा–लोचनम्, अदुष्टगुणवतो वाक्यस्य काव्यत्वनिरासः, काव्य–स्वरूपसम्बद्ध–ध्वनिकारमतविमर्शः, सयुक्ति वस्तुमात्रव्यङ्ग्येऽपि काव्यव्यवहारप्रदर्शनम्, सरस–वाङ्मये काव्यत्वमिति सत्यापनार्थ–मग्निपुराणकारमतोपस्थापनम्, प्रबन्धरसेनैव तदन्तर्वर्तिनीरस–पद्यानामपि रसवत्त्वसाधनम्, विश्वनाथाभि–मतकाव्यस्वरूप–प्रस्तुतिः, काव्यात्मविषयकवामना– | ५ | १० |

| | | | |
|---|---|---|---|
| | नन्दवर्धनमतदूषणम्, विश्वनाथाभि-मतं काव्यलक्षणम्, सोदाहरणं रसशब्दग्राह्यविषयनिर्देशः, दोषसामान्यलक्षणम्, गुणस्वरूपम्, वाक्यस्वरूपम्, महावाक्यस्वरूपम्, पदविवेकः, वाचकादयः, वाच्यादयः, अर्थभेदाः, अर्थबोधसहायक-शक्तित्रयसङ्केतः, गुणद्रव्यादिषु सङ्केतग्रहनिश्चयश्च। | | |
| **'ख' प्रकरणम्**<br>सभेदमभिधादिशक्ति-त्रयनिरूपणं व्यङ्ग्यव्यञ्जकदिशार्थबोधे शब्दार्थसहकारिताया विमर्शः शब्दत्रैविध्यतात्पर्यवृत्तिनिरूपणञ्च | सोदाहरणमभिधालक्षणम्, सोदाहरणं लक्षणानिरूपणम्, लक्षणाप्रकारमध्ये उपादान-लक्षण-सारोपा-साध्यवसानिकालक्षणास्वरूपम्, शुद्धागौण्योर्भेद-बीजम्, गौणीसारोपाया लक्षणलक्षणायाश्चोदहरणक्रमे गौर्वाहिकाद्युदाहरणे-ष्वर्थबोधविषयकं विवेचनम्, गौण्या नामकरणे बीजम्, उपचारशब्दार्थः, शुद्धालक्षणायाः स्वरूपम्, प्रयोजनवत्या द्वैविध्यं पुनश्च धर्मिधर्मगतत्वेन पुनरपि तद्द्वैविध्य-निर्देशः, पदवाक्यगतत्वेन पुनरपि भेदनिरूपणम्, व्यञ्जनास्वरूपम्, लक्षणाश्रयत्वेनाभिधाश्रयत्वेन च लक्षणाया आर्थशाब्दभेदेन द्वैविध्यम्, नानार्थशब्दानामेकार्थनियामकतत्त्वानि संयोगादीनि, स्वरस्य नानार्थप्रति-पादकता, अभिधामूलशाब्दीव्यञ्जनाया लक्ष्यलक्षणसङ्गतिः, आर्थीव्यञ्जना-निरूपणक्रमे तदुद्बोधकानि वक्तृबोद्धव्यकाक्वादीनि, वाच्यार्थ-व्यञ्जना, लक्ष्यार्थव्यञ्जना, व्यङ्ग्यार्थ-व्यञ्जना, व्यङ्ग्यार्थप्रकाशने शब्दार्थ-योर्मिथः सहकारिता, शब्दानां वाचका-दित्रैविध्यम्, तात्पर्याख्यवृत्तिश्च। | १० | २० |

| | | | |
|---|---|---|---|
| **'ग' प्रकरणम्**<br>रसस्वरूपविवेचनं रसास्वादनप्रकारः स्थायिभावसहितानां विभावादीनां विवेचनं नायकादिविमर्शश्च | रसपरिचयः, रसस्वरूपम्, रसास्वादन-प्रकारः, रसस्य विलक्षणता, स्थायिभावसहितानां विभावादीनां रसरूपेण परिणतिः, रसस्य सर्वथा सुखात्मकत्वम्, साधारणीकणव्यापारः, रसस्यालौकिकत्वम्, विभावादयो रसोद्बोधकारणानि, प्रपाणकरसन्यायेन काव्यरसस्य चर्व्यमाणत्वम्, विभावादिष्वेकस्य द्वयोर्वा सद्भावे तत्त्वान्तरसमाक्षेपप्रकारः, रसस्यानु-कार्यानुकर्तृगतत्वनिरासेन सामाजिक-गतत्वप्रतिपादनम्, रसस्य कार्य-ज्ञाप्यत्वादिनिरासः, रसस्यालौकिकत्व-स्वप्रकाशानन्दमयत्वादि-साधनम्, विभावलक्षणम्, विभावभेदनिरूपणम्, आलम्बनविभावः, नायकलक्षणम्, नायकभेदाः, धीरोदात्त-धरोद्धत-धीरललित-धीरशान्तानां स्वरूपम्, तेषां प्रत्येकं दक्षिणादिभेदेन षोडशप्रकारता, ततोऽपि प्रत्येकमुदात्तादिभेदेन नायक-भेदविस्तारः, सात्त्विकनायकगुणाः, सलक्षणं सोदाहरणञ्च नायिकाभेद-प्रदर्शनम्, नायिकानामलङ्काराः, उद्दीपन-विभावाः, अनुभावाः, सात्त्विकभावाः, व्यभिचारिभावस्वरूपम्, सलक्षणं व्यभिचारिणां लक्ष्यसङ्गतिः, स्थायि-भावः, सस्वरूपं स्थायिभावप्रकाराः, विभावानुभावादीनां भावसंज्ञायां बीजञ्च। | १० | २५ |
| **'घ' प्रकरणम्**<br>सस्वरूपं सोदाहरणसङ्गमनञ्च रसभेदाभावरसाभासभावा भासादिविवेचनञ्च | रसभेदाः स्थायिभावाः शृङ्गारादिरस-भेदगणनम्, शृङ्गाररसस्वरूपम्, 'शून्यं वासगृहम्' इत्यादौ तत्सङ्गतिप्रदर्शनम्, शृङागारभेदनिरूपणम्, विप्रलम्भस्य पूर्वरागादिभेदेन प्रकारनिर्देशः, | १५ | २० |

| | | | |
|---|---|---|---|
| | पूर्वरागादीनां परिचयः, सम्भोगशृङ्गार-निरूपणम्,सोदाहरणं हास्यरसनिरूपणम्, करुणरसस्य लक्षणमुदाहरणञ्च, करुण-करुणविप्रलम्भयोर्भेदे बीजम्, सोदाहरणं रौद्ररसलक्षणम्, रौद्रस्य युद्धवीराद् भिन्नतायां बीजम्, सोदारहणं वीररसस्वरूपम्, वीररसभेदाः, भयानकरसलक्षणमुदाहरणञ्च, बीभत्सरसस्वरूपमुदाहरणञ्च, अद्भुतरसलक्षणमुदाहरणञ्च, मुनीन्द्रसम्मतं वत्सललरसलक्षण-मुदाहरणञ्च, सबीजं रसानां पारस्परिकविरोधनिरूपणम्, रसभावादीनां रसनादेव रसत्वमिति-प्रदर्शनम्, भावलक्षणमुदाहरणञ्च, सोदाहरणं भावभेदाः, रसाभासभावा-भासादीनां लक्षणोदाहरणानि तेषु लक्ष्यलक्षणसङ्गतिप्रकाशनञ्च । | | |
| **'ङ' प्रकरणम्**<br>काव्यभेदनिरूपणमष्टादश विधध्वनि-भेदविमर्शः सङ्करसंसृष्ट्यादिसहित-सकलध्वनिभेदविवेचनपुरस्सरं गुणीभूतव्यङ्ग्यनिरूपणम् | ध्वनिगुणीभूतव्यङ्ग्यनामधेयौ विश्वनाथप्रतिपादितकाव्यभेदौ, ध्वनि-काव्य-स्यापि लक्षणामूलाभिधामूलौ द्वौ भेदौ, लक्षणमूलस्याविवक्षितवाच्यस्य भेदौ, अर्थान्तरसङ्क्रमितवाच्यध्वनेः सोदाहरणं स्वरूपम्, सोदाहरणो-ऽत्यन्ततिरस्कृतवाच्य-ध्वनिः, 'भ्रम धार्मिक....' इत्यादौ व्यङ्ग्यार्थस्य विपरीतलक्षणावगम्यत्व-निराकरणम्, विवक्षितान्यपरवाच्यध्वनिभेदौ, असंलक्ष्यक्रमव्यङ्ग्यध्वनेः स्वरूपादि-विमर्शः, संलक्ष्यक्रमव्यङ्ग्यध्वनेः प्रकाराः, सभेदं शब्दशक्ति-मूलध्वनिविचारः, अर्थशक्तिमूलकध्वनेः सप्रकारकं सोदाहरणञ्च विवेचनम्, शब्दार्थोभयशक्तिमूलक- | २० | २५ |

| | | | |
|---|---|---|---|
| | ध्वनिस्तदुदाहरणञ्च। | | |
| **'च' प्रकरणम्**<br>व्यञ्जनावैशिष्ट्यावगमो विरोधिमतखण्डनपुरस्सरं व्यञ्जनाया अपरिहार्यतासिद्धिविवेचनं रसभावादिबोधायानुमाना दीनामक्षमत्वप्रकाशनेन व्यञ्जनायास्तत्प्रत्यायकत वविमर्शश्च | सकलध्वनिभेदनिरूपणक्रमेऽष्टादशविध -ध्वनिसमूहे शब्दार्थोभयशक्त्युद्-भवध्वनेः कथलं वाक्यगतत्वेनैको भेदः, तदतिरिक्तानां सप्तदशभेदानां पदवाक्य-गतत्वेन भेदनिर्देशनम्, तेषामुदाहरणानि, अर्थशक्त्युद्भवध्वनेः प्रबन्धगत-त्वनिर्देशः, असंलक्ष्यक्रम-व्यङ्ग्यध्वनेः पदपदांश(प्रकृतिप्रत्ययो सर्गनिपात) वर्णरचनाप्रबन्ध-गतत्वेन सोदाहरणं व्यञ्जकतानिरूपण्म्, साकल्येन ध्वनेरेकपञ्चाशद्भेदाः, सङ्करेण संसृष्ट्या शुद्धभेदानां योगेन च ध्वनेरिषुबाणाग्निसायक(५३५५)-सङ्ख्यात्वम्, तेषां मध्ये दिङ्मात्रमुदाहरणम्, गुणीभूतव्यङ्ग्य-स्वरूपम्, तद्भेदगणनया सलक्षणं क्रमश उदाहरणे सङ्गमनम्, व्यञ्जनावृत्तेरङ्गीकार्यत्वम्, व्यङ्ग्यार्थावबोधनेऽभिधातात्पर्य-वृत्त्योरक्षमताप्रकाशनम्, व्यङ्ग्यार्थस्य तात्पर्यवृत्तिग्राह्यत्वं साधयतो धनिकस्य मतदूषणम्, 'यत्परः शब्दः स शब्दार्थः' इति मतस्य निरसनम्, रसादेरवगमाय तात्पर्यशक्तेरक्षमत्व-प्रदर्शनम्, बोद्धृस्वरूपसङ्ख्यादिभेदाद् व्यङ्ग्यार्थस्य वाच्यार्थाद् भिन्नता-प्रकाशनम्, 'गङ्गायां घोषः' इत्यादौ प्रयोजनरूपव्यङ्ग्यस्य तीरादौ प्रत्यायने लक्षणाया अक्षमत्वप्रदर्शनम्, प्रधान-व्यङ्ग्यरूपाणां रसादीनां बोधनेऽनुमानादीनामसामर्थ्यद्योतनम्, व्यञ्जनाया उपसंहारश्चेति। | २० | ३० |

| | | | |
|---|---|---|---|
| **'छ' प्रकरणम्**<br>कालिदासपरिचायनम्, तत्कृतिवैशिष्ट्यविमर्शः, मेघदूतकाव्यव्याख्यानञ्च | महाकवेः कालिदासस्य परिचयः, सामान्येन कालिदासकृतीनां वैशिष्ट्यविवेचनम्, सम्पूर्णे मेघदूतकाव्ये (पूर्वमेघ-उत्तरमेघद्वये) विद्यमानानां पद्यानां प्रसङ्गान्वय-पर्याय-विग्रह-कोशालङ्कार-भावार्थादिप्रदर्शनपूर्वकं व्याख्यानञ्च। | १० | १५ |
| **'ज' प्रकरणम्**<br>मेघदूतस्य विधागतस्वरूपविवेचनेन प्रकृतिचित्रणसूक्तितात्पर्य प्रकाशनरस-भावादिविवेचनसहितं मेघदूतकाव्यस्य समीक्षणम् | खण्डकाव्यलक्षणानुसारेण मेघदूतस्य खण्डकाव्यत्वनिरूपणम्, काव्यकला-दृशा मेघदूतम्, मेघस्य दूतत्वस्थापने कालिदासस्य युक्तिः, मेघदूते प्रकृतेर्मानवीकरणम्, रसानुकूलपरिवेश-संयोजनम्, मेघदूते विप्रलम्भ-शृङ्गारस्य मनोभिराममभिव्यञ्जनम्, भावानां रसाभासाभावाभासादीनाञ्च समभिव्यञ्जनम्, स्त्रीपुरुषानुराग-वर्णनोत्कर्षः, रतिरागात्मकं मनोविज्ञानम्, लोकलोकान्तरव्यवहारस्य प्रयोगः, कालिदासीयं सूक्तिसंयोजनकौशलम्, सूक्तीनां तात्पर्यप्रकाशनञ्चेत्यादीना पक्षाणां निभालनेन समग्रमेघदूतकाव्यस्य समीक्षा। | १० | १५ |

## ५. शिक्षणविधयः शैक्षिकसामग्री च

प्रथमपत्रे निर्धारितः साहित्यशास्त्रकाव्याध्ययनरूपोऽयं पाठ्यांशः साहित्यशास्त्रस्य काव्यस्य बोधायावश्यमध्ययनीयैर्विषयैः समन्वितं सत् सलक्षणं काव्याध्ययनेन छात्राणां हृदये साहित्यशास्त्रकाव्यविषयाणां संस्कारोद्भावने सामर्थ्याधानोद्देश्येन समायोजितो वर्तते । अस्य समग्रस्य पाठ्यांशस्य शिक्षणक्रमेऽधिकाधिकरूपेण छात्राणां सहभागिता भवत्वित्यत्र सावधानता निर्वहणीया। तदर्थञ्च प्रथमं पाठ्यांशस्थविषयस्य पदपदार्थस्फोरणेन वस्तुतत्त्वबोधाय ते समर्थाः सम्पादनीयाः । पश्चाच्च सामूहिकविचार-विमर्शसंवादप्रश्नोत्तरशास्त्रार्थादिमाध्यमेन विषयबोधसौकर्यं सम्पाद्य सामूहिक-विमर्शनतोऽधिगतानां निष्कर्षादीनां समावेशेन प्रतिवेदनलेखनरूपेणावगतविषयस्य प्रस्तुत्यै छात्राः प्रेरणीयाः । पाठ्यग्रन्थसन्दर्भग्रन्थसहायकग्रन्थादीनामध्ययनेन शास्त्रार्थशैल्या परस्परं संवादप्रश्नोत्तरादिप्रक्रियया चाधिगतविषयाणां सरलया संस्कृतगिराभिव्यक्तावपि छात्राः कुशला

निर्मेयाः । शिक्षकैश्च प्रवचनपद्धतेर्न्यूनत्वेन परस्परं संवादाधिक्येनाध्यापनं विधेयम्, तथा सति शिक्षणं फलवद् भवतीतिविचारणीयम् ।

शिक्षणावसरे च निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मक- शिक्षणाद्याः शिक्षणविधयः प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरा अन्वेषणपरियोजनासम्बद्धाः प्राक्कल्पनादयश्च छात्रकन्द्रिता विधयःप्रयोक्तुं शक्यन्ते । यथासम्भवं छात्रैरधिकाधिकतया शिक्षणे सहभागितां प्रदर्श्य स्वयमेव स्वकीयजिज्ञासासमाधानार्थं यतनीयम्, शिक्षकैश्च यथावसरं तत्र मार्गं निर्दिश्य योजकस्य भूमिका निर्वहणीया। सम्प्रति कक्षागतपाठानुसारेण पूर्वमेव सङ्गणकयन्त्रे (कम्प्युटरनामधेयं ल्यापटप-इत्यपिकथयन्ति) श्रव्यात्मकं दृश्यात्मकं वा पाठसामग्री निर्माय तच्च यन्त्रं कक्षायां समानीय प्रोजेक्टरयन्त्रमाध्यमेन तत्तत्सामग्रीजातं प्रदर्श्य च स्वविषयाध्यापनं सम्यक् कर्तुं शक्यते । सति सम्भवे तदनुरूपेण सामग्रीः सम्पाद्य शिक्षकण विषयानुकूलानां समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । एतादृशप्रदर्शनमनु दृष्टानां श्रुतानां वा विषयाणां बोधाय काठिन्यं वर्तते न वेति विज्ञाय काठिन्यस्य विद्यमानतायां तन्निराकरणं शिक्षकण कर्तव्यम् । सामूहिकविमर्शाय पाठसम्बद्धा काचन समस्या देया, तदुपरि विमर्शनेन प्रतिवेदनप्रस्तुत्यै च छात्राः प्रोत्साहनीयाः, सहयोगिता चात्मना निर्वहणीया । कतिपयसामग्रीणां व्यवस्था सम्बद्धशिक्षकण विभागेन विद्यापीठेन वा ।विधेया । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्था अपि कार्या । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते । तदर्थं सङ्गणकयन्त्राणि प्रयुज्यन्ते । शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते । तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियता अवलम्बनीया।

**६. मूल्याङ्कनविधिः**

मूल्याङ्कनं द्विधाविभक्तमस्ति- आन्तरिकं (निर्माणात्मकं) बाह्यं (निर्णयात्मकं) च ।

१. आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति ।कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकण विभागसमन्वितकार्ययोजनायामान्तरिकमूल्याङ्कनं विधीयते । गृहकार्यं कक्षापरीक्षा, परियोजनाकार्यम्,इत्यादीन्यन्यानि साधनान्यपितन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशदङ्काः सन्ति निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते विश्वविद्यालयेन लेखनात्मिका बाह्यपरीक्षा सञ्चाल्यते । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काःशतमेव भवन्ति परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेसंविपरीक्षानियन्त्रण-कार्यालयेन, अनुपातपद्धत्या संयोजनं विधास्यते।

२. बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टा प्रश्नप्रकाराःनिर्धारिताः सन्ति । साधारणतया बाह्यपरीक्ष ।परीक्षाकन्द्रे छात्राणां भौतिकोपस्थितौ लेखात्मिकैव भवति परन्तु परिस्थितिवशात् परीक्षाकन्द्रगतत्वेन व्यवस्थापनस्य काठिन्ये समुपस्थिते सा परीक्षा,अन्तवार्तामाध्यमेनापि सञ्चालयितुं शक्यते ।

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माण–सारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसङ्ख्याः | | अङ्काः |
|---|---|---|---|---|
| क, ख, ग, | | प्रष्टव्याः | समाधेयाः | |
| घ, ङ. च, | विवेचनात्मकाः | ३ | २ | १२×२= २४ |
| छ, ज | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७×६= ४२ |
| | व्याख्यात्मकाः | ४ | ३ | ८×३=२४ |
| | वस्तुगताः | १० | १० | १×१०= १० |
| | | २६ | २१ | १०० |

**६. पाठ्यसूची**

**(क) पाठ्यग्रन्थौ**

१. कविराज, विश्वनाथरचितः. स *साहित्यदर्पणः* (१–५ परिच्छेदाः)।

२. कालिदास, . *मेघदूतम्* (सम्पूर्णम्).

**(ख) सहायकग्रन्थाः**


१. अग्रवाल, हंसराज. सन् २०११. *संस्कृतसाहित्येतिहासः*. वाराणसी : चौखम्बा सुरभारती प्रकाशन।

२.कविराज, विश्वनाथः, सन् १९७७, साहित्यदर्पणः, (विद्यावाचस्पति साहित्याचार्य शालिग्राम शास्त्रिविरचित विमला हिन्दी व्याख्यासहित)।

३.कालिदास, मेघदूतम् (मल्लीनाथकृत सञ्जीवनी टीकासहित)।

४. कालिदास, मेघदूतम् (शेषराज शर्मा रेग्मीकृत चन्द्रिकाव्याख्यासहित)।

५.कालिदास, मेघदूतम् (वल्लभदेवकृत पञ्जिका टीकासहित)।

६. मिश्र, रामचन्द्र, सन् १९९०, संस्कृतसाहित्येतिहासः, वाराणसीः चौखम्बा प्रकाशन।


**(ग) सन्दर्भग्रन्थः**


१.अधिकारी, टीकाराम.(प्रा.डा.).वि.सं.२०४०. *महाकविकालिदास*. ललितपुर, साझा प्रकाशन।

२. उपाध्याय, बलदेव. सन् १९६८. *संस्कृत साहित्यका इतिहास*. (अष्टम संस्करण). वाराणसी, चौखम्बाविद्याभवन।

३. उपाध्याय, बलदेव, सन् १९६९, संस्कृत शास्त्रों का इतिहास, वाराणसीः शारदा मन्दिर।

४. कीथ, ए.बी. सन् २०१६, संस्कृत साहित्यका इतिहास, वाराणसीः मोतीलाल बनारसीदास।

५.डे, सुशील कुमार, सन् १९८८, संस्कृत काव्यशास्त्रका इतिहास, पटनाः विहार हिन्दी ग्रन्थ अकादमी।

६.सहाय, राजवंश 'हीरा'. सन् २००७. *भारतीयकाव्यशास्त्र (संस्कृत) का इतिहास*. वाराणसी, चौखम्बाविद्याभवन।

७.सूर्यकान्त, (डा.). सन् १९९७. *संस्कृत वाङ्मयका आलोचनात्मकइतिहास*. पुनर्मुद्रित (प्रथम संस्करण). नई दिल्ली, ओरियन्ट लंग्मैन।

# विषयः– साहित्यम्

पाठ्यांशनाम– **नाटकाध्ययनं प्राकृतभाषाव्याकरणञ्च** पाठ्यांशसङ्केतः– सा. ३०२
स्तरः– शास्त्री पूर्णाङ्काः– १००
वर्षः– प्रथमः वार्षिकः पाठ्यभारः– १६० घण्ठाः
पत्रम्– द्वितीयम् साप्ताहिकः पाठ्यभारः– ६

## १. पाठ्यंशपरिचयः

अभिज्ञानशाकुन्तलनाटकस्य रत्नावलीनाटिकायाश्च सम्पूर्णो भागः प्राकृतव्याकरणस्य विशिष्टग्रन्थत्वेन परिचितस्य प्राकृतप्रकाशस्य निर्धारितभागश्च पाठ्यांशेऽस्मिन् समाविष्टो विद्यते । नाटकादयो रूपकभेदा नाटिकादय उपरूपकभेदाश्च दृश्यकाव्यत्वेन गृह्यन्ते । तत्र रूपक–भेदानां प्रतिनिधित्वेनाभि–ज्ञानशाकुन्तलनाटकमुपरूपकभेदानां प्रतिनिधित्वेन रत्नावलीनाटिकया च पाठ्यांशेऽस्मिन् स्थानं लब्धमस्ति । नाट्यसाहित्यपरम्परायां शास्त्रसम्मततया पदं लब्धवत्याः प्राकृतभाषायाश्चाध्ययनमावश्यकमिति धिया प्राकृतव्याकरणस्य च निश्चितोंऽशोऽस्य पाठ्यांशस्यास्याङ्कत्वेन निर्धारितो विद्यते ।

पाठ्यांशस्यास्य प्रमुखो विषयोऽभिज्ञानशाकुन्तलनाटकरत्नाचवली–नाटिकयोः स्रष्टृपरिचयादि–सम्बलितं नाट्यकलासमीक्षणानुसृतं रसभावालङ्का–ररीतिगुणध्वनिवक्रोक्त्–यौचित्यादिकाव्यसौन्दर्यभूत–तत्त्वनिरीक्षणानुस्यूतं गभीर–मध्ययनं प्राकृतभाषाव्युत्पत्तिप्राणं प्राकृतव्याकरणानुशीलनञ्च विद्यते ।

दृश्यकाव्यान्तर्गतरूपकोपरूपकविषयकस्य प्राच्यशास्त्रीयसिद्धान्तस्य पृष्ठभूमावभिज्ञान–शाकुन्तलनाटकस्य रत्नाकवलीनाटिकायाश्चाध्ययनं विधाय प्राच्यनाट्यकलाया आदर्शमूल्यस्यावबोधः, प्राकृतव्याकरणस्याध्ययनेन प्राकृतभाषाज्ञानपूर्वकं संस्कृतमूलानां भाषाणां भाषावैज्ञानिकाध्ययनार्थं प्रेरणाबीजोद्‌भावनञ्चैतस्य पाठ्यांशस्याधारभित्तिर्विद्यते ।

## २. पाठ्यांशसामान्योद्देश्यानि

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधोलिखितविषये प्रावीण्यमिष्यन्ति

- प्राच्यनाट्यपरम्परायाआदर्शबोधः ,
- प्राच्यनाट्यकाव्यानां परिशीलने क्षमतार्जनम् ।
- विविधपुस्तकालयस्थेषु संस्कृतनिधिभूतेषु नाटकनाटिकादिकरूपको परूकग्रन्थेषु विद्यमानानां प्राकृतभाषासम्बद्धानामंशानां व्युत्पादनार्थ–स्फोरणानुवादादिकर्मपूर्वकं सम्पादनकार्येषु सम्यग् योग्यतार्जनम् ।

- भारतीयोपमहाद्वीपस्यविविधक्षेत्रेषु विकसितानां नेपालीहिन्दीबङ्गाली–भोजपुरीमराठ्यादिकानां संस्कृतमूलानां भाषाणां विकासप्रक्रियासम्बद्धायाः प्राकृतभाषायाव्युत्पादनात् तत्तद्भाषाणां भाषाविज्ञानमूलकाध्ययनार्थं किञ्चिद् द्वारोद्घाटनम् ।

**३. पाठ्यांशस्यप्रकरणगतं विशिष्टोद्देश्यम्**

**क) क–ख प्रकरणगतं विशिष्टोद्देश्यम्**

अ. महाकविकालिदासस्य देशकालकृत्यादिनिरूपणपूर्वकं काव्यप्रवृत्तीनां विशेषतानाञ्च विवेचने कौशलार्जनम्,

आ. अभिज्ञानशाकुन्तलनाटकस्य कथावस्तुन उपजीव्यस्रोतोऽन्वेषणे उपजीव्येन तुलनात्मकाध्ययने च क्षमतार्जनम्,

इ. अभिज्ञानशाकुन्तलनाटकस्यनाट्यशास्त्रीयमान्यतामनुसृत्याङ्कनिर्धारणनान्दीविधानप्रस्तावना–विन्यासननामकरणार्थोपक्षेपकस्थापनभारत्यादिवृत्तिविधानादिनाट्यतत्त्वनिरूपणपूर्वकं नाट्यकलाविवेचने योग्यतोपार्जनम्,

ई. अभिज्ञानशाकुन्तलनाटकस्य गद्यपद्यानां सविशदं व्याख्यानेऽर्थापने तात्पर्यप्रकाशने च योग्यतार्जनम्,

उ. अभिज्ञानशाकुन्तलनाटकस्य प्रयुक्तानां छन्दसां शास्त्रीयमान्यतादृशाविवेचनसामर्थ्यार्जनम्,

ऊ. अभिज्ञानशाकुन्तलनाटकस्य रसभावालङ्काररीतिगुणध्वनिवक्रोक्त्यौचित्यादिसौन्दर्यतत्–परिशीलनपूर्वकं काव्यकायामूल्याङ्कने कौशलार्जनम्,

ऋ. अभिज्ञानशाकुन्तलनाटकस्य पञ्चसन्धिपञ्चार्थप्रकृतिपञ्चकार्यावस्थादिप्रबन्धतत्त्वानां परिशीलने विवेचने च योग्यतोपार्जनम्,

ए. अभिज्ञानशाकुन्तलनाटकस्य पात्राणां चरित्रचित्रणे कौशलार्जनम्,

ऐ. अभिज्ञानशाकुन्तलनाटक(प्रतिबिम्बितानां राजनीतिकसांस्कृतिकसामाजिकधार्मिकाध्यात्मिक–मूल्यानां विवेचने क्षमतार्जनम्,

ओ. अभिज्ञानशाकुन्तलनाटकस्य वैशिष्ट्यनिरूपणे योग्यतार्जनञ्च ।

**ख) ग–घ प्रकरणगतं विशिष्टोद्देश्यम्**

अ.महाकवेः श्रीहर्षदेवस्य देशकालकृत्यादिनिरूपणपूर्वकं परिचयोपस्थापने क्षमतार्जनम्,

आ. रत्नावलीनाटिकायाः कथावस्तुन उपजीव्यान्वेषणपूर्वकमुपजीव्येन सह तुलनात्मकाध्ययने कौशलार्जनम्,

इ. रत्नावलीनाटिकाया नाट्यशास्त्रीयमान्यतामनुसृत्याङ्कनिर्धारणनान्दीविधानप्रस्तावनविन्यास–नामकरणार्थोपक्षेपकस्थापनभारत्यादिवृत्तिविधानादिनाट्यतत्त्वनिरूपणपूर्वकं सङ्क्षेपेण नाट्यकलान्वेषणे योग्यतोपार्जनम्,

ई. रत्नावलीनाटिकाया गद्यभागस्य पद्यभागस्य च सविशदं व्याख्यानेऽर्थापने तात्पर्यप्रकाशने च कौशलार्जनम्,

उ. रत्नावलीनाटिकायां प्रयुक्तानां छन्दसां शास्त्रीयमान्यतादृशा विवेचनसामर्थ्यार्जनम्,

ऊ. रत्नावलीकाटिकाया रसभावालङ्काररीतिगुणध्वनिवक्रोक्त्यौचित्यादिसौन्दर्यतत्त्वपरिशीलन-पूर्वकं काव्यकलाया मूल्याङ्कने कौशलार्जनम्,
ऋ. रत्नावलीनाटिकायाः पात्राणां चरित्रचित्रणे कौशलार्जनम्,
ए. रत्नावलीनाटिकायां प्रतिबिम्बितानां राजनीतिकसांस्कृतिकसामाजिकधार्मिकाध्यात्मिक-मूल्यानां विवेचने क्षमतार्जनम्,
ऐ. रत्नावलीनाटिकाया वैशिष्ट्यनिरूपणे योग्यतार्जनञ्ज।

**ग) ङ- प्रकरणगतं विशिष्टेद्देश्यम्**

अ. प्राकृतव्याकरणस्य निर्धारितसूत्राणां सोदाहरणमर्थज्ञानम्,
आ. प्राकृतव्याकरणस्य निर्धारितसूत्रेषूदाहृतानां रूपाणां सिद्धिप्रत्रियाज्ञाने सामर्थार्जनञ्च।

**३. पाठ्यविषयसंयोजनम्**

| प्रकरणानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|
| क | अभिज्ञानशाकुन्तलनाटककर्तुर्महाकवेः कालिदासस्य देशकाल-कृत्यादिसम्बलितः परिचयः, कालिदासस्य नाट्यकलासमीक्षणम्, कालिदासप्रणीतनाट्यसाहित्यस्य वैशिष्ट्यम्, अभिज्ञानशाकुन्तलस्य कथावस्तु, उपजीव्यस्रोतसां विमर्शः, उपजीव्यकथायां नाटकीयकथायाञ्च साम्यवैषम्ये, अभिज्ञानशाकुन्तलस्य काव्यकलापरिज्ञानम्, अभिज्ञान-शाकुन्तलस्य नामकरणे बीजम्, अभिज्ञानशाकुन्तलनाटक( रसाणामङ्गाङ्-गिताविमर्शः, अभिज्ञान-शाकुन्तले काव्यतत्त्वाभि-व्यक्तिप्रकारः, अभिज्ञानशाकुन्तलस्य भाषा, अभिज्ञान-शाकुन्तलस्य संवादशैली, अभिज्ञानशाकुन्तलनाटकस्य पात्राणां चरित्रचित्रणम्, अभिज्ञान-शाकुन्तलनाटकस्य सन्ध्यार्थप्रकृतिकार्यावस्थादि-प्रबन्धतत्त्वान्वेषणं शास्त्र-सम्मतं तद्विवेचनञ्च, अभिज्ञानशाकुन्लनाटकर्ङ्क-निर्धारणनान्दीविधान-प्रस्तावनाविन्यासनार्थोपक्षेपकस्थापन-भारत्यादिवृत्तिविधानादिनाट्य-तत्त्व-निरूपणम्, अभिज्ञानशाकुन्तलनाटकस्य भाषा, नाटकस्य संवादशैली, अभिज्ञानशाकुन्तले प्रकृतिचित्रणम्, अभिज्ञान-शाकुन्तलेऽभिव्यक्तं काव्यसौन्दर्यम्, अभिज्ञानशाकुन्तले प्रतिबिम्बितान्याध्यात्मिकराजनीतिका-र्थिकसामाजिकसांस्कृतिक-धार्मिकनैतिकमूल्यानि च। | २६ | ४२ |
| ख | अभिज्ञानशाकुन्तलनाटकान्तर्गतानां गद्यानां पद्यानां सन्दर्भकोश विग्रहसमासरसभावगुणालङ्काररीतिदोषादिसमीक्षणपूर्वकं | २४ | ३८ |

| | | | |
|---|---|---|---|
| | व्याख्यानम्, अभिज्ञानशाकुन्तलान्तर्गतस्य गद्यभागस्य पद्यभागस्य चार्थोद्भावनम्, साराकर्षणं तात्पर्यविमर्शनञ्च | | |
| ग | रत्नाणवलीनाटिकाकर्तुः श्रीहर्षस्य देशकालकृत्यादिपुरस्सरं परिचयः, हर्षस्य नाट्यकलागतं वैशिष्ट्यम्, रत्नावलीनाटिकायाः कथावस्तु, रत्नालवलीनाटिकाया उपजीव्यान्वेषणम्, उपजीव्येन सह रत्नावलीनाटिकायास्तुलनात्मकसमीक्षणम्, रत्न्ावलीनाटिकायाः पात्र–विधानम्, रत्नामवलीनाटिकाया रसभावालङ्काररीतिगुण–ध्वनिवक्रोक्त्–यौचित्यादीनां सौन्दर्यतत्त्वानां विमर्शनम्, रत्नावलीनाटिकाया नामकरणबीजम्, रत्नांवलीनाटिकाया भाषा, रत्नाकवलीनाटिकायाः संवादशैली, रत्नावली ( नाटिकाया नाट्यकलासमीक्षणम्, रत्नावली–नाटिकायाः प्रकृतिचित्रणम्, रत्न्ावलीनाटिकायाः सांस्कृतिकं मूल्यम् । | १५ | २४ |
| घ | रत्नावलीनाटिकान्तर्गतानां गद्यानां पद्यानां सन्दर्भकोशविग्रहसमासरस–भावगुणालङ्काररीतिदोषादि–समीक्षणपूर्वकं व्याख्यानम्, विशिष्टानां गद्यभागानां पद्यभागाना चार्थोद्भावनम्, साराकर्षणं तात्पर्यविमर्शनञ्च । | १० | १६ |
| ङ | प्राकृतप्रकाशान्तर्गतानां निर्धारितसूत्राणां सोदाहरणमर्थप्रकाशनम्, निर्धारित–सूत्रेषूदाहृतानां रूपाणां सिद्धिप्रक्रियाज्ञानञ्च । ( प्राकृतप्रकाशान्तर्गातानिनिर्धारितसूत्राण्यधस्तात् प्रस्तुतानि सन्ति) | २५ | ४० |
| | योगः | १०० | १६० |

## प्राकृतप्रकाशस्य निर्धारितसूत्राणि ।

**प्रथमपरिच्छेदः**

१. आदेरतः २. आ समृद्ध्यादिषु वा ३. लोपोऽरण्ये ४. इदीषत्पक्वस्वप्नवेतसव्यजनमृदङ्गाङ्गारेषु ५. ए शय्यादिषु ६. मयूरमयूखयोर्‍्वा वा ७. चतुर्थीचतुर्दश्योस्तुना ८. अदातो यथादिषु वा ९. इत्सदादिषु १०. इत एत् पिण्डसमेषु ११. अत् पथिहरिद्रापृथिवीषु १२. इतेस्तः पदादेः १३. उदिक्षुवृश्चिकयोः १४. ओ च द्विधा कृञः १५. ईत् सिंहजिह्वयोश्च १६. इदीतः पानीयादिषु १७. एन्नीडापीडकीदृगीदृशेषु १८. उत ओत् तुण्डरूपेषु १९. उलूखले ल्वा वा २०. अन्मुकुटादिषु २१. एन्नूपुरे २२. ऋतोऽत् २३. इदृश्यादिषु २४. उदृत्वादिषु २५. ऋ रीति २६. वृक्षे वेन रुर्वा २७. एत इद्वेदनादेवरयोः २८. ऐत एत् २९. दैत्यादिष्वइ ३०. दैवे वा ३१. इत्सैन्धवे ३२. ईद् धैर्ये ३३. औत ओत् ३४. पौरादिष्वउ ३५. आ च गौरवे ३६. उत्सौन्दर्यादिषु

**द्वितीयपरिच्छेद**

१. अयुक्तस्यानादौ २. कगचजतदपयवां प्रायो लोपः ३. यमुनायां मस्य ४. स्फटिकनिकषचिकुरेषु कस्य हः ५. चन्द्रिकायां मः ६. ऋत्वादिषु तो दः ७. प्रतिसरवेतसपताकासु डः ८. गर्भिते णः ९. ऐरावते च १० सङ्ख्यायाञ्च ११. पो वः १२. छायायां हः १३. टो डः १४. सटाशकटकैटभेषु ढः १५. डस्य च १६. ठो ढः १७. फो भः १८. खघथभां हः १९. प्रथमशिथिलनषधेषु ढः २०. हरिद्रादीनां रो लः २१ आदेर्यो जः २२. यष्ट्यां लः २३. किराते चः २४. कुब्जे खः २५. दोलादण्डदशनेषु डः २६. षट्शावकसप्तपर्णानां छः २७. नो णः सर्वत्र २८. शषो सः २९. दशादिषु हः ३०. संज्ञायां वा ३१. दिवसे सस्य ।

**तृतीयः परिच्छेदः**

१. उपरि लोपः कगडतदपषसाम् २. अधो मनयाम् ३. सर्वत्र लवराम् ४. द्रे रो वा ५. सर्वज्ञतुल्येषु ञः ६. युक्तस्य ७. ष्टस्य ठः ८. अस्थनि ९. स्तस्य थः १०. स्तम्भे खः ११. र्यशय्याभिमन्युषु जः १२. तूर्यधैर्यसौन्दर्याश्चर्यपर्यन्तेषु रः १३. सूर्ये वा १४. चौर्यसमेषु रिअम् १५. स्य टः १६. गर्ते डः १७. त्यथ्यद्यां चछजाः १८. ध्यह्योर्झः १९. ष्कस्कक्षां खः २०. अक्ष्यादिषु च्छः २१. ष्पस्य फः २२. श्चत्सप्सां छः २३. आत्मनि पः २४. शेषादेशयोर्द्वित्वमनादौ २५. वर्गेषु युजः पूर्वः २६. नीडादिषु २७. आम्रताम्रयोर्वः २८. समासे वा २९. सेवादिषु च ३०. विप्रकर्षः ३१. क्लिष्टश्लिष्टरत्नःक्रियाशार्ङ्गेषु तत्स्वरवत्पूर्वस्य ३२. इः श्रीह्रीक्रीतक्लान्तक्लेशम्लानस्वप्नस्पर्शहर्षार्हगर्हेषु ३३. अः क्ष्माश्लाघयोः ३४. उः पद्मतन्वीसमेषु ३५. ज्यायामीत्

**चतुर्थः परिच्छेदः**

१. सन्धावचामज्लोपविशेषा बहुलम् २. भाजने जस्य ३. यावदादिषु वस्य ४. अन्त्यहलः ५. स्त्रियामात् ६. शरदो दः ७. दिक्प्रावृषोः सः ८. मो बिन्दु ९. वक्रादिषु १०. ययि तद्वर्गान्तः ११. नसान्तप्रावृट्शरदः पुंसि १२. तल्त्वयोर्दात्तणौ १३. त्त्व ऊणः १४. आल्विल्लोल्लालवन्तेन्ता मत'पः १५. विद्य'त्पीताभ्यां वा लः १६. महाराष्ट्रे हरोः १७. गृहे घरोऽपतौ १८. दाढादयो बह'लम्

**पञ्चमः परिच्छेदः**

१. अत ओत् सोः २. जश्शसोर्लोपः ३. अतोऽमः ४. टामोर्णः ५. भिसो हिं ६. भ्यसो हिन्तो स'न्तो

७. स्सो ङसः ८. टा णा ९. स'भिस्स'प्स' दीर्घः १०. सोर्बिन्द'र्नप'सक(११. पितृमातृजामातृणामरः १२. आत्मनोऽप्पाणो वा १३. इत्वद्वित्ववर्जं राजवदनादेशे १४. ब्रह्माद्या आत्मवत्

**षष्ठः परिच्छेदः**

१. सर्वादेर्जस एत्वम् २. किंयत्तद्भ्यो ङस आसः ३. किमः कः ४. पदस्य ५. य'ष्मदस्तै त'मं ६. द्विवचनस्य बहुवचनम्

**सप्तमः परिच्छेदः**

१. ततिपोरिदेतौ २. थास्सिपोः सि से ३. इड्मिपोर्मिः ४. यक ईअइज्जौ

**अष्टमः परिच्छेदः**

१. भ'वो हो ह'वो २. क्ते ह': ३. प्रादेर्भव ४. पदे पालः ५. कृञः कुणो वा ६.ष्ठाध्यागानां ठाअ–झाअ–गाआः ७.ठाझागाश्च वर्तमानभविष्य–द्विध्याद्येकवचनेष' ८. खादिधाव्योः खाधौ ९. य'धिब'ध्योर्झः १०. शद्लृपत्योर्डः ।

**नवमः परिच्छेदः**

१. निपाताः २. हुं दानपृच्छानिर्धारणेषु ३. ओ सूचनापश्चात्तापविकल्पेषु ४. इरकिरकिला अनिश्चिताख्याने ५. हुं क्खु निश्चयवितर्कसम्भावनेषु ६. किणो प्रश्ने ७. अब्बो दुःखसूचनासम्भावनेषु ८. रे–अरे–हिरे सम्भाषणरतिकलाक्षेपेषु ९. म्मिवमिवविआ इवार्थे १०. अञ्ज आमन्त्रणे

**दशमः परिच्छेदः**

१. पैशाची २. प्रकृतिः शौरसेनी ३. वर्गाणां तृतीयचतुर्थयोरयुजोरनाद्योराद्यौ ४. णो नः ५. ष्टस्य सटः ६. स्नस्य सनः ७. र्यस्य रिअः ८. ज्ञस्य ञ्जः ९. कन्यायां न्यस्य १०. ज्ज च्च ११. क्त्वस्तूनं १२. हृदयस्य हितअकं

**एकादशः परिच्छेदः**

१. मागधी २. प्रकृतिः शौरसेनी ३. षसोः शः ४. जो यः ५. चवर्गस्य स्पष्टता तथोच्चारणः ६. हृदयस्य हडक्कः ७. क्षस्य स्कः ८.शृगालस्य शिआलाशिआलकाः ।

**द्वादशः परिच्छेदः**

१.शौरसेनी २.प्रकृतिः संस्कृतम् ३.अनादावयुजोस्तथयोर्दधौ ४.इ गृ समेषु ५. स्त्रिययामित्थी ६. आश्चर्यस्याच्चरिअं ७. शेषं महाराष्ट्रीवत् ।

## ५. शिक्षणविधयः शैक्षिकसामग्री च

आगमन–निगमन–व्याख्या–प्रवचन–प्रश्नोत्तर–विमर्श–परियोजना–शास्त्रार्थ–प्रदर्शनादिका विधयो यथानुकूलं प्रयोक्तव्याः । शिक्षणविध्यनुकूलं पारम्परिका आधुनिकाश्च सामग्र्यः प्रयोक्तव्याः ।

## ६. मूल्याङ्कनविधिः

बाह्यमान्तरिकञ्चेति द्विविधयोर्मूल्याङ्कनविध्योर्मध्ये बाह्यं वार्षिक–परीक्षात्मकम्, आन्तरिकन्त्वध्ययनकालावच्छिन्नविद्यार्थिगतिविधिमूलम् । आन्तरिकमूल्याङ्कनमेतद् विद्यार्थिनो ह्युस्थतिकक्षाकार्यगृहकार्याध्ययन–प्रवृत्तिपरियोजनासम्पादनादिकं विलोक्य विधीयते । एतद्धि पञ्च–विंशत्यङ्गात्मकं भवति । वार्षिकपरीक्षाधृतं बाह्यमूल्याङ्कनं शताङ्कात्मकमेव भवति किन्तु

नियमितच्छात्राणाङ्कृते आन्तरिकमूल्याङ्कनं विधाय विद्यापीठेन प्रेषिता अङ्का परीक्षानियन्त्रण-कार्यालयेनानुपातपद्धत्या प्राप्ताङ्केषु समाविश्यन्ते ।

**वार्षिक-परीक्षा-प्रश्नपत्रनिर्माण-सारिणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसङ्ख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| क, ख, ग, घ, ङ. च, छ, ज | विवेचनात्मकाः | ३ | २ | १२×२= २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ७×६= ४२ |
| | व्याख्यात्मकाः | ४ | ३ | ८×३=२४ |
| | वस्तुगताः | १० | १० | १×१०= १० |
| | | २६ | २१ | १०० |

## ७. पाठ्यसूची

**क) पाठ्यग्रन्थाः**

१. कालिदासविरचितमभिज्ञानशाकुन्तलनाटकम् (सम्पूर्णम्)

२. श्रीहर्षदेवविरचिता *रत्नावलीनाटिका* (सम्पूर्णा)

३. वररुचिकृतः, *प्राकृतप्रकाशो* भामहकृतमनोरमा-व्याख्यासहितः-निर्धारित सूत्राणि).

**ख) सहायकग्रन्थाः**

१.*संस्कृत वाङ्मयका बृहद् इतिहास* (उत्तरप्रदेश-संस्कृत -संस्थानद्वारा प्रकाशितः) - नाट्य-विवेचनामूलकः षष्ठः खण्डः । ,

२.*संस्कृत साहित्य का इतिहास*- बलदेवोपाध्यायप्रणीतः ।

३.*संस्कृतसाहित्येतिहासः* -रामचन्द्रप्रणीतः

४.*संस्कृतसाहित्य का इतिहास*- ए.बी.कीथप्रणीतः ।

५.*महाकवि कालिदास* -टीकारामाधिकारीप्रणीतः ।

६.संस्कृत वाङ्मय संक्षिप्त अध्ययन, हंसपुरे, सुवदी, त्रि.वि.वि पाठ्यक्रम विकास कन्द्र, २०३७ ।

**ग) सन्दर्भग्रन्थः**

१. महाकविकालिदाससम्बन्धिनो देशकालकृत्यादिपर्यवेक्षणमूलका अभिज्ञान-शाकुन्तलसम्बन्धिनष्टीका व्याख्यानुवादाद्यध्ययनसामग्री-सम्बलिताश्च विविधा ग्रन्थाः ।

२.महाकविश्रीहर्षवेदसम्बन्धिनो देशकालकृत्यादिपर्यवेक्षणमूलका रत्नावली-नाटिकासम्बन्धिनष्टीकाव्याख्यानुवादाद्यध्ययन सामग्री-सम्बलिता विविधा ग्रन्थाः ।

# विषयः - इतिहासपुराणम्

पाठ्यांशनाम—**श्रीरामचरितवैशिष्ट्यं व्यासपाण्डवपरीक्षि दुपाख्यानम् इतिहासपुराणपरिचयश्च**

स्तरः— शास्त्री | पाठ्यांशसङ्केतः— इ.पु.३०१

खण्डः— प्रथमः | पूर्णाङ्काः— १००

पत्रम्— प्रथमम् | वार्षिकः पाठ्यभारः—१६० घण्टाः

साप्ताहिकः पाठ्यभारः— ६

**१. पाठ्यांशपरिचयः**

पञ्चभिः प्रकरणैर्युतोऽयं पाठ्यांशः । इतिहासपुराणग्रन्थेषु वर्णित-विषयाणामध्ययनं कृत्वा तेषु ग्रन्थेषु प्रयुक्तानां सामाजिक—राजनीतिक—साहित्यिक—सांस्कृतिकार्थिक—वैज्ञानिकपक्षाणां विश्लेषणसमर्थाया जनशक्ते-रुत्पादनञ्चास्य पाठ्यांशस्य मूलभूतं प्रयोजनम् । तथा चात्र -

**"क"**प्रकरणे श्रीरामचरितामृतमित्याख्यस्य काव्यस्य समग्राध्ययनं विधाय रामायणकथायास्तथा तत्र प्रयुज्यमानस्य साहित्यिकपक्षस्य च विश्लेषणं विवेचनञ्च विधीयते । अनेन पौराणिकग्रन्थेषु न कवलं धार्मिकं तथ्यमपि तु सामाजिकं राजनीतिकं साहित्यिकं सांस्कृतिकमार्थिकं वैज्ञानिकञ्च तत्त्वं प्रकाश्यत इति पाठ्यांशोऽयं संस्कृतानुरागिणां कृतेऽत्यन्तमुपकारको भवति।

**"ख"**प्रकरणे श्रीमद्भागवतवर्णितभगवत्कथात आरभ्य भक्तिमाहात्म्यस्य भगवतोऽवताराणां देवर्षिनारदपूर्वचरित्रपर्यन्तभागस्थविषयस्य विवेचनं व्याख्यानं च विधीयते।

**"ग"**प्रकरणे श्रीमद्भागवतानुसारेण महाभारतयुद्धस्यान्ते अश्वत्थाम्ना द्रौपदीपुत्राणां हननमितिप्रसङ्गादारभ्य श्रीकृष्णस्य द्वारकागमनपर्यन्तो भागः पाठ्यते यत्र महाभारतयुद्धस्य दुष्परिणामादिविषयस्य राजधर्मभगवद्भक्ति-महत्त्वादिविषयस्य च परिचयं दत्त्वा विश्लेषणात्मकं वर्णनात्मकं व्याख्यात्मकञ्च शिक्षणं विधीयते ।

**"घ"**प्रकरणे श्रीमद्भागवतानुसारेण परीक्षिज्जन्मतः समारभ्य शृङ्गिशापशप्तस्य परीक्षितः शुकदेवेन समागमपर्यन्तस्य प्रसङ्गस्य व्याख्यानं विश्लेषणञ्च विधीयते।

**"ङ"**प्रकरणे इतिहासपुराणविषयस्य परिचयः, इतिहासस्य पुराणस्य च सामान्यपरिचयः, अनयोः पार्थक्यं साम्यं तुलनात्मिका समीक्षा चेति विषया निर्धारिताःसन्ति । अस्मिन् प्रकरणे इतिहासपुराण—सम्बद्ध—सामान्य-परिचयात्मिका शिक्षा दीयते।

**२.पाठ्यांशस्य सामान्योद्देश्यानि**

अस्य पाठ्यांशस्याध्ययनेनच छात्रा निम्नाङ्कितविषयेषु कुशलतामाप्नुवन्ति—

- पौराणिकग्रन्थेषु काव्यात्मकगुणविश्लेषणे।
- पुराणवर्णितविषयाणां महत्त्वप्रतिपादने।

- पौराणिकग्रन्थसम्बद्धपात्राणां चरित्रप्रकाशने।
- विशिष्टपद्यानां प्रौढरूपेण व्याख्याने
- इतिहासपुराणविषयस्य विवेचने व्युत्पत्तौ च।

**३.पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च**

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | दधिराममरासिनीनामक कवेः काव्यप्रवृत्तिविश्लेषणम् तदीयकृतिगतवैशिष्ट्यनिरूपणञ्च | दधिराममरासिनीकवेः परिचय पूर्वकं सप्तसु सर्गेषु विभक्तस्य श्रीरामचरितामृतम् इत्यस्य काव्यस्यान्तर्निहितविषयाणामध्ययनम् | २५ | ४४ |
| ख | श्रीमद्भागवतवर्णितसूत शौनकादीनां प्रश्नोत्तरप्रसङ्गादारभ्य नारदपूर्वचरितपर्यन्तविषयाणां व्याख्यानं विश्लेषणञ्च | श्रीमद्भागवतस्यादितः नारदपूर्वचरितपर्यन्तभागः ( प्रथमस्कन्धस्य १–६अध्यायाः) | १५ | २० |
| ग | द्रौणिनिग्रहतः श्रीकृष्णद्वारकाप्रवेशपर्यन्तविषयविवेचनम् | अश्वत्थाम्नो निग्रहतः श्रीकृष्ण–द्वारकाप्रवेशपयन्ता विषयाः ( प्रथमस्कन्धस्य७–११ अध्यायाः) | २५ | ४४ |
| घ | परिक्षिज्जन्मादि शुकागमनान्तविषयविवेचनम् | परिक्षिज्जन्मादि, शुकागमनान्तो भागः (प्रथमस्कन्धस्य १२–१९ अध्यायाः) | २० | ३२ |
| ङ | इतिहासपुराणसम्बद्धानां विविधविषयाणां बोधनं व्याख्यानं विश्लेषणञ्च | इतिहासपुराणसम्बद्धा विषयाः। | १५ | २० |

## ४. पाठ्यवस्तुविवरणम्

**'क'प्रकरणे**

सप्तसु सर्गेषु विभक्तस्य श्रीरामचरितामृतम् इत्यस्य काव्यस्यान्तर्निहितविषयाणामध्ययनम् । राम–लक्ष्मणादीनां जन्मप्रसङ्गा–दारभ्य बाललीला, विश्वामित्राद् विद्याप्राप्तिः, सीतास्वयंवरोत्सवः, नगरवधूभिः निगदिता वाचः, रामजानकीविवाहोत्सवः, अयोध्या–प्रत्यावर्तनम्, रामराज्याभिषेकोपक्रमः, कैकयीकौटिल्यम्, रामवनगमनम्, गुहसम्मेलनम्, ग्रामवधूभिः निगदिता वाचः, गङ्गावतरणम्, चित्रकूटगमनम्, सुमन्त्रस्यायोध्याप्रत्यावर्तनम्, दशरथदेहत्यागः, भरतस्यायोध्यागमनम्, भरतवनगमनम्, रामपादुकाग्रहणपूर्वकम् अयोध्यां प्रति प्रत्यावर्तनम्, विराधवधप्रसङ्गः, प्रकृतिचित्रणम्, सीताहरणम्, जटायुमृत्युः, सीतान्वेषणम्, जटायोरौर्ध्वदेहिकसंस्कारः, पम्पागमनम्, हनुमत्प्रेषणम्, रामसुग्रीवयोः मेलनम्, बालिवधः, सीतान्वेषणाय कपिप्रेषणम्, सम्पातिसम्भाषणम्, हनुमता समुद्रलङ्घनम्, सीतासम्भाषणम्, लङ्कादहनम्, हनुमतः प्रत्यागमनम्, कपिबलयुतस्य श्रीरामस्य लङ्कायात्रा, विभीषणशरणागतिः, सेतुबन्धनम्, रामरावणयोर्युद्धम्, लङ्काविजयः, रामस्य पुष्पकरायोध्याप्रत्यावर्तनम्, भरतमेलनम्, रामेण राज्यभारग्रहणम्, श्रीरामस्य गुणगौरववर्णनञ्च । श्रीरामचरितामृतमिति–काव्यस्य संस्कृतसाहित्येतिहासे स्थानम्, तत्र काव्यसौष्ठवसमीक्षणम् काव्ये प्रयुक्तानाम् अलङ्काररीतिरसगुणच्छन्दसां व्याकरणसूक्ति–गतवैशिष्ट्यानाञ्च सम्यग्व्याख्यानम्, तुलनात्मकसमीक्षणञ्च ।

**'ख'प्रकरणे**

अष्टादशपुराणेषु श्रीमद्भागवतस्य महत्त्वम्, भगवद्भक्तिमहत्त्वम्, भगवतः अवताराणां परिचयः,सकलपुराणशास्त्रविरचने कृतेऽपि व्यासस्यासन्तोष–स्योत्पत्तिः इतिविषयकं रहस्यम्, भगवतः कीर्तनस्य महत्त्वम्, नारदपूर्वजन्मचरितञ्च ।

**'ग'प्रकरणे**

अश्वत्थाम्ना कृतं कर्म, अर्जुनद्वारा तस्य मानमर्दनम्, अश्वत्थाम्ना प्रक्षिप्तब्रह्मास्त्राद् भगवता श्रीकृष्णेनोत्तराया गर्भस्य रक्षा, कुन्तीकृता भगवत्स्तुतिः, युधिष्ठिरस्य शोकः, युधिष्ठिरादीनां भीष्मसमीपगमनम्, भीष्मकृता भगवतः श्रीकृष्णस्य स्तुतिः, भीष्मपरमगतिः, श्रीकृष्णस्य द्वारकाप्रत्यागमनम्, तत्र कृतं राजकीयं स्वागतम् इत्यादिविषयाः । मानवजीवनस्य मानवानां कर्तव्याकर्तव्यादिविषयाणां शिक्षणम् । मानवीयादर्शमयजीवननिर्माणे सहयोगिनो विषयस्य विश्लेषणम् । तत्र विविधेषु स्थानेषु विद्यमानानां विशिष्टपद्यानां व्याख्यानं तथा तत्रस्थितानां पात्राणां चरित्रसमीक्षणं तुलनात्मकसमीक्षणञ्च ।

**'घ'प्रकरणे**

परीक्षिज्जन्मप्रसङ्गः, विदुरधृतराष्ट्रसंवादमाध्यमेन प्रतिपादितवचनानुसारेण द्वापरान्ते समनुप्राप्तस्य भयावहकालस्य ज्ञानं, जीवनस्यान्तिमे क्षणे किं कर्तव्यमित्यादिविषयस्य

व्याख्यानम्, विविधोत्पातादीनां स्थितिः, कालस्य वैपरीत्यम्, दुराचारस्याभ्युदयः, यदुकुलविनाशः, कृष्णवियुक्तानां पाण्डवानां व्यथा, पौत्राय परीक्षिते राज्यभारं दत्त्वा पाण्डवानां स्वर्गाभिगमनम्, राज्ञः परीक्षितो दिग्विजयः, धर्मपृथ्वीसंवादः, कलिं प्रति परीक्षितो दमनीतिः, सुवर्णस्य दोषः, सुवर्णदोषात् परीक्षितो विपरीतबुद्धिः, शृङ्गिशप्तस्य परीक्षितोऽनशनव्रतम्, मुक्तिमार्गप्रदर्शनाय शुकदेवस्यागमनम् इत्यादयो विषयाश्च।

**'ङ'प्रकरणे**

इतिहासशब्दस्य पुराणशब्दस्य च व्युत्पत्तिः, पुराणलक्षणम्, इतिहासपुराणयोः पार्थक्यम्, पुराणानां प्रादुर्भावः, पुराणश्रवणपरम्परा, पुराणानां वक्तारः श्रोतारश्च, महापुराणानि, उपपुराणानि, औपपुराणानि, पुराणानां सङ्ख्या, पुराणानां सात्त्विकराजसतामसादिभेदाः, पुराणानां लक्षणसमन्वयः, पुराणानां क्रमविज्ञानम्, पुराणानां वेदमूलकत्वम्, पुराणानां परस्परं विरोधाभासः तत्समाधानञ्च, पुराणानां स्थानं महत्त्वञ्चेत्यादिविषयाः।

## ५.शिक्षणविधिः

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधयः प्रयुज्यन्ते । यथासम्भवं शिक्षकैरन्वेषणपरियोजनादयः प्राक्कल्पनादयश्च प्रयोक्तुं शक्यन्ते । एवमेव छात्रकेन्द्रितो विधिस्तथा शिक्षककेन्द्रितो विधिरपि प्रयोक्तुं शक्यते। यथासम्भवं शिक्षकाः केवलं छात्रान् मार्गनिर्देशनं विधाय स्वयमेव अध्ययनं कर्तुं प्रेरयितुं शक्नुवन्ति । इतिहासविषयशिक्षणे विविधैतिहासिकवस्तूनां (यथा शिलालेख–ताम्रपत्र–स्वर्णपत्र–रजतपत्रादीनां) दृश्यसामग्रीणां प्रत्यक्षीकरणं कारयित्वा पाठयितुं शक्यते। अस्मिन् कार्ये स्थलगतभ्रमणस्य व्यवस्था विद्यापीठेन कर्तव्या भवति। एवमेव पुराणविषयशिक्षणक्रमे ग्रन्थचित्रादीनां प्रदर्शनमप्युपयोगि भवति।

शैक्षिकसामग्रीविषये अध्यापनार्थमाश्यकानि उपकरणानि यथा श्वेतपट्टिका, लेखन्यादीन्युपकरणानि आवश्यकानि भवन्ति । तथैव वर्तमानसन्दर्भे दूरशिक्षणप्रणाल्यामवलम्बितायां तु सङ्गणकयन्त्रं चावश्यकं भवति । एतेषामुपकरणानां व्यवस्था विद्यापीठेन विश्वविद्यालयेन वा कर्तव्या।

## ६.मूल्याङ्कनविधिः

मूल्याङ्कनमान्तरिकं बाह्यञ्चेति द्विविधं भवति । आन्तरिकं निर्माणात्मकं बाह्यञ्च निर्णयात्मकम्। आन्तरिकं मूल्याङ्कनं कक्षायां पठनो–पस्थित्यादिक्रियावलोकनं कृत्वा क्रियमाणं सत् कक्षागतं भवति। विभागसमन्वितां कार्ययोजनामवलम्ब्य सम्बद्धशिक्षकेणान्तरिकं मूल्याङ्कनं सम्पाद्यते । एवमेव गृहकार्यम्, कक्षापरीक्षा, स्थलगतान्वेषणादिकार्यम् इत्याद्याधारेणान्तरिकमूल्याङ्कनं कर्तुं शक्यते। आन्तरिकमूल्याङ्कनस्य कृते प्रतिशतं विंशतिरङ्का निर्धारिताः सन्ति।

बाह्यमूल्याङ्कनं तु शैक्षिकवर्षस्यान्ते भवति । बाह्यमूल्याङ्कनस्य कृते शतं पूर्णाङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनपरीक्षा विश्वविद्यालयेन निर्धारिते परीक्षाकेन्द्रे भवति ।

परीक्षोत्तरपुस्तिकापरीक्षणं सम्बद्धविषयशिक्षकैः सम्पाद्यते । नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषिता–नामान्तरिकमूल्याङ्कनस्याङ्कानां ने.सं.वि.परीक्षानियन्त्रणकार्यालयेन अनुपात–पद्धत्त्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनार्थमङ्कवितरणेन सह अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति । परं परिस्थितिवशाद् यदा कदाचिदन्तर्वार्तादिनापि सा परीक्षा भवितुं शक्नोति ।

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माण–सारणी**

| प्रकरणानि क,ख,ग,घ,ङ | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २ × १२ = २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६ ×७ = ४२ |
| | व्याख्यात्मकाः | ४ | ३ | ३ × ८ = २४ |
| | वस्तुगताः | १० | १० | १० ×१ = १० |
| | | २६ | २१ | १०० |

**७ .पाठ्यसूची –**

**क) पाठ्यग्रन्था**

१. मरासिनी दधिरामः, *श्रीरामचरितामृतम्,* सम्पूर्णम् ।

२. बादरायणःव्यासः, ***श्रीमद्भागवतम्,*** प्रथमस्कन्धः सम्पूर्णः ।

३. माधवाचार्यः, ***पुराणदिग्दर्शन,***दिल्ली, माधव विद्याभवन ।

**ख).सहायकग्रन्थाः**

१.त्रिपाठी कृष्णमणिः, *अष्टादशपुराणपरिचयः* ।

२.आचार्य उपाध्याय बलदेव, ***पुराण – विमर्श*** **।**

३. पन्थी टीकारामः, ***काव्यचतुष्टयविमर्शः*** ।

**ग)सन्दर्भपुस्तकानि**

१.उपाध्यायः जनार्दनः, *श्रीरामचरितामृतम् काव्यस्य विश्लेषणात्मकमध्ययनम्,* आचार्य स्तरीयं शोधपत्रम् ।

२.कौण्डिन्न्यायन आमोदवर्धन इत्यादि, वैदिकहिन्दुधर्मसंस्कृते ।

३.मिश्र ज्वालाप्रसाद, अष्टादशपराण दर्पण, डिल्ली ।

# विषयः – इतिहासपुराणम्

पाठ्यांशनाम–**ज्ञानकर्मादियोगः साहित्यसिद्धान्तः, समन्तपञ्चकक्षेत्रादि च**

पाठ्यांशसङ्केतः– इ.पु.३०२

स्तरः– शास्त्री | वार्षिकः पाठ्यभारः–१६० घण्टाः

खण्डः– प्रथमः | पूर्णाङ्काः– १००

पत्रम्– द्वितीयम् | साप्ताहिकः पाठ्यभारः– ६

**१. पाठ्यांशपरिचयः**

पञ्चसु प्रकरणेषु विभक्तोऽयं पाठ्यांशः । शास्त्रिकक्षायामितिहास पुराणविषय-मवलम्ब्य ये पठितुमिच्छन्ति, तेषां छात्राणां कृतेऽयं पाठ्यांशो निर्धारितोऽस्ति।

अस्मिन् पाठ्यक्रमे **क–खप्रकरणयोः** श्रीमद्भगवद्गीतायाः प्रथमाध्यायाद् दशमाध्यायपर्यन्ता विषया (१–१० अ.) एकादशाध्यायाद् अष्टादशाध्यायपर्यन्ता (११–१८अ.) विषयाः पाठ्यांशत्वेन निर्धारिताः सन्ति । अत्र **ग–प्रकरणे** अग्निपुराणस्य सप्तत्रिंशोत्तरत्रिशततमाध्यायादारभ्य सप्तचत्वारिंशोत्तर–त्रिशततमाध्यायपर्यन्ताः (३३७–३४७अ.) साहित्यसिद्धान्त–सम्बद्धा विषया निर्धारिता सन्ति।

अत्र **घ–ङप्रकरणयोः** महाभारतस्यादिपर्वणि प्रथमाध्यायाद्दशमाध्याय–पर्यन्ता (१–१०अ.) एकादशाध्यायादेकोनविंशत्यध्यायपर्यन्ताः (११–१९अ.) विषयाश्च पाठ्यांशत्वेन निर्धारिताः सन्ति।

**२.पाठ्यांशस्य सामान्योद्देश्यानि**

एतेषां पाठ्यांशानामध्ययनेनच्छात्रा अधोनिर्दिष्टोद्देश्यपूर्तये समर्था भविष्यन्ति :

- भगवद्गीताया वैशिष्ट्यस्य प्रकाशने
- भगवद्गीतायाः ज्ञानकर्मादियोगमोक्षसन्न्यासयोगविषयाणां विश्लेषणे
- पौराणिकग्रन्थे सङ्गृहीतस्य साहित्यसिद्धान्तस्य विवेचने
- महाभारतस्य निधारितांशेषु वर्णितविषयाणां निरूपणे।
- विशिष्टपद्यानां प्रौढरूपेण व्याख्याने च।

**३.पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनं च**

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | पाठघण्टाः |
|---|---|---|---|---|
| क | महाभारतकथासन्दर्भे भगवद्गीतायाः प्रासङ्गिकताया बोधनम्, महाभारतयुद्धभूमौ | महाभारतयुद्धभूमौ द्रोणाचार्यं प्रति दुर्योधनस्य कथनादारभ्य भगवद्विभूतिवर्णन–पर्यन्ता | २५ | ४४ |

| | | | | |
|---|---|---|---|---|
| | द्रोणाचार्यं प्रति दुर्योधनकथनादारभ्य भगवद्विभूतिवर्णन-पर्यन्तानां विषयाणां व्याख्यानञ्च | विषयाः (श्रीमद्भगवद्गीतायाः १-१० अ.) | | |
| ख | श्रीमद्भगवद्गीतायां वर्णितानां विश्वरूपदर्शनादारभ्य भक्तियोग-मोक्षसंन्यासयोग-पर्यन्तानां विषयाणां प्रतिपादनम् व्याख्यानञ्च। | विश्वरूपदर्शनाद् मोक्षसंन्यासपर्यन्ता विषयाः (श्रीमद्भगवद्गीतायाः११-१८ अ.) | १५ | २० |
| ग | अग्निपुराणे वर्णितात् काव्यलक्षणादारभ्य नाटकलक्षणम्, रीतिनिरूपणम्, नृत्याभिनयाद्यलंकारादि-काव्यदोषपर्यन्तानां विषयाणां व्याख्यानं प्रतिपादनञ्च | अग्निपुराणस्य काव्यलक्षणम्, नाटकलक्षणम्, रीतिनिरूपणम्, नृत्याभिनया लङ्कारादिकाव्यदोषनिरूपणम् इति विषयाः (अग्निपुराणस्य ३३७-३४७ अ.) | २० | ३२ |
| घ | महाभारतस्यादिपर्वणि सौतिना ऋषीन् प्रति वर्णिताद् वृत्तान्ताद् आरभ्य रुरुडुण्डुभसंवाद-पर्यन्तानां विषयाणां विवेचनम् | महाभारतस्यादिपर्वणि सौतिना ऋषीन् प्रति वर्णिताद् वृत्तान्ताद् आरभ्य रुरुडुण्डुभसंवादपर्यन्ता विषयाः (१-१०अ.) | २५ | ४४ |
| ङ | महाभारते लोमहर्षणपुत्रेण सौतिना ऋषीन् प्रति वर्णिताद् वृत्तान्तादारभ्य समुद्रमन्थनवर्णन-पर्यन्तानां विषयाणां ॅ व्याख्यानं प्रतिपादनञ्च | डुण्डुभस्य आत्मकथात आरभ्य समुद्रमन्थनवर्णनपर्यन्ता विषयाः (११-१९अ.) | १५ | २० |

## ४. पाठ्यवस्तुविवरणम्

**'क'प्रकरणे**

सञ्जयं प्रति धृतराष्ट्रप्रश्नाः, युद्धभूमौ दुर्योधनेन द्रोणाचार्यं प्रति यत्कथितं तस्य वर्णनम्, पाण्डवकौरवसैनिकानां युद्धाय सज्जीभवनस्य समीक्षणात्मकं वर्णनम्, शत्रुपक्षे स्वकीयान् दृष्ट्वा अर्जुनस्य विषादः, तं प्रति श्रीकृष्णकर्तृकान्युत्साहप्रदकथनानि, अर्जुनस्य युद्धाद् विरतिः, तत्प्रसङ्गे भगवता कृतम् आत्मतत्त्वनिरूपणम्, साङ्ख्यतत्त्वनिरूपणम्, क्षात्रधर्मानुसारेण धर्मयुद्धस्योपादेयत्वमावश्यकत्वं चेति प्रतिपादनम्, कर्मयोगस्यावश्यकत्वनिरूपणम्, स्थितप्रज्ञपुरुषलक्षणनिरूपणम्, साङ्ख्यकर्मयोगनिष्ठावर्णनम्, यज्ञार्थकर्मणो वैशिष्ट्यम्, लोकसंग्रहार्थं ज्ञानवतां कृतेऽपि कर्मणाम् आवश्यकत्वमिति प्रतिपादनम्, भगवता कर्मयोगपरम्परावर्णनम्, विविधयज्ञवर्णनम्, ज्ञानयोगमहत्त्वकथनम्, साङ्ख्ययोगकर्मयोगयोर्विवेचनम्, साङ्ख्ययोगिनां कर्मयोगिनां च लक्षणानि, भगवता कर्मयोगप्रशंसनम्, योगारूढपुरुषलक्षणानि, ध्यानयोगवर्णनम्, मनोनिग्रहवर्णनम्, योगभ्रष्टानां गतेर्वर्णनम् । भगवद्भक्तानां श्रेष्ठत्वप्रतिपादनम्, सविज्ञानस्य ज्ञानस्य प्रशंसनम्, प्रकृतिस्वरूपवर्णनम्, भगवत्स्वरूपवर्णनम्, भगवद्भक्तप्रशंसनम्, आसुरस्वभाववर्णनम्, विविधयज्ञस्वरूपवर्णनम्, अन्तकालगतेर्निरूपणम्, उपासकानां गतेर्वर्णनम्, शुक्लकृष्णमार्गवर्णनम्, जगदुत्पत्तिवर्णनम्, भगवद्भक्तिवर्णनम्, अन्यभक्तेर्महत्त्वम्, भगवद्विभूतिवर्णनञ्च ।

**'ख'प्रकरणे**

विगतमोहस्यार्जुनस्य भगवन्तं प्रति विश्वरूपदर्शनायाभ्यर्थनम्, भगवता विश्वरूपवर्णनं तस्मै दिव्यदृष्टिप्रदानञ्च, सञ्जयेन विश्वरूपवर्णनम्, अर्जुनकर्तृकं भगवत्स्तवनम्, भगवता विश्वरूपमहिमवर्णनम्, विश्वरूपप्रदर्शनं च, भक्तितत्त्वनिरूपणम्, भक्तपुरुषलक्षणानि, क्षेत्रक्षेत्रज्ञज्ञानज्ञेयनिरूपणम्, प्रकृतिपुरुषवर्णनम्, सत्त्वादिगुणत्रयवर्णनम्, गुणातीतपुरुषलक्षणवर्णनं भगवन्महिमकथनञ्च, संसारवृक्षवर्णनं परमधामवर्णनञ्च, जीवतत्त्वनिरूपणं क्षराक्षरवर्णनं पुरुषोत्तमवर्णनञ्च, दैवासुरसम्पद्वर्णनम्, आसुरसम्पदां लक्षणानि, गुणत्रयानुसारेणाहारादिभेदानां वर्णनम्, भगवत्कर्तृकं त्यागस्वरूपनिरूपणम्, कर्महेतुनिरूपणम्, ज्ञानकर्मादिभेदवर्णनम्, वर्णधर्मनिरूपणम्, ज्ञाननिष्ठानिरूपणम्, सभक्तिककर्मयोगनिरूपणम्, शरणागतेर्महत्त्वस्य निरूपणञ्च ।

**'ग'प्रकरणे**

काव्यलक्षणम्, गद्यपद्यादिभेदैः त्रिप्रकारेण काव्यवर्णनम्, आख्यायिकादिभेदैः गद्यकाव्यस्य पञ्चप्रकारवर्णनम्, आख्यायिकादीनां लक्षणानि, महाकाव्यलक्षणादिकथनम्, नाटकनिरूपणम्, प्रकरणादीनां नाटकानां भेदनिरूपणम्, नाट्यलक्षणम्, पूर्वरङ्गे नान्दीमुखलक्षणम्, नटीविदूषक-पारिपार्श्वकादीनां कथनम्, कथोद्घातलक्षणम्, सिद्धोत्प्रेक्षितादीनां भेदानां कथनम्, रतिहासादीनां लक्षणम्, विभावालम्बनोद्दीपनानां वर्णनम्, धीरोदात्तादीनां नायकभेदानाञ्च वर्णनम्, शृङ्गारादिरसनिरूपणम्,

पाञ्चालीगौडीत्यादीनां रीतीनाञ्च निरूपणम्, नृत्यादिष्वङ्गकर्मणां निरूपणम्, स्त्रीणां लीलाविलासादीनां शरीरचेष्टादीनां च कथनम्, त्रयोदशशिरःकम्पनभेदकथनम् भृकुटिप्रदर्शनादिकथनम्, अभिनयादिकथनम्, रसादीनां विनियोगः, शृङ्गाररसभेदकथनम्, हासादीनां लक्षणम्, करुणादीनां रसानां भेदकथनम्, शब्दालङ्कार-लक्षणम्, अनुप्रासादीनामलङ्काराणां कथनम्, चक्रबन्धनिरूपणम्, अर्थालङ्कारलक्षण-भेदकथनम्, शब्दालङ्कारलक्षणभेद-कथनम्, काव्यगुणलक्षणादिकथनम्, रागलक्षणकथनम्, काव्यदोषप्रकार-वर्णनम्।

**'घ'प्रकरणे**

नैमिषारण्ये शौनकस्य द्वादशवार्षिक(सत्रे लोमहर्षणसुतेन सौतिना ऋषीन् प्रति महाभारत-युद्धवृत्तान्तकथनम्, समन्तपञ्चकक्षेत्रवर्णनम्, अक्षौहिणीप्रमाण-कथनम्, सर्वसङ्ग्रहकथनम्, महाभारतविषयाणां सङ्क्षेपेण वर्णनम्, आयोदधौम्यशिष्याणामारुण्युपमन्युवेदानां वेदशिष्योतङ्कस्य च गुरुभक्तेर्वर्णनम्, सौतिं प्रति शौनकस्य विविधप्रश्नाः, सौतिद्वारा तदुत्तरप्रदानञ्च, सङ्क्षेपतो भृगुवंशवर्णनम्, पुलोमाख्यानम्, भृगुणा अग्नये "सर्वभक्षी भव" इति शापप्रदानम्, अग्निशापपीडितदेवानां ब्रह्मशरणगमनमग्निशापमोचनञ्च, प्रमद्वरासर्पदंशस्तस्या सञ्जीवनञ्च, भार्यादंशनक्रुद्धस्य रुरोः सर्पवधप्रतिज्ञा, रुरुडुण्डुभसंवादश्च।

**'ङ'प्रकरणे**

डुण्डुभेन आत्मकथाकथनम्, अहिंसाया उपदेशः, डुण्डुभस्य शापान्मुक्तिः, जनमेजयस्य सर्पसत्रविषये रुरोः जिज्ञासा, सर्पसत्रप्रस्तावः आस्तीकवृत्तम्, जरत्कारुचरितम्, जरत्कारुपितृसंवादः, वासुक(रुपाख्यानम्, वासुकिस्वसृ-वर्णनम्, सर्पाद्युत्पत्तिवर्णनम्, अमृतमन्थनवर्णनम्, नारायणेन मोहिनीरूपं धृत्वा देवानाममृतप्राशनं देवासुरयुद्धञ्च।

**५.शिक्षणविधिः**

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । अन्वेषणपरियोजनसदृशा विधयोऽपि प्रयोक्तुं शक्यन्ते। यथासम्भवं शिक्षकैः क(वलं मार्गनिर्देशनं विधाय स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः । समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । सति सम्भवे शैक्षिकभ्रमणमप्यावश्यकतानुसारेण करणीयम्। तद्व्यवस्था च सम्बद्धशिक्षक(ण विभागेन विद्यापीठेन वा करणीया। आवश्यकञ्चेत् पुराणवाचनादिप्रयोगात्मककक्षाया अपि व्यवस्था करणीया । अधुना दूरशिक्षणस्यापि प्रचलनमस्तीति सङ्गणकयन्त्रस्यापि प्रयोगो विधीयते। शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते। तदर्थं विश्वविद्यालयेन विद्यापीठेन वा व्यवस्था विधेया । विद्यापीठेष्वन्तर्जालव्यवस्थापि करणीया। पुस्तकालयेषु पाठ्यसामग्रीरूपेण टंकणयन्त्राणामपि व्यवस्था विधेया।

**६.मूल्याङ्कनविधिः**

मूल्याङ्कनं द्विधा विभक्तं विद्यते- आन्तरिकं (निर्माणात्मकम्) बाह्यं (निर्णयात्मकम्) चेति । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतरूपेण भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकर्ण विभागसमन्वितकार्य-योजनायामान्तरिकमूल्याङ्कनं क्रियते । गृहकार्यम्, कक्षापरीक्षा, परियोजनाकार्यमित्यादीन्यन्यानि साधनानि च मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशतमङ्का निर्धारिताः सन्ति । बाह्यमूल्याङ्कनस्य कृते वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, किन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात् पूर्वमेव सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्यङ्कानां नेपालसंस्कृत-विश्वविद्यालयेन अनुपातपद्धत्या संयोजनं करिष्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकारा निर्धारिताः सन्ति । साधारणरूपेण बाह्यपरीक्षा लेखात्मिकैव भविष्यति, किन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि कर्तुं शक्यते ।

**वार्षिक-परीक्षा-प्रश्नपत्रनिर्माण-सारणी**

| प्रकरणानि | प्रश्नप्रकाराः | प्रश्नसंख्याः | | अङ्काः |
|---|---|---|---|---|
| क,ख,ग, घ,ङ | | प्रष्टव्याः | समाधेयाः | |
| | विवेचनात्मकाः | ३ | २ | २ × १२ = २४ |
| | संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६ ×७ = ४२ |
| | व्याख्यात्मकाः | ४ | ३ | ३ × ८ = २४ |
| | वस्तुगताः | १० | १० | १० ×१ = १० |
| | | २६ | २१ | १०० |

**७ .पाठ्यसूची —**

**क) पाठग्रन्थाः**

१. वेदव्यासः, *श्रीमद्भगवद्गीता* (सम्पूर्णा)।
२.वेदव्यासः, *अग्निपुराणम् (* ३३७-३४७ अध्यायाः)।
३.वेदव्यासः,*महाभारतम्* (आदिपर्वणि १-१९ अध्यायाः)।

**(ख) सहायकग्रन्थाः**

१.तिलकबालगङ्गाधर,*गीतारहस्यम्।*
२.शास्त्री रघुवर,*महाभारतकालीन राजव्यवस्था,* भाग १।
३.भट्टाचार्य सुखमय, *महाभारतकालीन समाज* ।

**(ग) सन्दर्भग्रन्थाः**

१.आचार्य बलदेव उपाध्याय, *पुराण-विमर्श* ।
२.आचार्य शिवराज कौण्डिन्न्यायन,*वैदिक धर्म मूल रूपमा* ।
३. शङ्करभगवत्पादः, *श्रीमद्भगवद्गीताभाष्यम्*।
४.उपाध्याय मुकुन्दशरण, *महाभारत सूक्तिसुधा ।*

# विषयः–सर्वदर्शनम्

पाठ्यांशनाम – न्यायवैशेषिकइतरप्राच्य**दर्शनाध्ययनम्**
स्तरः – शास्त्री
वर्षम् – प्रथमम्
पत्रम् – प्रथमम्

पाठ्यांशसङ्केतः – स.द. ३०१
पूर्णाङ्काः – १००
वार्षिकः पाठ्यभारः – १६० घण्टाः
साप्ताहिकः पाठ्यभारः – ६

## १. पाठ्यांशपरिचयः –

पाठ्यांशोऽयं परिचयात्मकः । अत्र पाठ्यांशे दर्शनपदार्थः, दर्शनशास्त्रेतिहासः, चार्वाकजैनबौद्धदर्शनपरिचयः, साङ्ख्ययोगदर्शनपरिचयः, पूर्वमीमांसोत्तरमीमांसादर्शन–परिचयश्चेत्यादीनां विषयाणां सामान्यविशेष–रूपेणावबोधनाय तत्तद्विषयाः समाविष्टा वर्तन्ते।

वैदिकावैदिकभेदेन आस्तिकनास्तिकभेदेन वा दर्शनस्य द्वैविध्यं विद्यते । तत्र वेदस्य प्रामाण्यं स्वीकृत्य प्रवर्तमानं दर्शनमास्तिकदर्शनञ्चेद् वेदस्य प्रामाण्यमस्वीकृत्य प्रवर्तमानं दर्शनं नास्तिकदर्शनमिति । तत्र साङ्ख्ययोगन्याय–वैशेषिकपूर्वमीमांसोत्तरमीमांसाभेदेन आस्तिकदर्शनानि षट् सन्ति चेत् चार्वाकजैनबौद्धभेदेन नास्तिकदर्शनानि त्रीणीति । नास्तिकदर्शनेषु बौद्धदर्शनस्य वैभाषिक–सौत्रान्तिक–योगाचार–माध्यमिकभेदेन भेदचतुष्टयं विद्यते । एवञ्च द्वादशविधदर्शनानि प्रसिद्धानि । किन्तु शाब्दब्रह्मप्रतिपादकव्याकरणदर्शनस्य शैव–शाक्त–वैष्णवादिदर्शनानाञ्च स्वतन्त्रतया दर्शनत्वेन स्वीकाराद् द्वादशाधिकदर्शनान्यपि दृश्यन्ते।

समग्रतया दर्शनपदार्थदर्शनशास्त्रेतिहासआस्तिकनास्तिकादिविविधदर्शन–गतमूल–भूतसिद्धान्तैः अनुप्राणितोऽयं पाठ्यांशो दर्शनस्य सामान्यपरिचयं दातुं छात्राणां कृते सहयोगी विद्यते।

## २. पाठ्यांशसामान्योद्देश्यानि

अस्य पाठ्यांशस्य सामान्योद्देश्यानि निम्नलिखितानि सन्ति–

- दर्शनस्य सामान्यपरिचयप्रदानम्
- वैदिकावैदिकदर्शनभेदविश्लेषणम्
- न्यायवैशेषिकइतरप्राच्यदर्शनानां परिचयप्रदानम्।
- न्यायवैशेषिकइतरप्राच्यदर्शनप्रतिपादितपदार्थानां सामान्यपरिचयश्च

## ३. पाठ्यांशस्य विशिष्टोद्देश्यानि पाठ्यविषयसंयोजनञ्च

| प्रकरणानि | प्रकरणगतविशिष्टोद्देश्यानि | पाठ्यविषयाः | अङ्काः | घण्टाः |
|---|---|---|---|---|
| क | न्यायवैशेषिकइतरप्राच्यदर्शन–शास्त्रेतिहासविश्लेषणकौशल्यम् | न्यायवैशेषिकइतरप्राच्यदर्शनशास्त्रस्य संक्षिप्तेतिहासः | १० | १६ |

| | | | | |
|---|---|---|---|---|
| ख | चार्वाकजैनबौद्धदर्शनगतमूलभूत सिद्धान्त-व्याख्यान - सामर्थ्यम्, | चार्वाकबौद्धजैनदर्शन-सिद्धान्त सम्बद्धविषयाः | २५ | ४० |
| ग | साङ्ख्ययोगदर्शनगतमूलभूत सिद्धान्तविश्लेषणप्रावीण्यम्, | साङ्ख्ययोगदर्शनसम्बद्धा विषयाः | २० | ३२ |
| घ | पूर्वमीमांसोत्तरमीमांसादर्शनगत मूल भूतविषयाणां विवेचने सामर्थ्यम्, | पूर्वमीमांसोत्तरमीमांसा-सिद्धान्त सम्बद्धा विषयाः | ३० | ४८ |
| ङ | शैवादिदर्शनपरिचयप्रदाने सामर्थ्यम्। | शैवनकुलीशपाशुपतपाणिनीयदर्शनसम्बद्धा विषयाः | १५ | २४ |

**४. पाठ्यवस्तुविवरणम्**

**'क'प्रकरणम्**

दर्शनशब्दार्थः, दर्शनभेदकारणोपपादनम्, वैदिकावैदिकभेदेन दर्शनानां द्वैविध्यम्, दर्शनानां सङ्ख्या, दर्शनानां कालविभागः, मुख्याचार्याः (कणादः, गौतमः, कपिलः, पतञ्जलिः, जैमिनिः, बादरायणः, प्रशस्तपादाचार्यः, वात्स्यायनः, शबरमुनिः, शङ्कराचार्यः, बुद्धः, नागार्जुनः, दिङ्नागः, धर्मकीर्तिः, वसुबन्धुः, महावीरः।

**'ख'प्रकरणम्**

**(अ) चार्वाकदर्शनम्**-चार्वाकशब्दार्थः परिभाषा च, मुख्यसिद्धान्तः, प्रमाणम्, प्रमेयम्, मोक्षस्वरूपम् च।

**(आ) बौद्धदर्शनम्** -बौद्धशब्दार्थः परिभाषा च, बुद्धोपदेशाः, बौद्धदर्शनस्य विभागः ( वैभाषिकमतम्, सौत्रान्तिकमतम्, योगाचारमतम् (विज्ञानवादः), माध्यमिकमतम्) । निर्वाणोपायो निर्वाणस्वरूपञ्च।

**(इ) जैनदर्शनम्** -जैनशब्दार्थः परिभाषा च, मुख्यसिद्धान्तः, प्रमाणम्, प्रमेयम्, मोक्षोपायः, मोक्षस्वरूपम् च।

**'ग'प्रकरणम्**

**(अ) साङ्ख्यदर्शनम्** - साङ्ख्यशब्दार्थः परिभाषा च, प्रमाणानि, प्रमाणभेदाः, साङ्ख्याभिमतविंशतिः तत्त्वानि (मूलप्रकृतिः, महत्, अहङ्कारः, मनः, पञ्चज्ञानेन्द्रियाणि (घ्राणरसनचक्षुस्त्वक्श्रोत्राणि), पञ्चकर्मेन्द्रियाणि (वाक्-पाणि-पाद-पायु-उपस्थानि), शब्दस्पर्शरूपरसगन्धाख्याः पञ्च तन्मात्राः, आकाश-वायु-तेजो-जल-पृथिव्यादीनि पञ्च महाभूतानि, पुरुषः), मोक्षस्वरूपम्, तत्प्राप्त्युपायश्च।

**(आ) योगदर्शनम्** - योगशब्दार्थः परिभाषा च, योगदर्शनगतमुख्यविषयाः - प्रमाणानि, प्रमेयानि, यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयो=ष्टावङ्गानि, अणिमाद्यष्टसिद्धयः, कैवल्यस्वरूपम्, तत्प्राप्त्युपायश्च।

**'घ'प्रकरणम्**

**(अ) मीमांसादर्शनम्**

मीमांसाशब्दार्थः परिभाषा च, मीमांसादर्शनभेदः, प्रमाणानि, प्रमेयानि, मोक्षस्वरूपम्, तत्प्राप्त्युपायश्च।

**(आ) वेदान्त(उत्तरमीमांसा)दर्शनम्**

वेदान्तशब्दार्थः, परिभाषा च, वेदान्तदर्शनप्रभेदानां सामान्यपरिचयः (अद्वैतवेदान्तः, द्वैताद्वैतवेदान्तः, विशिष्टाद्वैतवेदान्तः, द्वैतवेदान्तः, शुद्धाद्वैतवेदान्तः)।

**'ङ'प्रकरणम्**

शैव–नकुलीश–पाणिनीयदर्शनानां परिचयः। एतेषां मुख्याः सिद्धान्ताः।

**५. शिक्षणविधयः शैक्षिकसामग्री च**

निगमनागमनप्रश्नोत्तरप्रवचनविमर्शप्रदर्शनात्मकशिक्षणाद्याः शिक्षणविधय एवात्र प्रयुज्यन्ते । सति सम्भवे शिक्षकैस्तदितरान्वेषणपरियोजनयोः प्राक्कल्पनादयश्छात्रकेन्द्रिता विधयोऽपि प्रयोक्तुं शक्यन्ते । यथासम्भवं शिक्षकैः केवलं मार्गं निर्दिश्य स्वयमेव शिक्षणाय छात्राः प्रेरणीयाः।

विषयानुसारेण समुचितानां विविधानां श्रव्यदृश्यशैक्षिकसामग्रीणां प्रयोगो विधेयः । तद्व्यवस्था सम्बद्धशिक्षकेण विभागेन विद्यापीठेन वा विधेया । आवश्यकतानुसारेण प्रयोगात्मककक्षाया व्यवस्थाऽपि कार्या । साम्प्रतं दूरशिक्षणमपि प्रचलितं विद्यते, तदर्थं सङ्गणकयन्त्राणि प्रयोक्तव्यानि। शिक्षकप्रशिक्षणव्यवस्थापि तत्रापेक्षते। तदर्थं विश्वविद्यालयेन विद्यापीठेन वा सक्रियतावलम्बनीया।

**६. मूल्याङ्कनविधिः**

मूल्याङ्कनं द्विधा विभक्तमस्ति– आन्तरिकं (निर्माणात्मकम्) बाह्यम् (निर्णयात्मकम्) च । आन्तरिकमूल्याङ्कनं प्रायेण कक्षागतं भवति । कक्षायां पठनपाठनोपस्थित्यादिकं विलोक्य सम्बद्धशिक्षकेण विभागसमन्वितकार्ययोजनायां आन्तरिकमूल्याङ्कनं विधीयते । गृहकार्यं, कक्षापरीक्षा, परियोजनाकार्यम् इत्यादीनि अन्यानि साधनान्यपि तन्मूल्याङ्कनस्याधारा भवितुं शक्नुवन्ति । आन्तरिकमूल्याङ्कनस्य कृते विंशतिप्रतिशदङ्का निर्धारिताः । बाह्यमूल्याङ्कनस्य तु वर्षान्ते बाह्यपरीक्षा भवति । प्रश्नपत्रे बाह्यपरीक्षायाः पूर्णाङ्काः शतमेव भवन्ति, परन्तु नियमितच्छात्राणां कृते परीक्षाफलप्रकाशनात्पूर्वं सम्बद्धविद्यापीठेन प्रेषितानामान्तरिकमूल्याङ्कनस्याङ्कानां नेसंविपरीक्षानियन्त्रणकार्यालयेन अनुपात–पद्धत्या संयोजनं विधास्यते । बाह्यपरीक्षायां मूल्याङ्कनाय अङ्कवितरणेन सहैव अधोनिर्दिष्टाः प्रश्नप्रकाराः निर्धारिताः सन्ति। साधारणतया बाह्यपरीक्षा लेखात्मिकैव भवति, परन्तु परिस्थितिवशात् सा परीक्षा अन्तर्वार्तादिनापि सिद्ध्यति।

**वार्षिक–परीक्षा–प्रश्नपत्रनिर्माण–सारिणी**

| प्रश्नप्रकाराः | प्रश्नसङ्ख्याः | | अङ्काः |
|---|---|---|---|
| | प्रष्टव्याः | समाधेयाः | |
| विवेचनात्मकाः | ३ | २ | २ × १२== २४ |
| संक्षिप्तोत्तरापेक्षिणः | ९ | ६ | ६ ×७== ४२ |
| व्याख्यात्मकाः | ४ | ३ | ३ × ८ == २४ |
| वस्तुगताः | १० | १० | १ × १०== १० |
| योगः | २६ | २१ | १०० |

**७. पाठ्यसूची**

**(क) पाठ्यग्रन्थौ**

१. माधवाचार्यः, **सर्वदर्शनसङ्ग्रहः**, सपरिशिष्टः प्रकाशहिन्दीभाष्योपेतः, व्याख्याताउमाशङ्करः शर्मा 'ऋषिः', चौखम्बाविद्याभवन, वाराणसी, सन् २०१४ ।

२. श्रीपादशास्त्री हसूरकरः, **द्वादशदर्शनसोपानावलिः**, गुड कम्पेनियन्स, बडोदरा, सन् १९९३ ।

**ख.सहायकग्रन्थाः**

**१.** सायणमाधवाचार्य **सर्वदर्शनसङ्ग्रहः** ।

**२.** बलदेवोपाध्याय **भारतीय दर्शन**

**३.** डा.दीर्घराजघिमिरे **षड्दर्शनीसंग्रहः** ।

# विषयः –सर्वदर्शनम्

पाठ्यांशनामः- **न्यायवैशेषिकाभिमतपदार्थाध्ययनम्** पाठ्यांशसङ्केतः – स.द. ३०२
स्तरः – शास्त्री पूर्णाङ्काः – १००
वर्षम् – प्रथमम् वार्षिकः पाठ्यभारः-१६० घण्टाः
पत्रम् – द्वितीयम् साप्ताहिकः पाठ्यभारः – ६

**१. पाठ्यांशपरिचयः –**

पाठ्यांशोऽयम् उत्तरमध्यमां कक्षाम्, द्वादशीं कक्षां नेपालसंस्कृतविश्वविद्यालयीयांप्राक्शास्त्रिकक्षांवा समुत्तीर्य शास्त्रीकक्षां प्रविश्यसर्वदर्शनविषयमध्येतुकामानां छात्राणांकृतेशास्त्रिप्रथमवर्षस्य द्वितीयपत्र-त्वेननिर्धारितो वर्तते । अयं पाठ्यांशः परिचयात्मकोविश्लेषणात्मकश्च वर्तते । सर्वदर्शनमध्येतुकामानामपि छात्राणां न्यायदर्शने प्रयुक्तायाभाषाशैल्या-स्तत्परिष्कारप्रणाल्याश्च सामान्यतो बोधो भवत्वितिधियान्यायवैशेषिक-शास्त्रयोर्बहुधाप्रयुज्यमानाःक(त्वेनपारिभाषिकशब्दाविशेषतो क(शव-मिश्रप्रणीते तर्कभाषानामक(ग्रन्थेप्रयुक्ताःतादृशशब्दाः पाठ्यांशस्यास्यकप्रकरणे सन्निविष्टाः सन्ति । षड्विधास्तिकदर्शनेषु न्यायवैशेषिकदर्शनयोः प्रमाणप्रमेयनिरूपणे मतसाम्यादुभयोर्दशनयोः प्रथितेऽपि समानतन्त्रत्वे कतिपयसिद्धान्तनिर्धारणे उभयोर्दर्शनयोर्मतवैषम्य-स्यापिबहुत्रदृग्गोचरीभूतत्वाद् सर्वदर्शनमधीयानानां छात्राणां दर्शनयोरनयोर्मतसाम्य-वैषम्यबोधायोभाभ्यां दर्शनाभ्यां स्वीकृतानां पदार्थानामवबोधस्यापरिहार्यत्वान्यायदर्शनस्वीकृतानां प्रमाणप्रमेयादीनां षोडश-पदार्थानां वैशेषिकदर्शनस्वीकृतानां द्रव्यगुणादीनां सप्तपदार्थानाञ्चज्ञानाय क(शवमिश्रप्रणीते तर्कभाषाग्रन्थे प्रतिपादिताविषयाःपाठ्यांशस्यख—ग—घ—ङप्रकरणेषु यथाक्रमंविभज्यनिर्धारिताः सन्ति । तस्मिन् क्रमे खप्रकरणे न्यायदर्शनाभिमताःषोडशपदार्थाः, प्रमाणसामान्यस्वरूपम्, सभेदं सोदाहरणञ्च कारणम्, प्रत्यक्षप्रमालक्षणञ्चैतावन्तो विषयाः सन्निविष्टाः वर्तन्ते । गप्रकरणे सभेदमनुमानप्रमाणम्, सभेदाः हेत्वाभासाः, उपमानप्रमाणम्, कारणसहितशाब्दबोधप्रक्रियाचेतिविषयाःसमाविष्टावर्तन्ते । घप्रकरणे न्यायदर्शन-प्रतिपादितानिअर्थान्तप्रमेयानि, वैशेषिकदर्शनप्रतिपादिताः सप्तपदार्थाश्च समाविष्टा वर्तन्ते । ङप्रकरणे बुद्ध्याद्यपवर्गान्तप्रमेयस्वरूपम्, संशयादयश्चतुर्दश-पदार्थाश्चेतिविषयायथायथं निर्धारिताः सन्ति । तदनु सामान्यविशिष्टोद्देश्य-प्रकरणविभागशिक्षणविधिमूल्याङ्कनविधिप्रश्नपत्रनिर्माणप्रक्रियापाठ्यग्रन्थसन्दर्भग्रन्थाश्चेति पाठ्यक्रमस्यबीजत्वेनाभिमतानितत्त्वानि समाविष्टानि सन्तीति ।

**२. पाठ्यांशस्यसामान्योद्देश्यानि**

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधो निर्दिष्टविषयेषुसामान्यतो व्युत्पन्ना-भविष्यन्ति

- न्यायवैशेषिकशास्त्रयोः सङ्क्षिप्तेतिहासवर्णने, अथ चैतच्छास्त्रयोर्बहुधा- प्रयुज्यमानानां निर्दिष्टपारिभाषिकपदानामवबोधपूर्वकं तेषां सोदाहरण-प्रयोगे,

- न्यायदर्शनाभिमतषोडशपदार्थविवेचने,
- न्यायदर्शनाभिमतप्रमाणानामौचित्यप्रदर्शने,
- वैशेषिकदर्शनप्रतिपाद्यसप्तपदार्थनिर्वचने,
- न्यायवैशेषिकदर्शनाभिमतपदार्थानां सामान्यतः साम्यवैषम्यवर्णने च ।

**३. प्रकरणगतविशिष्टोद्देश्य–पाठ्यविषयज्ञापनपूर्वकमङ्कानां पाठघण्टनाञ्च निर्देशनम्**

